ISSN: 0972-1401

STUDIES IN HUMANITIES AND SOCIAL SCIENCES

# भारतीय दर्शनेषु चैतन्यतत्त्वावधारणा

Vol. VIII No. 2 Winter 2001

SHSS

General Editor
**V.C. SRIVASTAVA**

Editor
**S. RANGANATH**

Journal of the Inter-University Centre for Humanitites and Social Sciences
Indian Institute of Advanced Study, Rashtrapati Nivas, Shimla

STUDIES IN
HUMANITIES AND SOCIAL SCIENCES

*General Editor.* V.C. SRIVASTAVA

*Editorial Board:*

S.C. BHATTACHARYA
*Indian Institute of Advanced Study, Shimla*

NIRBHAI SINGH
*Indian Institute of Advanced Study, Shimla*

M.S. SRIRAM
*University of Madras, Chennai*

P.K. MUKHOPADHYAYA
*Jadavpur University, Calcutta*

V.N. MISHRA
*Deccan College, Pune*

HARISH TRIVEDI
*University of Delhi, Delhi*

RAMASHRAY ROY
*Indian Institute of Advanced Study, Shimla*

BHABEN BARUA
*Indian Institute of Advanced Study, Shimla*

V. RODRIGUES
*Indian Institute of Advanced Study, Shimla*

GURDEV SINGH
*Guru Nanak Dev University, Amritsar*

MANAS MUKUL DAS
*Allahabad University, Allahabad*

*Editorial Coordinator:* A.K. SHARMA
*Design and Production:* N.K. MAINI

*Subscriptions:*

INSTITUTIONS: Rs. 300 (Insland), U.S. $ 30 (foreign)
INDIVIDUALS: Rs. 200 (Insland), U.S. $ 25 (foreign)
STUDENTS: Rs. 160 (Insland), U.S. $ 20 (foreign)

Cheques/ drafts should be drawn in favour of
Indian Institute of Advanced Study, Shimla-171005.
Enquiries concerning manuscripts, advertisements
and subscriptions may be addressed to:

A.K. SHARMA
Public Relations Officer
Indian Institute of Advanced Study
Rashtrapati Nivas, Shimla-171005

# भारतीय दर्शनेषु चैतन्यतत्त्वावधारणा

सम्पादकः
एस्. रङ्गनाथः

भारतीय उच्च अध्ययन संस्था
शिमला - १७१ ००५

# विषयानुक्रमणिका


निदेशकनिवेदनम् 5

भारतीय दर्शनेषु चैतन्यतत्त्वावधारणा 7

१. वैदिकवाङ्मये चैतन्यावधारणा - डॉ. वीरेन्द्रकुमार मिश्र 11

२. उपनिषत्सु चैतन्यम् - प्रो. शेषाचलशर्मा 28

३. पुराणेषु चैतन्यस्यावधारणा - डॉ. विन्ध्येश्वरी प्रसाद मिश्र 'विनयः' 46

४. तंत्रशास्त्रे चैतन्यावधारणा - डॉ. राधेश्याम चतुर्वेदी 69

५. चार्वाकचिन्तनसरण्यां चैतन्यस्यस्थानम् - प्रो. बि.जि. श्रीलक्ष्मीः 87

६. वैयाकरणनये चैतन्यस्वरूपम् - डॉ. दीक्षितपुष्पा 93

७. सांख्ययोगशास्त्रयोश्चैतन्यस्य स्वरूपम् - महामहोपाध्याय. एन्. रङ्गनाथ शर्मा 107

८. मीमांसायां चैतन्यस्वरूपम् - प्रो. सोमनाथ नेने 117

९. श्रीशंकरवेदान्ते चैतन्यम् - डॉ. राधाकृष्णमूर्ति 125

१०. द्वैतवेदान्ते चैतन्यस्वरूपम् - महामहोपाध्याय. एस्.वि. भीमभट्टः 140

११. रामानुजदर्शने चैतन्यस्वरूपम् - प्रो. अरेयर् श्रीराम शर्मा 148

१२. काव्यशास्त्रीय चिन्तने चैतन्यम् - प्रो. राजेन्द्रमिश्रः 159

१३. व्यक्तितत्त्वविमर्शः - प्रो. राधावल्लभ त्रिपाठी 178

१४. कालिदाससाहित्ये चैतन्यदर्शनम् - डॉ. जनार्दन प्रसाद पाण्डेय 'मणि' 187

१५. कृत्रिममनीषायां चैतन्यतत्त्वम् - प्रो. के.एस्. कण्णन् 198

Contributors 221

# निदेशकनिवेदनम्

भारतीय उच्च अध्ययन संस्थान (Indian Institute of Advanced Study) भारतीय ज्ञानपरंपरायाः समभिवर्धने सुश्लाध्यं कार्यक्रमं निर्वहति। तत्तद्विषयेषु परिणतमतीनां विदुषां विचारधाराः प्रबन्धरूपेण प्रकाशयितुं समुध्यमोऽपि संस्थायाः कार्यक्रमेष्वन्यतमः । भारतीयदर्शनेषु सुरभारती भूषितस्य ग्रन्थरत्नस्य प्रकाशनम् इदम्प्रथमतया संस्थयाऽनया समङ्गीक्रतं वर्तते। तत्फलरूपेणैव ग्रन्थरत्नमिदं महाजनानां सम्मुखे सन्दीप्यते। समग्रे भारतदेशे विराजमानाः विद्वांसः विषयेऽत्र विचारधारा वितरणं कृतवन्तः इति महदिदं प्रमोदस्थानम्। अयं च प्रयत्नः भारतीयविदुषां विचार-परंपरायाः समानरूपतायाः भारतीय भावनैकतायाश्च प्रध्योतको भवतीति प्रमोदभरातिशयः । सर्वेऽपीमे विद्वांसः कृतज्ञताव्याहारभरैः सप्रमोदं सम्भाव्यन्ते । बेङ्गलूरुनगरीयः प्राध्यापकः डा. एस्. रङ्गनाथ महोदयः महत्या श्रद्धया ग्रन्थसम्पादनकार्य सम्यक् निरूढ़वानिति सर्वाकारेण समभिनंध्यते।

विनोद चन्द्र श्रीवास्तवः
निदेशकः
भारतीय उच्च अध्ययन संस्थान शिमला

# भारतीय दर्शनेषु चैतन्यतत्त्वावधारणा

## पुरोवाक्प्रस्तुतिः

जगतीतलेऽस्मिन् सकला अपि जीवाः निसर्गतः सुखमेव अपेक्षमाणा परिदृश्यन्ते । न कोऽपि दुःखमभिकांक्षति । एवं स्थितेऽपि दुःखमेव पृष्ठारुढ़ो बेताल इव सर्वानपि पीड़यति निश्चप्रचम् । ईदृशं च दुःखं दूरीकृत्य सुखं प्राप्तुं क उपायः इति अयं महाप्रश्नः मनुष्यचेतसि सदा घूर्णमानो वरीवर्ति । लैकिकविषयाणा-समृद्धिः कियातापि परिमाणेन महत्यपि तया शाश्वतसुखप्राप्तिः सर्वथा असंभवग्रस्ता भवति । मृगमरीचिकाजलेन पिपासा निवृत्तिर्भवतिवा? दुःखं दूरीकृत्य शाश्वतं सुखं अधिगन्तुं उपयुक्तोपायान्वेषणं महर्षिभिरासादितम्। तेन च शाश्वती शान्तिः समधिगता तैः । आत्मसाक्षात्कारेण खलु शाश्वतशान्तिः प्राप्यते । नास्त्यत्र उपायान्तरमिति सत्यं सत्यं पुनस्सत्यमेव । तमात्मस्थं येऽनुपश्यन्ति धीराः तेषां शान्तिःशाश्वती नेतरेषाम् इति खलूपनिषदां डिण्डिमध्वनिः। 'तरति शोकमात्मवित्' इत्यादिरीत्या आत्मज्ञानमेकमेव शोकनिवृत्तेः परमोपायः इति औपनिषदः सत्यसिद्धान्तः । उपनिषत् शब्दश्च प्राधान्येन आत्मविध्यां नाम ब्रह्मविध्यामेव प्रतिपादयति।

धर्मस्य हि द्वयी गतिः प्रवृत्या निवृत्या च । उभयविधधर्मस्यापि श्रुतिरेव परमं प्रमाणम्। 'वेदोऽखिलो धर्ममूलं', 'धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः' इत्यादीन्यार्षवचनानि विषयमिमं सम्यक् समर्थयन्ति । प्रवृत्ति धर्मेणाभ्युदयः निवृत्ति धर्मेण च निःश्रेयसं सिध्यति । यतः अभ्युदयनिःश्रेयससिद्धिः स धर्मः इति महर्षिनिरूपितं धर्मलक्षणम् । अत एव कर्मज्ञान काण्ड़भेदेन वेदवाङ्मयम् विभक्तं विराजते । कर्मकाण्ड़े प्रतिपादितो धर्मः यज्ञमयः । यज्ञाचरणेन मानवास्य चित्तं पवित्रं भवति । यज्ञेन लोककल्याणं सिध्यति । यज्ञस्य संपत्तये परिषदावश्यकी भवति । परिषद् इत्युक्तौ उपयुक्तानां ऋत्विजां समावेशः । परितः सीदन्ति अत्र इति परिषत्शब्दस्य निर्वचनं

दृश्यते । श्रुतिविहित यज्ञप्रक्रियायां परिषदो हि विशिष्टं महत्वं वरीवर्ति । वैदिकवाङ्मये अत्यन्तमहत्वसम्पन्नःशब्दः उपनिषदिति । परिषत्-उपनिषच्छब्दयोः यथार्थ-तत्त्वाधिगमेन समस्तश्रुतितात्पर्य निर्णयः संसिध्यति ।

आत्मावाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः इति हि उपनिषदाघोषः । प्रायः श्रुतिवचनमिदमवलंब्यैव दर्शनशब्दप्रवृत्तिर्जातेति वक्तुं शक्यते । वेदान्ततत्वविचारप्रवृत्तिस्तु ऋग्वेदसंहितायामेवोपलभ्यते । 'एकं सद्विप्रा बहुधा वदन्ति' 'परुष एवेदं सर्वं यद्भूतं यच्चभव्यम्' इत्यादिश्रुतिवचनानि प्राधान्येन परंब्रह्मैव निर्दिशन्ति । भारतीयदर्शनशास्त्र परम्परायां श्रुतिशिरसामेवाग्रस्थानम् जागर्ति । आत्मतत्त्वविचार एव उपनिषदां प्रधानभूतो विषयः । यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह यच्चास्य सन्ततोभावः तस्मादात्मेति कथ्यते इति हि आत्मशब्द निर्वचनं परिदृश्यते । सर्वेषामपि वेदान्तदर्शनानां उपनिषद एव प्राधान्येन प्रमाणम् । तत्त्वमसि, सर्व खल्विदं ब्रह्म, इत्यादीनि वचनानि महावाक्यत्वेन परिगणितानि अद्वैतदर्शनमेव प्राधान्येन प्रतिपादयन्ति । 'द्वासुपर्णा सयुजा सखायो समानं वृक्षं परिषस्वजाते' इत्यादीनि वचनानि द्वैतदर्शने प्रमाणत्वेन परिगण्यन्ते । अद्वैतदर्शने मायावादः बौद्धदर्शन प्रभावात् समुद्भूतः इति केचन विमर्शकाः अभिदधते । परन्तु नैतत् तथ्यं वचः । 'अविध्यायामन्तरे वर्तमानाः' 'सोऽविध्याग्रन्थिं विकिरतीह सोम्य', 'वाचारम्भणं विकारो नामधेयम् मृत्तिकेत्येव सत्यम्' इत्यादीनि वचनानि मायावादमेव समर्थयन्ति ।

आस्तिकनास्तिकभेदेन दर्शनं द्वेधा प्रसिध्यति । यध्यपि नास्तिकदर्शनविषये दर्शनशब्दः याथार्थ्यं न लभते । षड़ेव हि दर्शनानि आस्तिकदर्शनत्वेन प्रख्याप्यन्ते ।

कपिलस्य कणादस्य गौतमस्य पतञ्जलेः ।

व्यासस्य जैमिनेश्चापि दर्शनानि षडेवहि ॥ इति ॥

अथाप्याभासरूपेण नास्तिकदर्शनान्यपि दर्शनप्रवृत्तिभाजो भवन्ति । सामान्यतः ईश्वराभ्युपगन्तरः आस्तिकाः,तदनधिगन्तारश्च नास्तिका इति प्रसिद्धिः । परन्तु, सांख्ये पूर्वमीमासायांच ईश्वरो नाभ्युपगम्यते । अतः षडपीमानि आस्तिकदर्शनानि वेदप्रामाण्यं अङ्गीकुर्वन्तीति कारणात् आस्तिकव्यपदेशं भजन्ति । नैरात्म्यवादिनो

बौद्धाः, आत्मतत्वाङ्गीकर्तारोप्यार्हताः देहात्मवादिनो लोकायतिकाश्च वेदप्रामाण्यनिराकरणात् नास्तिकसंज्ञया व्यवह्रियन्ते । केवलं प्रज्ञावादम् पुरस्कृत्य पुण्यपापपरलोक धर्माधर्म बन्धमोक्ष परमेश्वरादि विषयजातं सर्वथा निराकृत्य प्रत्यक्षमेकं प्रमाणं पुरस्कुर्वन्तः चार्वाकाः दर्शनगोष्ठ्यां सर्वथा निकृष्टतमा परिगण्यन्ते ।

सामान्यतः एकं दर्शनम् इतर दर्शनानां पूर्वपक्षी भवति । तावता दर्शनान्तराणि सर्वथा निःसाराणीति न तिरस्करणीयानि । केवलम् विचारभेदप्रवृत्तिःप्राधान्यं प्राप्नोति । विचारमार्गे परमतनिराकरणप्रवृत्तिः स्वीयसिद्धान्तप्रतिष्ठापनाय केवलमङ्गमित्येव विभावनीयम् । दर्शनेषु खण्ड़नमण्ड़न परम्परायाः बाहुल्येऽपि सर्वाण्यपि दर्शनानि अव्याहतरुपेण प्रववृधिरे प्रवर्धन्ते च । बहुधा दर्शनानि आत्मबहुत्वं प्रतिपादयन्ति । परन्तु, सच्चिदानन्दरूपम् परमब्रह्मैव तत्वमेकमिति अद्वैतवेदान्तडिण्डिमघोषः । अद्वयात्मापि अविध्योपहितः जीवभावेन भासमानः बहुत्व भ्रमविषयो भवति । जीवभावस्य केवलं व्यावहारिकी सत्तैव विध्योतते । जीवात्मनाम् पारमार्थिकं सत्यत्वम प्रतिपाद्य परंब्रह्मणो अंशा जीवाः इति विशिष्टाद्वैतं प्रतिपादयति । स्वतंत्रस्य ब्रह्मणः सर्वथा अधीनभूता जीवाः इति द्वैतराद्धान्तः । सांख्यं पूर्वमीमांसा च ईश्वरमनङ्गीकृत्याऽपि बन्धमोक्षविचारं प्रतिष्ठापयतः । यध्यप्यार्हतदर्शनं निराकरोतीश्वरं तथाऽपि नित्यात्मनाम् बन्धमोक्षसिद्धान्तं समर्थयति । एवं च भारतीयेषु दर्शनेषु ईश्वरवादापेक्षया आत्मतत्त्ववादैव प्राधान्यं समश्नुते ।

उपनिषत्सु चैतन्यं, चेतनः, प्रज्ञानं, परतत्त्वं इत्यादि शब्दाः आत्मतत्वमेव लक्षीकुर्वन्ति । भारतीयदर्शनेषु चैतन्य तत्त्वविचार एव शिखरायते । इतरे बहवो विषयाः वैशध्येन विचार्यमाणा अपि चैतन्यतत्त्वनिर्धारणोपायतामेव समश्नुवन्ति । मानवस्य तत्त्वविचारप्रवृत्तिः अव्याहता प्रवर्तते । सर्वत्र विचारे वैज्ञानिक दृष्टिः परिदृश्यते । विज्ञानक्षेत्रे संगणकाविष्करणेन महती प्रगतिः संप्रभूता । संगणकसिद्धान्त दृष्ट्याऽपि चैतन्यतत्त्वविचारः विज्ञानिनां प्रवृत्तिं समाकर्षति । अथाऽपि भौतिकदृष्टेः तत्र प्राधान्यात् आर्षदृष्टिप्रबोधः तत्र संसाध्योभवेद्वा इति संदेहाङ्कुरः संभवतीति परिभाव्यते ।

प्रकृते च, प्रबन्धसंकलनात्मके ग्रन्थे भारतीय दर्शनेषु प्रकाण्डपण्ड़ितानां

आत्मतत्वविषये तत्त्वबोधप्रदानिबन्धाः संकलिताः संतिष्ठन्ते । समग्रस्य भारतीय दर्शनस्य प्रबन्धानामेषामध्ययनेन करतलामलकवत् परिचयप्रकाशः प्रध्योतत इति महानस्माकं विश्वासपरः । सर्वेपीऽमे प्रबन्धरचयितारो महाविद्वांसः कृतज्ञतावचनपुष्पमालिकया समभिनंध्यन्ते ।

एतादृशस्य ग्रन्थरत्नस्य सुरभारत्यां प्रकाशनार्थं मार्गदर्शनं साहाय्यं च विदधतां भारतीयोच्चाध्ययन संस्थायाः (Indian Institue of Advanced Study - Shimla) महानिदेशकानाम् (Director) प्रा. वि.सि. श्रीवास्तवा महाशयानां विषये कृतज्ञतावचनततीर्वितरामि।

इति विदुषांवशंवदः
**एस्. रङ्गनाथः**
(ग्रन्थसम्पादकः)

# वैदिकवाङ्मये चैतन्यस्यावधारणा

डा. वीरेन्द्र कुमार मिश्रः

चित्शब्दात् ल्युट्प्रत्ययेकृते चेतनशब्दस्योत्प्रत्तिर्भवति । पुनश्च चेतनशब्दात् ष्यञ् प्रत्यये कृते चैतन्यशब्दस्योत्पत्तिर्भवति । अस्यार्थः परमात्मा, सर्वासां संवेदनानामादिस्रोतः[३] ।

निखिलेऽपिब्रह्माण्डे सर्वत्र चैतन्यस्य सत्ता एव प्रतिभाति । सर्वं चैतन्येनाधिष्ठितम्। उक्तं हि ऋग्वेदे यत् एकादशभिः रूद्रैः अहमेव चरामि, अष्टाभिः वसुभिः अहमेव चरामि, द्वादशादित्यैः अहमेव चरामि अपि च विश्वदेवैः अहमेव चरामि । मित्रावरुणौ उभौ अहमेव धारयामि । इन्द्राग्नी अप्यहमेव धारयामि । अहमेव धारयामि अश्विनौ। यथा -

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः ।

अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा[४] ॥ पुरुषसूक्तेऽपि उल्लिखितम् यथा - सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।

सभूमिं विश्वतो वृत्वाऽत्यतिष्टद्दशाङ्गुलम् ॥[५]

मन्त्रेऽस्मिन् परमेश्वरस्योल्लेखः प्राप्यते । सम्पूर्णसृष्टिरूपो विराडाख्यो यः पुरुषः परमात्मा सोऽयं सहस्रशिरोभिः युक्तः । सहस्रशब्दस्यात्र आशयोऽनन्तशिरोभिः युक्तः। सर्वेषाम् प्राणिनां यानि शिरांसि तानि सर्वाणि तस्य परमेश्वरस्यैव शिरांसि । सहस्राक्षीणि, सहस्रपादाः अपि परमेश्वरस्यैव सन्ति । सः पुरुषः (परमात्मा) निखिलब्रह्माण्डदेशमतिक्रम्य व्यवस्थितः । ब्रह्माण्डात् बहिरपि सर्वतो व्याप्तोऽस्ति ।

सर्वत्र परमेश्वरस्यास्तित्वमस्त्येव । विना चैतन्यं परमेश्वरं अस्य जगतः सत्ता न स्थास्यति । चैतन्यमेव परमात्मनः स्वरूपम् । ऋग्वेदे उल्लिखितं यथा -

पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥[६]

यदिदं वर्तमानं जगत् दृश्यते तत्सर्तं विराडाख्य पुरुषः एव । यच्च अतीतं जगत् यच्च भविष्यज्जगत् तदपि पुरुषरूपपरमात्मा एव । यथास्मिन् काले स्थितानिप्राणिशरीराणि तानि सर्वाणि विराट्पुरुषस्यावयवाः सन्ति तथैवातीतागामिनोरपि ।

सृष्टेरादौ न असत् आसीत् न सत् आसीत् । न लोकाः आसन् न आकाशः आसीत्। न गतिः आसीत् न स्थानमासीत् । न जन्म आसीत् न मृत्युरासीत् अमृतञ्च नासीत् । न दिवसः आसीत् न रात्रिः । सैव सर्व सामर्थ्यसम्पन्नः परमेश्वरः शान्तस्वरूपेणावस्थितः आसीत्। यथा -

नासदासीन्नो सदासीत् तदानीं नासीद्रजो नो व्योमा परो यत् ।
किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरम् ॥[७]
न मृत्युरासीदमृतं न तर्हि रात्र्या अह्न आसीत् प्रकेतः ।
आनीदवातं स्वधया तदेकंतस्माद्धान्यन्न परः किं चनास ॥[८]

शान्तस्वरूपे स्थिते परमेश्वरे कामनायाः प्रादुर्भावोऽभवत् सोऽकामयत बहु प्रजाप्रजायेयेति एकोऽहं बहुस्यामिति । तदापरमात्मनः सृष्टिरभवत् । उपनिषद्वाक्यमस्ति "तत् सृष्ट्वा तदेवानु प्राविशत् ".[९] इमां सृष्टिं निर्माय स्वयमेव प्रविश्य तत्रैव स्थितोस्ति। पुरूषसूक्तेऽपि उल्लिखितमस्ति यत् इयं सृष्टिः समग्र जगदस्य परमेश्वरस्य एकैव पादः अर्थात् चतुर्थोऽंशः ।

यथा - "पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि" ॥[१०]
त्रिपादूर्ध्व उदैत् पुरुषः पादोऽस्येहाभवत् पुनः ।[११]

एवं समग्रेयं सृष्टिः चैतन्यस्वरूपपरमेश्वरस्यैव । अस्मात् विराट् पुरुषादेव सूर्यचन्द्रान्तरिक्षद्युपृथिव्यादीनां लोकलोकान्तराणामुत्पत्तिरभवत् । यथा

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।[१२]

नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत ।

पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकाँ अकल्पयन्[१३]

पृथिवीमुपरि पशुपक्षिमानवपर्वतनद्यादीनां निर्मितिः तस्यैवास्ति ।

यथा – पशून् ताँश्चक्रे वायव्यानारण्यान् ग्राम्याश्च ये ।[१४]

तस्मादश्वा अजायन्त ये के चोभयादतः ।

गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः ॥[१५]

ब्राह्मणोऽस्य मुखमासी द्वाहू राजन्यः कृतः ।

ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥[१६]

यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः ।

यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥

इमे हिमवन्तः पर्वताः यस्य प्रजापतेः महत्त्वं माहात्म्यमैश्वर्यं कथयन्ति । नदीभिः सह समुद्रः यस्य परमात्मनः महत्त्वं प्रतिपादयति । यस्य इमाः प्रदिशः भुजवत्प्राधान्ययुक्तः प्रदिशः ऐश्वर्यं प्रतिपादयन्ति ।

परमेश्वरादेव आकाशस्योत्पत्तिरभवत् । आकाशाद् वायुः, वायोरग्निः, अग्नेः जलं, अद्भ्यः पृथिव्याः उत्पत्तिरभवत् । पृथिव्याः नानाविधौषधयः, ओषधीभ्योऽन्नमन्नान्मनुष्यः उत्पन्नः ।[१७]

इत्थमिदं स्पष्टं यदिदं जगत्सर्वं तत्सर्वं परमेश्वरादेव प्रादुर्भूतम् । अस्य स्थावरजङ्गमात्मकस्य जगतः स्थितिः तावदेव भवति यावत् जीवनं चैतन्येन अधिष्ठितं भवति। इत्थं चैतन्यस्य प्राणस्वरूपत्वमपि अस्ति । प्राणशब्दस्योत्पत्तिः प्र उपसर्गपूर्वकं अन् धातोः अच् घञ् वा प्रत्यये कृते भवति। प्राणशब्दस्यार्थः श्वासः, जीवनशक्तिः, आयुः, जीवनस्य मूलतत्त्वञ्च ।[१८]

सर्वं जगदिदं प्राणमयमस्ति। अथर्ववेदे एकस्मिन्मत्रे उल्लेखोऽस्ति यत् प्राणस्याधीनं जगत्सर्वम् तस्मै प्राणाय नमः । प्राणः सर्वेषामीश्वरोभवति । इदं सर्वं प्राणे एव

प्रतिष्ठितम्। यथा -

नमो प्राणाय यस्य सर्वमिदं वशे। यो भूतः सर्वस्येश्वरो यस्मिन्सर्वं प्रतिष्ठितम्॥[१९]

देवगणाः प्राणस्यानुगामिनो भूत्वा श्वसनकियां सम्पादमन्ति । मानवाः पशवश्च प्राणनक्रियया सचेष्टाः भवन्ति । प्राणः एव सर्वेषां जीवानामायुः । एवं प्राणः सर्वायुषं कथ्यते। यथा - "प्राणं देवा अनुप्राणन्ति । मनुष्याः पशवश्च ये। प्राणो हि भूतानामायुः। तस्मात्सर्वायुषमुच्यते" ।[२०]

प्राणैः सर्वाः ओषधयः तेजस्विनः भवन्ति, गर्भं धारयन्ति, विविधतया उत्पद्यन्ते प्रसरन्ति च । यथा - यत् प्राण स्तनयित्नुनाभिक्रन्दत्योषधीः ।

प्र वीयन्ते गर्भान् दधतेऽथोबह्वीर्विजायन्ते ॥[२१]

प्राणैः ओषधीनामायुः वर्धते । सुगन्धिमपि प्राणैरेव प्राप्नुवन्ति ।

यथा - अभिवृष्टा ओषधयः प्राणेन समवादिन् ।
आयुर्वै नः प्रातीतरः सर्वा नः सुरभीरकः ॥[२२]

अर्थात् ओषधिमुपरि जलवर्षानन्तरं जलेनाभिसिक्ताः ओषधयः प्राणेन सह सम्भाषयन्ति। भो प्राण ! त्वया अस्माकमायुः प्रवर्धितः । सुगन्धियुक्तमपि कृतम्।

प्राणः मृत्युरस्ति सः एव जीवनशक्तिः । देवाः अपि प्राणोपासनां कुर्वन्ति । सत्यवादी प्राणः उत्तमं लोकं गच्छति । यथा -

प्राणो मृत्युः प्राणस्तक्मा प्राणं देवा उपासते ।
प्राणो ह सत्यवादिनमुत्तमे लोक आदधत् ॥[२३]

प्राणः तेजोभिर्युक्तः प्राणः एव सर्वेषाम् प्रेरकः । एतदर्थमेव सर्वैः प्राणः उपास्यते। सूर्यश्चन्द्रप्रजापतिश्च प्राणाः एव सन्ति ।[२४]

प्राणापानौ व्रीहियवौ स्तः । वृषभः एव प्राणोऽस्ति । प्राणः यवे प्रतिष्ठितः अपानः व्रीहिः कथ्यते । यथा -

प्राणापानौ व्रीहि यवावनड्वान् प्राण उच्यते ।
यवे ह प्राण आहितोऽपानो व्रीहिरुच्यते ॥[२५]

प्राणः मातरिश्वा, वायुः । अतीतमनागतं वर्तमानञ्च प्राणाः एव सन्ति । प्राणे सर्वं प्रतिष्ठितम् । यथा -

प्राणमाहुर्मातरिश्वानं वातो ह प्राण उच्यते ।
प्राणे ह भूतंभव्यं च प्राणे सर्वं प्रतिष्ठितम् ॥[२६]

प्राणस्य प्रेरणया आथर्वणीः आङ्गिरसीः दैवीः मनुष्यकृता च ओषध्यः फलप्रदाः भवन्ति। यथा -

आथर्वणीराङ्गिरसीर्दैवीर्मनुष्यजा उत ।
ओषधयः प्रजायन्ते यदा त्वं प्राण जिन्वसि ॥[२७]

गर्भस्थजीवेषु प्राणापानक्रियां प्राणः एव सम्पादयति । प्राणस्य प्रेरणयैव जीवानामुत्पत्तिर्भवति । यथा -

अपानती प्राणति पुरुषो गर्भे अन्तरा ।
यदा त्वं प्राण जिन्वस्यथ संजायते पुनः ॥[२८]

प्राणस्य विषये ऐतेरेयारण्यके प्रतिप्रादितं यत् प्राणेनैव विश्वमिदं धार्यते । यथा प्राणस्यशक्त्या अयमाकाशः स्वस्थाने धार्यते तथा सर्वेषां प्रणिनाम् धारणं प्राणेनैवक्रियते । यथा -

"सोऽयमाकाशः प्राणेन बृहत्या विष्टब्धः तद्यथायमाकाशः प्राणेन बृहत्या विष्टब्धः। एवं सर्वाणि भूतानि आपिपीलिकाभ्यः प्राणेन बृहत्या विष्टब्धानीत्येवं-विद्यात् ।"[२९]

सर्वा ऋचः सर्वे वेदाः सर्वे घोषाव्याहृतिश्च प्राणः एवास्ति ।[३०] प्राणः एव अग्निः अस्ति । अन्नेनैव प्राणानामभिषेकः भवति । पशूनां प्राणोऽन्नमस्ति । प्राणः अन्नस्य रसोऽस्ति । प्राणोऽयमन्नरसमयो भवति । अन्नेनैव प्राणः धार्यते अन्यथा प्राणः शरीरं

त्यजति । यथा -

"प्राणोऽग्निः[३१] । प्राणो वा अन्नस्य रसः[३२] । अन्नमयो ह्यय प्राणः ।[३३]

प्राणाँश्वोत्सृजतीति ।[३४]"

प्राणस्य शक्तिः सूर्येऽस्ति । सैवशक्तिः द्युलोके प्रसरति । यदा वृष्ट्या सूर्यः पृथिव्या सह संयुज्यते तदा सूर्ये द्युलोके च सन्निहिता प्राणशक्तिः वृष्टिजलमाध्यमेन पृथिवीमागच्छति। यथा -

"जगता सिन्धुं दिव्यस्तभायद् रथन्तरे सूर्यं पर्यपश्यत् ।

गायत्रस्य समिधस्तिस्त्र आहुस्ततो मह्ना प्ररिरिचे महित्वा ॥"[३५]

शतपथब्राह्मणे प्राणस्यार्कस्वरूपत्वं मधुस्वरूपत्वञ्चोक्तम् ।[३६]

ननु यदा प्राणं सर्वमस्ति तदा अस्योत्पत्तिः कथमभवत् ? अस्य कतिप्रकाराः सन्ति? शरीरेऽयं कुत्र तिष्ठति ? अनेके प्रश्नाः उपस्थिताः भवन्ति ।

यथा स्थावरजङ्गमात्मकस्य जगतः उत्पत्तिः परमेश्वरादभवत् तथैव प्राणस्योत्पत्तिः परमेश्वरादेवाभवत् । मुण्डकोपनिषदि उल्लेखः प्राप्यते यदक्षरपुरुषात् प्राणः मनः, सर्वाणीन्द्रियाणि आकाशः, वायुः, ज्योतिः, जलं निखिलजगतः धारिणी पृथिवी चोत्पन्ना अभवत् ।[३७]

तस्मात्पुरुषात् सप्तप्राणाः (नेत्रद्वयं, श्रोत्रद्वयं, घ्राणद्वयं, एकारसना) उत्पन्नाः भवन्ति । सप्तेन्द्रियाणां सप्तवृत्तयः स्व एव विषयान् प्रकाशयन्ति । इमान्सप्तप्राणान् परमात्मा विधाता सर्वेषां प्राणिनां शरीरे स्थापयति । यथा सप्त प्राणाः प्रभवन्ति तस्मात् सप्तार्चिषः समिधः सप्तहोमाः ।

सप्तइमे येषु चरन्ति प्राणा गुहाशया निहिताः सप्त सप्त ॥[३८]

"यथैषा पुरुषे छायैतस्मिन्नेतदाततं मनोकृतेनायात्यस्मिञ्शरीरे ।"[३९] अर्थात् यथा मानवशरीरात् छायायाः उत्पत्तिर्भवति तथैवास्मिनात्मनि प्राणस्य व्याप्तिरस्ति । मनसः सङ्कल्पेन शरीरे प्राणः आगच्छति। चैतन्यस्य प्रभावोऽपि अस्मिन् समये शरीरे

दृश्यते ।

प्राणशब्दस्य प्रयोगः इन्द्रियार्थेऽपि कृतः । छान्दोग्योपनिषदि संवर्गविद्यायाः उपदेशे रैक्वस्य कथनमस्ति यत् इमौ द्वावेव संवर्गौ स्तः । प्रथमो देवेषु वायुः द्वितीयः इन्द्रियेषु प्राणः ।[४०] अत्र प्राणः इन्द्रियार्थे ग्रहीतः । अस्यामुपनिषदि अपरस्मिन् स्थले उक्तं यत् प्राणः (इन्द्रियं) अहं श्रेष्ठोऽहं ग्रेष्ठोऽस्मि एवं विवादमकरोत्[४१] प्राणः इन्द्रियार्थे सत्यपि प्राणः प्रमुखो भवति ।

प्रश्नोपनिषदि[४२] एकाख्यायिकामाध्यमेन पस्तुतं यत् "विदर्भ देशीयभार्गवेन पिप्पलादमुनिःप्रष्टः यत् कति देवताः इमां प्रजां धारयन्ति ? केके देवाः प्रकाशयन्ति? के च तेषु सर्वश्रेष्ठाःसन्ति ? पिप्पलादमुनिरकथयत् - स : देवः आकाशः । वायुरग्निः जलं, पृथिवी, वाक् (सर्वाणि कर्मेन्द्रियाणि), मनः (अन्तकरणं), चक्षुः श्रोत्रञ्च (सर्वाणिज्ञानेन्द्रियाणि) सर्वे देवाः सन्ति । सर्वे स्व महिमानं प्रकाशयन्तः कथयन्ति यत् अस्माकं सर्वेषामाश्रयः शरीरमेवास्ति । तस्मिन् समये एकदा सर्वश्रेष्ठः प्राणः तान् प्रत्यब्रवीत् - त्वं मोहम् मा गच्छ। अहं स्वयमेवात्मानं पञ्चधा विभज्य शरीरमिदं धारयामि । किन्तु ते तं प्रति विश्वासं न कृतवन्तः । एवम् प्राणः उत्क्रमितुमारब्धवान्। प्राणे उत्क्रममाणे तेसर्वे उत्क्रमितुमारब्धवन्तः। प्राणे स्थिते सर्वे स्थितवन्तः । एवं प्राणस्य प्राधान्यं सिद्धमभवत् । इत्थं प्राणः सर्वमभवत् । प्राणःस्वाग्निरुपे तपति । सूर्यः मेघः इन्द्रः वायुः, देवः, पृथिवी, रयिः सदसदमृतञ्च सर्वं प्राणः एव ।[४३]

एवं प्राणस्य श्रेष्ठत्वम् अन्योपनिषत्स्वपि सम्यक्तया प्रादिपादितम् ।[४४] अस्मिन्नेव सन्दर्भेपिप्पलादऋषिः प्राणं सम्राट्वत् कथितवान् । यथा कोऽपि राजा स्वाधिकारिजनान् पृथक् - पृथक् नियोजयति तथा प्रमुखः प्राणः अन्य प्राणान् (इन्द्रियाणि) पृथक्-पृथक्रूपेण तेषु तेषु स्थानेषु स्थापयति ।[४५]

प्राणः सर्वासु नाडीषु पृथक्पृथक्रुपेण सञ्चरति । प्राणापानव्यानोदानसमान-नाग-कूर्म-देवदत्त - कृकर - धनञ्जयादयः प्राणस्य विविधानिरुपाणि सन्ति । एषु प्राणस्य पञ्च प्रकाराः प्राणापानव्यानोदानसमानादयश्च प्रमुखाः सन्ति ।[४६] प्राणः

पायुपस्थयोः मध्ये अपानं नियोजयति । मुखनासिकाभ्यां बहिःआगच्छन् प्राणः चक्षुःश्रोत्रे स्वयमेव तिष्ठति । मध्ये समानः भवति । समानः वायुः भुक्तान्नं समभावेन शरीरे सर्वत्र प्रेषयति ।[४७]

व्यानः श्रोत्रे नेत्रे कण्ठे स्कन्धे जानौ तिष्ठति । उभयोः हस्तयोः पादयोः उदानवायुः सञ्चरति । नागादीनां पञ्चवायूनां सञ्चारः त्वगस्थ्नोः मध्ये भवति । शरीरस्य सर्वासां क्रियाणामाधारः प्राणःएवास्ति ।

प्रश्नोपनिषदि प्राणस्य स्तुतिं कुर्वता उक्तं यत् हे प्राण ! त्वमेव प्रजापतिः, त्वमेवगर्भे सञ्चरसि, त्वमेव जन्म गृह्णासि, त्वमेव सर्वैः इन्द्रियैः सह प्रतितिष्ठाति। त्वमेव देवेभ्यः वह्नितमः, त्वमेव पितृभ्यः स्वधा, अथर्वाङ्गिरस - ऋषिभ्यः सत्याचरणमसि ।[४८] प्राणः एवज्योतिर्गणस्याधिपतिः सूर्यः, सः एव अन्तरिक्षे - सञ्चारी ।[४९] इदं ब्रह्म एव प्राणः । आब्रह्मन् स्थावरपर्यन्तसर्वेषु भूतेषु भासतेऽयं प्राणः ।[५०] प्रलयकाले सर्वे प्राणिनः प्राणमेवाभिसंविशन्ति उत्पत्तिसमये प्राणादेवोत्पद्यन्ते ।[५१] एवं प्राणस्य ब्रह्मस्वरूपत्वमस्ति ।[५२] छान्दोग्योपनिषदि अन्यत्रोपलभ्यते यदयं प्राणः ब्रह्मणश्चतुर्थः पादोऽस्ति ।[५३]

महर्षियाज्ञवल्क्यः महाराजजनकमुपदिशन् कथयति - हे राजन् । प्राण एव ब्रह्म । यः एवं जानन् प्राणरूपब्रह्मणः उपासनां करोति प्राणाः तं परित्यजन्ति।[५४] बृहदारण्यकोपनिषदि प्राणस्वरूपब्रह्मणः अष्टौ भेदाः उल्लिखिताः । यथा - अमृतं, स्त्री, सत्यम्, दिशः, मृत्युः असुः, वरुणः, प्रजापतिः ।[५५]

प्राणस्य ब्रह्मस्वरूपत्वे सति शङ्काजायते यदि प्राणस्य ब्रह्मस्वरूपत्वमस्तितत्कथं ब्रह्मणः उत्पत्तिः सम्भवति ? ब्रह्मणः उत्पत्तिम्न न भवति न च मृत्युः । किन्तु प्राणस्योत्पत्तिरक्षर ब्रह्मणः भवति ।[५६] सन्दमऽस्मिन् प्रामाणिकमप्रामाणिकं किमस्ति ?

उपनिषत्सु ये ये विषयाः वर्णिताः तेषामप्रामाणिकत्वं न भवति । साक्षात्कर्तृणामृषीणां किमपि कथनमशुद्धमप्रामाणिकं निराधारं परस्परविरोधि

नास्ति । अस्माकमृषिभिः यथा दिव्यदृष्ट्या सूक्ष्मातिसूक्ष्म तत्त्वानां यत् प्रतिपादनं कृतं तदशुद्धमप्रामाणिकं परस्परविरोधि निराधारं कथमपि भवितुं न शक्यते ।

सूक्ष्म दृष्ट्योपनिषत्साहित्यस्याध्ययनेनैतादृशीनां भ्रान्तीनां सम्यक्तया निराकरणं भवति । उपनिषत्सु यस्य प्राणब्रह्मणः उल्लेखः प्राप्यते तद् हिरण्यगर्भवैश्वानरसंज्ञकं वा ब्रह्मास्ति । अस्य तथ्यस्य स्पष्टीकरणं कुर्वताचार्यशङ्करेणोक्तं "या सर्व देवतामयी सर्व देवतात्मिका प्राणेण हिरण्यगर्भरूपेण परस्माद्ब्रह्मणः सम्भवति ।[५७] अर्थत् यासर्वदेवतामयी सर्वदेवस्वरुपादितिः प्राणेन हिरण्यगर्भरूपेण परब्रह्मणः उत्पद्यते । पश्नोपनिषत्भाष्ये आचार्यशङ्करेण प्राणं हिरण्यगर्भनाम्नोक्तः - यथा "सः पुरुष उक्तप्रकारेणेक्षित्वा प्राणं हिरण्यगर्भाख्यं सर्व प्राणिकरणाधारम् अन्तरात्मानमसृजत सृष्टवान् ।"[५८] अर्थत् सह पुरुषः उक्त प्रकारेण दृष्ट्वा हिरण्यगर्भसंज्ञकं प्राणं सर्वेषां प्राणिनामाधाररुपमात्मानं निर्मितवान् । प्राणस्य वैश्वानरस्वरूपत्वमपि भवति । सोऽयं (भोक्ता) वैश्वानरः विश्वरूपाग्निरेव प्रादुर्भवति ।[५९]

इत्थं प्राणः प्रजापति - हिरण्यगर्भ - वैश्वानररूपेणास्ति । एताति सर्वाणि रुणाणि ब्रह्मणि ब्रह्मणः एव सन्ति । अनेनैव कारणेन प्राणः सृष्टिकर्ता, पालनकर्ता, संहारकर्ता ब्रह्मवत् कल्पितः । एवं प्राणस्य विषये एतादृशं कथनं तस्य ब्रह्मणः रूपे प्रतिपादनं प्राणस्य महिमानं प्रतिपादयति । प्रश्नोपनिषदि प्राणस्य महिमानं प्रतिपादयता कथितं यदस्मिन्लोके स्वर्गे च या उपभोगस्य सामग्री प्राप्यते सा प्राणाधीनास्ति । माता यथा पुत्रान् रक्षति तथैव त्वं मां रक्ष । ब्राह्मणक्षत्रिययोश्च विभूतयः प्रज्ञाश्चापि तवाधीनाः सन्ति । ताः विभूतिः प्रज्ञाश्च मह्यं देहि ।[६०]

प्राणरूपब्रह्मणः उपासनाफलमप्युक्तमुपनिषत्सु । बृहदारण्यकोपनिषदि उल्लिखितमस्ति यत् हे सम्राट् । प्राण एव परब्रह्म । ये एवं विधं ज्ञात्वोपासते प्राणः तान्न परित्यजति ।[६१] प्राणरूपौङ्कारब्रह्मोपासकः कामनाभिः पूर्णो भवति ।[६२] प्राणोपासको यो विद्वान् प्राणं जानाति तस्य प्रजा विनाशं न प्राप्नोति ।[६३] प्राणोपासकः पूर्णायुष्यं प्राप्नोति ।

प्राणतत्त्वस्य विषये सत्यकाम जाबालिः वैयाघ्रपद्यगोश्रुतिमकथयत् यदि शुष्कं स्थाणुं प्रति प्राणदर्शनस्यास्य कथनं भवतु तत्तु तस्मिन् स्थाणौ प्राणसञ्चारः भविष्यति, शाखापलाशपत्रादीनामुत्पत्तिर्भविष्यति ।[६४] जीवित पुरुषाय किं कथनं स्यात् ?

प्राणोपसनया सत्यनिष्ठपुरुषस्य योग्यता वर्धते । प्राणस्य स्थैर्येण मनः शान्तं भवति, एकाग्रता आयाति । प्राणस्य चाञ्चल्येनैकाग्रता नश्यति मनः अशान्तिं प्राप्नोति। देवताः अपि प्राणमुपासाते । प्राणः सत्यवादिनं पुरुषं उत्तमान् लोकान् गमयति । भूतभव्यवर्तमानकालीनाः सर्वेपदार्थाः प्राणे एव तिष्ठन्ति । प्राणे एव सर्वं प्रतिष्ठितं भवति । यथा -

प्राणं देवा उपासते । प्राणो ह सत्यवादिनमुत्तमे लोक आदधत् ॥[६५]
प्राणो ह भूतं भव्यं च प्राणे सर्वं प्रतिष्ठितम् ॥[६६]

प्राणः अन्नेन सह सम्बध्यते । अन्नेन प्राणं वर्धस्व । यथा - "प्राणमन्नेनाप्यायस्व ।"[६७] अन्नेन प्राणस्य शक्तिर्वर्धते । अन्नेनात्र सात्त्विकमन्नं विवक्षितम् । समुचितान्नभक्षणेनायुष्यस्य वर्धनं भवति । अनुचितान्नं पदार्थं वा जघ्वामान्त्रणं कुर्वन्ति रोगाणांजनाः । एवं प्राणोपासकाः समुचितसात्त्विकान्नं भक्षयन्ति । इत्थं रक्षितः प्राणः सर्वं कम्पमानं रक्षति । यथा - "प्राणो रक्षति विश्वमेजत् ।"[६८] प्राणशक्तिः सर्वासां शक्तीनां श्रेष्ठतमा शक्तिरस्ति । यजुर्वेदे उल्लेखः प्राप्यते यत् - यज्ञेनास्माकं प्राणः वर्धताम्। यथा - "प्राणो यज्ञेन कल्पताम्।"[६९] प्राणो हविस्वरूपमस्ति यथा - "प्राणो हविः ।"[७०]

तावत्कालपर्यन्तं हि आयुर्भवति यावत्कालपर्यन्तं प्राणाः प्राणिनां शरीरे निवसन्ति । इत्थं प्राणः आयुष्यश्च समानमर्थं प्रतिपादयतः । प्राणिनामायुः प्राणएवास्ति । यथा - प्राणोहिभूतानामायुः ।[७१]

प्राणस्य प्रेरकः कः केन नियुक्तः प्राणः चलति । यथा - केन प्राणः प्रथमः प्रैति युक्तः ।[७२] अस्य प्रश्नस्योत्तरे प्रश्नोपनिषदि उल्लेखोऽस्ति । यथा - स उ प्राणस्य-प्राणः ।[७३] आत्मा प्राणस्य प्राणोस्ति आत्मैव प्राणस्य प्रेरको भवति । यस्य जीवनं प्राणेन न भव त्यपितु येत प्राणस्य जीवनं भवति तद् ब्रह्मआत्मास्ति । यथा -

यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते ।

तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥[७४]

आत्मनः शक्त्या प्राणः स्वकार्यं करोति । योऽयं प्राणस्यान्तःस्थितः पुरुषोऽहमेवास्मि ।[७५] अहमात्मास्मि । मां परितः प्राणः उपस्थितोस्ति । बृहदारण्यकोपनिषद्यपि एषः भावः प्रतिपादितः ।[७६]

आत्मनः इच्छाशक्त्या नासिकायां छिद्रद्वयमभवत् । ततः प्राणोऽभवत् । प्राणाद् वायुरभवत् । यथा - नासिके निरभिध्येतां नासिकाभ्यां प्राणः प्राणाद्वायुः ।[७७] ऐतरेयोपनिषदि[७८] एवापरस्मिन् स्थाने उल्लेखोऽस्ति यत् - वायुः प्राणो भूत्वा नासिकायाः रन्ध्रद्वयं प्रविष्टवान् ।

प्राणः रं भवति यतः सर्वाणि भूतानि प्राणे रमन्ते ।[७९] प्राणः उक्थं यतः प्राणः सर्वानुत्थापयति ।[८०] प्राणः यजुरस्ति यतः प्राणे इमे सर्वे प्राणिनः संयुज्यन्ते ।[८१] प्राणः सामरूपोऽस्ति प्राणे हि सर्वाणि भूतानि सम्यक्रीत्या तिष्ठन्ति ।[८२] प्राणः क्षत्रमस्ति यतः प्राणः एव क्षतात् व्यष्टात् त्रायते ।[८३] अत्र प्रत्येकं मुख्यः शब्दः प्राणस्य शक्तिं प्रतिपादयति ।

न केवलं प्राणिनां शरीरे एव प्राणसञ्चारेण जीवनं दृश्यते अपितु अङ्गेष्वपि प्राणसंचारेणैव जीवनं भवति । यस्मिन्नवयवे प्राणस्य गमनागमनं नानुभूयते सोऽवयवःकार्यसम्पादनायासमर्थो भवति, शून्योभवति । एवम् प्राणः शरीरावयवानां कृते जीवनाधारभूतो रसोऽस्ति । बृहदारण्यकोपनिषदि अस्यवर्णनमुपलभ्यते यथा -

आङ्गिरसोऽङ्गानां हि रसः प्राणो या अङ्कानां रसः प्राणो हि वा अङ्गानां रसस्तस्माद्यस्मात्कस्माच्चाङ्गात्प्राण उत्क्रमति तदेव तच्छुष्यत्येष हि वा अङ्गानां रसः ।[८४]

प्राणः एवाङ्गानां रसः । यस्मादङ्गात् प्राणः निष्क्रामति तदङ्गं शुष्यति नीरसं भवति। इयं स्थितिः न केवलं प्राणिनां शरीरस्यास्ति । वृक्षाणामप्येतादृश्येव स्थितिः भवति । वृक्षाणामपि यस्मिन् भागे प्राणरूपो रसो न विद्यते सः भागोऽपिशुष्यति ।

आत्मनः इच्छाशक्त्यैव प्राणः शरीरस्य सर्वेष्वङ्गेषु प्राणस्वरूपं रसं सञ्चारयति ।

आत्मनः प्रेरणा प्राणो भवति । प्राणेन मनः संयुज्यते । मनसेच्छाशक्तिः विनियम्यते । इच्छाशक्त्या रक्ते परिणामो भवति तदनन्तरमेव सर्वस्मिन् शरीरेऽभीष्टकार्यं भवति । यथा -

पुरुषस्य प्रयतो वाङ्मनसि संपद्यते, मनः प्राणे, प्राणस्तेजसि, तेजः परस्यां देवतायाम् ।[८५]

पुरुषस्य वाङ्मनासि मनः प्राणे, प्राणः तेजसि, तेजः परस्यां देवतायाम् अर्थात् आत्मनि प्रशाम्याति ।

यदा प्राणः स्वपिति तदा वाङ्मनश्चक्षुःश्रोत्रादीनि सर्वाणि प्राणमेव गच्छन्ति । यथा - प्राणो वाव संवर्गः । स यदा स्वपिति प्राणमेव वागप्येति, प्राणं चक्षुः, प्राणं श्रोत्रं, प्राणं मनः, प्राणो ह्येवैतान् संवृक्त इति ।[८६]

यथा सूर्योदयकाले सूर्यस्य रश्मयः प्रसरन्ति अस्तङ्गते च तस्य रश्मयस्तस्मिन्नेव प्रलीयन्ते । एवमेव यदा प्राणः जागर्ति तदा तस्य रश्मयः इन्द्रियादिषु प्रसरन्ति । प्राणस्य निद्राकाले प्राणमेव समाविशन्ति । एतादृशीस्थितिः अस्ति प्राणस्य । प्राणं विनाजगतः अस्तित्वं न स्थास्यति ।

इत्थं प्राणः ब्रह्मस्वरुपात्मकमस्ति । निखिल स्थावरजङ्गमात्मकजगति यज्जीवनं संदृश्यते तत्सर्वं चैतन्येनैवाधिष्ठितम् । चैतन्यरूपप्राणब्रह्मणा जीवनं प्रदाय तस्य सञ्चालनं क्रियते। अखिलेऽपि ब्रह्माण्डे पर ब्रह्मणःशक्तिं विना किञ्चिदपि भवितुं न शक्यते । सर्वत्र तस्यैव सत्तायाः दर्शनं भवति । सत्यमेवोक्तम् यथा -

न तत्र सूयो भाति न चन्द्रतारकं
नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदं विभाति ॥[८७]

१. आत्मा, जीवः, ब्रह्म, परमात्मा । वी.एस. आप्टे - संस्कृत-हिन्दी कोशः तृतीयसंस्करणम् - १९७३, पृ.सं. ३८०

२. सजीवः, आत्मा, परमात्मा । वी.एस. आप्टे - संस्कृत-हिन्दी कोशः
१९७३, पृष्ठसं. - ३८६

३. वी.एस. आप्टे - संस्कृत-हिन्दी कोशः पृ.सं. ३८७, १९७३

४. ऋग्वेदः १०.१२५.१; यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयते वा ।

५. ऋग्वेदः १०.९०.१ अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ।
तैत्तिरीयारण्यकम् - १०.१३.५
यजुर्वेदः ३१.१

६. ऋग्वेद : १०.९०.२; यजुर्वेदः ३१.२

७. ऋग्वेद : १०.१२९.१

८. ऋग्वेद : १०.१२९.२

९. तैत्तिरीयोपनिषद् - ३.६

१०. ऋग्वेदः - १०.९०.३; यजुर्वेदः ३१.३

११. ऋग्वेदः - १०.९०.४; यजुर्वेदः ३१.४

१२. ऋग्वेदः - १०.९०.१३; यजुर्वेदः ३१.१२; "सूर्याचन्द्रमसौ धाता
ऋग्वेदः - १०.९०.१४; यजुर्वेदः ३१.१३ यथा - पूर्वमकल्पयत्
दिवं च पृथिवीं च

१४. ऋग्वेदः - १०.९०.०; यजुर्वेदः ३१.६ अन्तरिक्षमथो स्वः।"

१५. ऋग्वेदः - १०.९०.१०; यजुर्वेदः ३१.८, महानारायणोपनिषद् ५.७

१६. ऋग्वेदः - १०.९०.१२; यजुर्वेद ३१.११

१७. तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् । अन्नात् पुरुषः । स वा एष पुरुषोऽन्नरसमयः । तैत्तिरीय-आरण्यकम् ८.२.३ तैत्तिरीयोपनिषत् २.१

अन्नाद्वै प्रजाः प्रजायन्ते । ...... अथो अन्नेनैव जीवन्ति । .... अन्नँहि भूतानां ज्येष्ठम् । तस्मात्सर्वौषधमुच्यते । तैत्तिरीयारण्यकम् ८.२.१

१८. वी. एस. आप्टे - संस्कृत-हिन्दी कोशः पृष्ठसंख्या ६८७, तृतीय संस्करणम् १९७३, मोतीलालबनारसीदासः दिल्ली ।

१९. अथर्ववेदः ११.४.१

२०. तैत्तिरीयारण्यकम् ८.३.१, तैत्तिरीयोपनिषद् - २.३

२१. अथर्ववेदः - ११.४.३

२२. अथर्ववेदः - ११.४.६

२३. अथर्ववेदः - ११.४.१

२४. प्राणोविराट् प्राणो देष्ट्री प्राणं सर्व प्राणः उपासते ।
प्राणो ह सूर्यश्चन्द्रमाः प्राणमाहुः प्रजापति ॥ अथर्ववेदः ११.४.१२

२५. अथर्ववेदः - ११.४.१२

२६. अथर्ववेदः - ११.४.१५

२७. अथर्ववेदः - ११.४.१६

२८. अथर्ववेदः - ११.४.१४

२९. ऐतरेय आरण्यकम् - २.१.६

३०. सर्वाऋचः, सर्वे वेदाः, सर्वे घोषा, एकैव व्याहृतिः प्राणः एव प्राण ऋच
इत्येव विद्यात् । मैत्रायणी आरण्यकम् - २.२.१०

३१. मैत्रायणी आरण्यकम् - ६.९

३२. मैत्रायणी आरण्यकम् ६.१३

३३. मैत्रायणी आरण्यकम् ६.११

३४. तदेव

३५. ऋग्वेदः १.१६४.२५

३६. प्राणो वै अर्कः - शतपथब्राह्मणम् - १०.४.१.२.३
प्राणो वै मधुः - शतपथब्राह्मणम् - १०.४.१.२३

३७. एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥ मुण्डकोपनिषद् २.१.३

३८. मुण्डकोपनिषद् २.१.३

३९. प्रश्नोपनिषद् ३.३

४०. "तौ वा एतौ द्वौ संवर्गो वायुरेव देवेषु प्राणः प्राणेषु ।" छान्दोग्योपनिषद् ४.३.४
प्राणःचक्षु प्राणं श्रोत्रं प्राणंमनः प्राणो ह्येवैतान्सर्वासंवृक्त इति । छान्दोग्योपनिषद् ४.३.३

४१. "अथ ह प्राणा अहंश्रेयसि व्यूदिरेऽहं श्रेयानस्म्यहं श्रेयानस्मीति ।" छान्दोग्योपनिषद् ५.१.६

४२. प्रश्नोपनिषद् २.२.४

४३. एषोऽग्निस्तपत्येषसूर्य एष पर्जन्यो मधवानेषवायुः एष पृथिवी रयिर्देवः सदसच्चामृतं च यत् । प्रश्नोपनिषत् २.५

४४. छान्दोग्योपनिषत् - ५.१.१२; बृहदारण्यकोपनिषत् ६.१.१३; ६.१.१,७

४५. "यथा सम्राडेवाधिकृतान्विनियुङ्क्त एतान्ग्रामानेतान्ग्रामानधितिष्ठस्वेत्येवमेवैष प्राण इतरान्प्रांणान्पृथक्पृथगेव संनिधत्ते" । प्रश्नोपनिषत् ३.४

४६. "प्राणोऽपानोव्यान उदानः समानोऽन इत्येतत्सर्वं प्राणा ।" बहदारण्यकोपनिषत् - १.५.३

"पञ्च प्राणोर्मिं पञ्चबध्यादिमूलाम् "। श्वेताश्वतरोपनिषद् १.५

४७. "पायूपस्थेऽपानं चक्षुः श्रोत्रे मुखनासिकाभ्यां प्राणः स्वयं प्रातिष्ठते मध्ये त समानः, एष ह्येतद्धुतमन्नं समं नयति ।" प्रश्नोपनिषत् - ३.५

४८. "प्रजापतिश्चरसि गर्भे त्वमेव प्रतिजायते । तुभ्यं प्राणप्रजास्त्विमा बलिं हरन्ति यः प्राणैः प्रतितिष्ठति । देवानामसि वह्नितमः पितृणां प्रथमास्वधा । ऋषीणां चरितं सत्यमथर्वाङ्गिरसामसि ।" - प्रश्नोपनिषद् २.७.८

४९. प्रश्नोपनिषद् २.९

५०. प्राणो ह्येष यः सर्वभूतैर्विभाति । - मुण्डकोपनिषद् ३.१.४

५१. प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते । छान्दोग्योपनिषद् - १.११.५

५२. सहोवाच विजानाम्यहं यत्प्राणो ब्रह्म । छान्दोग्योपनिषद् ४.१०.५

५३. प्राणः एव ब्रह्मणश्चतुर्थः पादः । - छान्दोग्योपनिषद् - ३.१८.४

५४. प्राणो वै सम्राट् परमं ब्रह्म नैनं प्राणो जहाति । बृहदारण्यकोपनिषद् - ४.१.३

५५. बृहदारण्यकोपनिषद् - ३.९.१० - १७

५६. एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्यधारिणी ॥ मुण्डकोपनिषद् २.१.३

५७. कठोपनिषद् - द्वितीयोऽध्यायः मन्त्र संख्या ७ (शाङ्करभाष्यम्)

५८. प्रश्नोपनिषद् (शाङ्करभाष्यम्) ६.४

५९. स एष वैश्वानरो विश्वरूपः प्राणोऽग्निरूदयते ।
प्रश्नोपनिषद् (शाङ्करभाष्यम्) - १.७

६०. प्राणस्येदं वशे सर्वं त्रिदिवे यत्प्रतिष्ठितम् ।

मातेव पुत्रान्रक्षस्व श्रीश्च प्रज्ञां च विधेहि न इति । प्रश्नोपनिषद् २.१३

६१. प्राणस्य वै सम्राट् कामायायाज्यं ...... प्राणो वै सम्राट् परमं ब्रह्म नैनं प्राणो जहति । बृहदारण्यकोपनिषद् - ४.१.३

६२. आगाता ह वै कामानां भवति एतदेवं विद्वानक्षरमुद्गीथमुपास्त इत्यध्यात्मम्। छान्दोग्योपनिषद् १.२.१४

६३. य एवं विद्वान् प्राणं वेद न हास्य प्रजा हीयतेऽमृतो भवति तदेष श्लोकः ॥ - प्रश्नोपनिषद् - ३.११

६४. तद्धैतत्सत्यकामो जाबालो गोश्रुतये वैयाघ्रपद्यायोक्त्वोवा यद्यप्येनच्छुष्काय स्थाणवे--पुरोहेयुः

६५. पलाशानीति ॥ छान्दोग्योपनिषद् ५.२.३

६६. अथर्ववेदः ११.४.११

६७. ११.४.१५

६८. तैत्तिरीयब्राह्मणम् - १०.३६.१

महानारायणोपनिषद् - १६.१

६९. तैत्तिरीयब्राह्मणम् - २.५.११

७०. यजुर्वेदः - ९.२१; १८.२९; २२.२३

७१. मैत्रायणी संहिता - १.९.१; तैत्तिरीयारण्यकम् - ३.१.१

७२. तैत्तिरीयारण्यकम् - ८.३.१; तैत्तिरीयोपनिषद् - २.३.१

७३. प्रश्नोपनिषद् - १.१

७४. केनोपनिषद् - १.१

७५. केनोपनिषद् - १.९

७६. योऽसावसौ पुरुषः सोहमस्मि । - ईशावास्योपनिषद् - १६

योऽसावादित्ये पुरुषः सोऽसावहम् । यजुर्वेदः ४०.१७

७७. यः प्राणे तिष्ठन्प्रषादन्तरो यं प्राणो न वेद यस्य प्राणः शरीरं प्राणमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः । बृहदारण्यकोपनिषद् - ३.७.१६

७८. ऐतरेयोपनिषद् १.१.४

७९. प्राणो वैरं प्राणे हीमानि सर्वाणि भूतानि रमन्ते । बृहदारण्यकोपनिषद् - ५.१२.१

८०. उक्थं प्राणो वा उक्थं प्राणो हीदं सर्वमुत्थापयति । बृहदारण्यके प. ५.१३.१

८१. यजुः प्राणो वै यजुः प्राणे हीमानि सर्वाणि भूतानि युज्यज्ते । बृहदारण्यके ५.१३.२

८२. साम प्राणो वै साम प्राणे हीमानि सर्वाणि भूतानि सम्याश्चि । बृहदारण्यके ५.१३.३

८३. क्षत्रं प्राणो वै क्षत्रं प्राणो हि वै क्षत्रं त्रायते । बृहदारण्यकोपनिषद् - ५.१३.४

८४. बृहदारण्यकोपनिषद् - १.३.१९

८५. छान्दोग्योपनिषद् - ६.८.६

८६. छान्दोग्योपनिषद् - ४.३.३

८७. मुण्डकोपनिषद् २.२.११

# उपनिषत्सु चैतन्यम् ।

प्रो. शेषाचल शर्मा

जगति सर्वोऽपि जन्तुर्जायते म्रियते च । जन्ममरणमध्यपतितः सर्वोऽपि व्यापारः पशूनां मनुजानां च समान एव वरीवर्ति । अथापि मनुजेषु पश्वतिशायी कच्चिद् विशेषो वर्तत इति सर्वतत्त्वज्ञसंप्रतिपन्नोयंऽ विषयः । "ज्ञानं हि तेषामाधिको विशेषः" इति वचनात् पशुमतिरिच्य ज्ञानमात्रेण विराजते मनुजः । तादृशज्ञानरहितस्तु मनुजः सर्वथा पशुतुल्य एव विभाव्यते । तादृशज्ञानप्राप्तिमात्रेण मानवजन्म सार्थकं भवतीति निश्चप्रचम् । तादृशं च ज्ञानं किमिति किंचिद् विचारयामः ।

सर्वोऽपि मानवोऽहमित्यात्मानमात्मभिन्नं चेदमिति प्रत्येति । कदाचिदितरेतरभावाध्यारोपेणापि व्यवहरति । तत्राहमितिप्रतीयमानं तत्त्वं किमिति विषये तत्वान्वेषणधिषणानां नैकमत्यं दरीदृश्यते । तत्र पृथिव्यादिभूतचतुष्टयसंयोग-संजायमानचैतन्ययुक्तं शरीरमेवात्मानं मन्यन्ते लोकायतिकत्वेन प्रख्याताश्चार्वाकाः । तदन्तर्गता एव केचित् इन्द्रियमारभ्य मनः पर्यन्तं शेमुषीं प्रसार्य यथायोगं इन्द्रियादिकमेवात्मत्वेन सम्भावयन्ति । विचारपरम्परारोहणेन बहुदूरं गता अपि किंचिदपि तत्त्वमलभमानाः केचन बौद्धाभिमानिनः शून्यमेवात्मतत्त्वमिति संगिरन्ते। तदसहमानास्तदीया एव कतिचन सौगताः क्षणिक विज्ञानमेकमेव तत्त्वं मन्यमानाः आत्मतत्त्वं तद्रूपमेवामनन्ति। भोक्तैव केवलमात्मा न कर्तेति सांख्याः संलपन्ति । कर्तारं भोक्तारं चात्मानं प्रवदन्ति तार्किकरसिकाः । योगिनस्तार्किकाश्चात्मनं परमात्मानं चाङ्गीकुर्वन्ति । एवमेवान्येऽपि यथामतिविभवमात्मान - मामनन्ति । औपनिषदविचारस्तु आत्मतत्त्वविषये सर्वातिशायी शोभते। निरुपहितपरिशुद्धचैतन्य-मेवात्मेति उपनिषदामप्रतिहतः परमसिद्धान्तः ।

## उपनिषच्छब्दार्थः ।

उपनिषत्, वेदान्तः, वेदशिरः, आत्मविद्या, ब्रह्मविद्या, परा विद्या, आत्मज्ञानम्, ब्रह्मज्ञानम् - इत्यादयः शब्दाः वेदान्तदर्शने पर्यायत्वेन व्यवह्रियन्ते ।

कठोपनिषद्भाष्यारम्भे शङ्करभगवत्पादः शब्दनिर्वचनपूर्वकमुपनिषच्छब्दस्यार्थमेवं निरूपयन्तिः - सदेर्धातोर्विशरणगत्यवसादनार्थस्यो-पनिपूर्वस्य क्विप्प्रत्ययान्तस्य रूपमुपनिषदिति । उपनिषच्छब्देन च व्याचिख्यासित - ग्रन्थप्रतिपाद्यावस्तुविषया विद्योच्यते । ये मुमुक्षवो दृष्टानु - श्रविकविषयवितृष्णाः सन्तः उपनिषच्छब्दवाच्यां वक्ष्यमाण - लक्षणां विद्यामुपसद्योपगम्य तन्निष्ठतया निश्चयेन शीलयन्ति तेषामविद्यादेः संसारबीजस्य विशरणाद्धिंसनाद्विनाशाना - दित्यनेनार्थयोगेन विद्योपनिषदुच्यते ।

तथाच वक्ष्यति : - "निचाय्य तं मृत्युमुखात् प्रमुच्यते" - इति पूर्वोक्तविशेषणान् मुमुक्षून् वा परं ब्रह्म गमयतीति ब्रह्मगमयितृत्वेन योगात् ब्रह्मविद्योपनिषत् । तथाच वक्ष्यतिः- "ब्रह्म प्राप्तो विरजोऽभूद्विमृत्युः"-इति । लोकादिर्ब्रह्मजज्ञो योऽग्निस्तद्विषयाया विद्याया द्वितीयेन वरेण प्रार्थ्यमानायाः स्वर्गलोकफलप्राप्तिहेतुत्वेन गर्भवासजन्मजराद्युपद्रववृन्दस्य लोकान्तरे पौनःपुन्येन प्रवृत्तस्यावसादयितृत्वेन शैथिल्या - पादनेन धात्वर्थयोगात् अग्निविद्याप्युपनिषदुच्यते ।

तथाच वक्ष्यति : - "स्वर्गलोका अमृतत्वं भजन्ते" - इत्यादि । ननु चोपनिषच्छब्देनाध्येतारो ग्रन्थमप्यभिलपन्ति । उपनिषदमधीमहेऽध्यापयाम इतिच । एवं नैषदोषाऽविद्यादिसंसारहेतु विशरणादेः सदिधात्वर्थस्य ग्रन्थमात्रेऽसंभवाद्विद्यायां च संभवात् । ग्रन्थस्यापि तादर्थ्येन तच्छब्दत्वोपयत्तेः । आयुर्घृतमित्यादिवत् । तस्माद् विद्यायां मुख्यया वृत्त्या उपनिषच्छब्दो वर्तते, ग्रन्थे तु भक्त्येति । एवमेवेतरोपनिषद्भाष्यारम्भेषु प्रायः उपनिषच्छब्दार्थं सम्यग् निरूपयन्ति भगवत्पादाः ।

श्रीविद्यारण्य स्वामिनोऽपि तैत्तिरीयोपनिषद्भाष्य - भूमिकायां प्रतिपादयन्तिः-

"अत्र ह्युपनिषच्छब्दोब्रह्मविद्यैकगोचरः ।

तच्छब्दावयवार्थस्य विद्यायामेव संभवात् ॥

उपोपसर्गः सामीप्ये तत्प्रतीचि समाप्यते ।

सामीप्यात् तारतम्यस्य विश्रान्तेः स्वात्मनीक्षणात् ॥

त्रिविधः सदिधात्वर्थो विद्यायां संभविष्यति ।

श्रीमत्सुरेश्वराचार्यैर्विस्पष्ट मिदमीरितम् ॥"

"उपनीयेममात्मानं ब्रह्मापास्तद्वयं स्वतः ।

निहन्त्यविद्यां तज्जं च तस्मादुपनिषद् भवेत् ॥

निहत्यानर्थमूलां स्वाविद्यां प्रत्यक्तया परम् ।

गमयत्यस्तसंभेदमतो वोपनिषद् भवेत् ॥

प्रवृत्तिहेतून्निःशेषांस्तन्मूलोच्छेदकत्वतः ।

यतोऽवसादयेद्विद्या तस्मादुपनिषन्मता ॥" इति ।

यथोक्तविद्याहेतुत्वाद्ग्रन्थोऽपि तदभेदतः ।

भवेदुपनिषन्नामा लाङ्गलं जीवनं यथा ॥ इति च ।

तथाचेदं निश्चितं यदुपनिषच्छब्दः मुख्यया वृत्त्या विद्यामभिधत्ते लक्षणया च ग्रन्थमपीति ।

## उपनिषत्प्रतियाद्यो विषयः

उपनिषत्प्रतियाद्यो मुख्यो विषयः क इतीदानीं चिन्तामर्हति । अनन्य लभ्यमेव विषयं समामनन्ति तीर्थकराः । अद्वैतमात्मतत्त्वमेवोपनिषदां प्राधान्येन प्रतिपाद्यो विषयः । यतो हि, वेदान्तव्यतिरिक्तेन केनाप्यन्येन प्रमाणेन अद्वितीयमात्म -तत्त्वमधिगन्तुं न शक्यते । "नावेदविन्मनुते तं बृहन्तम्" इति श्रुतिर्ब्रह्माधिगमे वेदातिरिक्तं प्रमाणमप्रमाणीकरोति ।

वाजसनेयी श्रुतिराघोषयति : -

"तं त्वौपनिषदं पुरूषं पृच्छामि" इति । औपनिषदोनामोपनिषत्स्वेवाधिगत इत्यर्थः। अद्वितीयमात्मतत्त्वं प्रत्यक्षप्रमाणगम्यं न भवति, "न संदृशे तिष्ठतिरूपमस्य न चक्षुषा पश्यति कश्चनैनम्," "अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं

नित्यमगन्धवच्चयत्" इत्यादिश्रुतेः। नाप्यनुमानं तत्र प्रभवति, हेतुदृष्टान्तयोरनुपलब्धेः। अद्वैतात्मतत्त्वं च निर्धर्मकमिति न तत्र हेतुसंभावनास्ति। अद्वितीयत्वाच्च तस्य दृष्टान्तो न घटते । यद्यपि, "जन्माद्यस्य यतः" (ब्र.सू. १-१-१) इति सूत्रे कार्यत्वानुमानेन जगत्कर्तुर्ब्रह्मणः सिद्धिर्निरूपिता । "श्रोतव्यो मन्तव्यः" इत्यादिश्रुतिः ब्रह्मसिद्धौ तर्कमप्युपष्टम्भकत्वेनानुमनुते । तथापि, वेदान्तमात्रसमधिगम्यं ब्रह्म । किन्तु पुरूषमतिस्वस्थतायै अनुमानमप्यनुमन्यते। तादृशंचानुमानमारोपितं हेतुं दृष्टान्तं चोपजीव्य तत्र प्रवर्तते । न तावतानुमानेन ब्रह्मसिद्धिः सम्मता । अनुमानं हि सामान्याकारेण जगत्कर्तृत्वरूपेण ब्रह्म निरूपयति । किन्तु सत्यज्ञानानन्ता-द्वितीयाखण्डैकरसरूपेण वेदान्ततात्पर्य-विषयीभूतेन विशेषाकारेण नानुमानं ब्रह्माधिगमयति । अतो ब्रह्मसिद्धिर्नानु-मानाधीना ।

आगमोऽपि कर्मज्ञानकाण्डभेदेन द्विधा वरीवर्ति । भव्यं धर्मं बोधयन् कर्मकाण्डः नित्यसिद्धं ब्रह्माधिगमयितुं न प्रभवति । आगमस्य च ज्ञानकाण्डभागः उपनिषदिति व्यपदिश्यते । अतः सिद्धमेतत् यदुपनिषदामद्वैतात्मतत्त्वमेव प्राधान्येन प्रतिपाद्यो विषय इति। भगवद्बादरायणसूत्रमपि इममेवार्थं सम्यग् युक्त्या प्रतिपादयति । "शास्त्रयोनित्वात्" (ब्र.सू. १-१-३) इति सूत्रस्य द्वितीयवर्णके योनिशब्दस्य ज्ञप्तिकारणं प्रमाणमित्यर्थं स्वीकृत्य उपनिषद्रूपशास्त्रसमधि-गम्यत्वमद्वैतात्मतत्त्वस्य निर्णीतम् ।

**चैतन्य स्वरूपम् ।**

अद्वैतात्मतत्त्वं च निर्विशेषचैतन्यस्वरूपमिति उपनिषत्परमसिद्धान्तः। अशेषतः संसारबीजोपमर्दनाय निखिलक्लेशमूलस्य अज्ञानस्य आत्यन्तिकी निवृत्तिः सर्वविधोपाधिविलयेन स्वयं विराजमानात्मदर्शनेनैव सिद्ध्यतीति वेदान्तडिण्डिमः । याथार्थ्येनात्मविद्योदयेसति निखिलानर्थमूलाविद्या तुच्छत्वमेवापद्यते । सुरेश्वराचार्याः वार्तिके व्याजहुः "प्रत्यग् ब्रह्मणि विज्ञाते नासीदस्ति भविष्यति" इति। ननु निर्विशेषात्मदर्शनेन अविद्याया आत्यान्तिकी निवृत्तिः कथं संभवति ? अनादिः खल्वविद्या भवतीति वेदान्तिभिरूद्धोष्यत इति चेत्, न । विरोधिसंनिपातेन अनादिरपि

विनश्यत्येव । यथा अनादिरपि प्रागभावः कार्योत्पत्तौ विनिवर्तते तद्वत् । अथ कथ्येत - विद्योदये सति विनाशं प्राप्तायाः अविद्यायाः कीदृशी अवस्था भवतीति ?

असत्त्वावस्था इत्येव तत्रोत्तरम् । मुद्गरपातादिना विनष्टो घटः देशकालक्रिया संबन्धायोग्यः असत्त्वमेवापद्यते । तथैव विद्योदयात् पूर्वं चैतन्यरूपं देशं, ईश्वरादिरूपंकालं, संसार रूपं च कार्यं संबन्धित्वेन प्रकल्प्य विजृम्भमाण - मज्ञानं विद्योदये सति चैतन्यादिना संबन्धानर्हं सर्वथा असत्त्वमेवापद्यते । मुद्गरपातेन जायमानः घटध्वंसः नित्यो भवतीति कथ्यते चेत्, किमलीकविवादेन ? नहि घट एव घटध्वंसरूपाभावस्वरूपं प्राप्नोति । उत्पत्तेः पूर्वं नाशादूर्ध्वं च कार्यमसदेवेति काणादानां भणितिः । वेदान्तसिद्धान्तानुसारेण ध्वंसोऽपि उत्पत्तिवत् क्षणिको भावविकार एव, द्वयोरपि संसारावस्थायामेव प्रतीति-योग्यत्वात्। विद्यारूपेण तत्त्वदर्शनेन अविद्या सर्वथा तुच्छत्वमाप्नोति इति श्रुतिसंमतः सिद्धान्तः । अतो विद्यायाः प्रादुर्भावे अविद्यातत्कार्यविलयेन चैतन्यमात्र - मवशिष्यते । ईदृशीं चैतन्यमात्रावशेषतां "ब्रह्मविदाप्नोति परम्," "स यो ह वै तत्परं ब्रह्म वेद ब्रह्मैव भवति" इत्यादयः श्रुतयः प्रतिपादयन्ति ।

आत्मैव ब्रह्म । निर्विशेषचैतन्यमेव ब्रह्मस्वरूपमिति उपनिषदां परमं तात्पर्यम्। परन्तु "लक्षणप्रमाणाभ्यांवस्तुसिद्धिः" इतिन्यायेन जिज्ञास्यमानस्य ब्रह्मणः लक्षणं द्वेधा उपनिषत्सु प्रतिपाद्यते । लक्षणं च तटस्थलक्षणं स्वरूपलक्षणमिति द्विधा भवति । तत्र स्वरूपमेव लक्षणं स्वरूपलक्षणमिति कथ्यते । ब्रह्मवल्ल्यां शुद्धचैतन्यरूपस्य ब्रह्मणः स्वरूपमभिहितम्: - "सत्यं ज्ञानमनन्तं ब्रह्म" इति । ब्रह्मणः स्वरूप-लक्षणनिरूपणाय श्रुतिवाक्यमिदं विराजते। तत्र ब्रह्मेति विशेष्यपदम् । सत्यादि पदत्रितयं विशेषणसमर्पकमिति वेदितव्यम् । इमानि त्रीण्यपि विशेषणानि लक्षणार्थ प्रधानान्येव भवन्ति । अत्र विशेषण - प्राधान्यं न विवक्षितं भवति । यतो हि, विशेषणं नाम केवलं सजातीयेभ्यो विशेष्यं व्यावर्तयति । लक्षणंतु सजातीयेभ्यः विजातीयेभ्यश्च व्यावर्तयति । सजातीय विजातीयस्वगतभेदशून्यं ब्रह्मात्र जिज्ञास्यत्वेन (ज्ञेयत्वेन) उपक्रान्तम् । अतः श्रुतिवाक्यमिदं लक्षणार्थमित्यवगन्तव्यम् । सत्यादि वाक्यं

समानाधिकरणत्वेन प्रतीयमानमपि न विशेषणविशेष्यसंसर्गपरं भवति । यथाहि, "सोऽयंदेवदत्तः" इति वाक्यं समानाधिकरणमपि देवदत्तस्वरूपैक्यपरं निश्चीयते, तद्वत्। "गुणानांच परार्थत्वात् असंबन्धः समत्वात् स्यात्" इतिन्यायेन सत्यादिशब्दाः न परस्परं संबद्ध्यन्ते । अतः सत्यं ब्रह्म, ज्ञानं ब्रह्म, अनन्तं ब्रह्मेति सिद्ध्यति । त्रिकालाबाध्यं सत्यं भवति । बाध्यं च विकारः अनृतमिति कथ्यते । "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति श्रुतेः सदेव सत्यमित्ववधार्यते । अतः "सत्यं बह्म" इति वचनं सर्वविकारात् बह्म व्यावर्तयति ।

यद्यपि विकाररूपकार्यापेक्षया कारणं सत् भवति । अथापि मृद्वत् अचिद्रूपं भवेदिति शंकोदियात् । अतः अचिद्रूपता - व्यावृत्तये ज्ञानं ब्रह्मेति पठ्यते । ज्ञानम्, ज्ञप्तिः, अवबोधः, चैतन्यम् - इत्यादयः पर्यायाः । भावप्रत्ययान्तः ज्ञानशब्दः । चैतन्यमेव ब्रह्मस्वरूपमित्यर्थः। सत्यानन्तशब्दावपि भावप्रधानावेव। अत एव ज्ञानशब्दः ज्ञानकर्तृत्वं न प्रतिपादयति । ज्ञानकर्तृत्वे हि ब्रह्म विक्रियमाणमापद्येत । विक्रियमाणस्य च सत्यत्वमनन्तत्वं च कथं भवेत्? ज्ञानकर्तृ च ज्ञेयज्ञानाभ्यां नियमेन प्रविभक्तं कथमनन्तं भवेत् ?

"यत्र नान्यद्विजानाति सभूमा" इति श्रुतिः भूमस्वरूपं प्रतिपादयति । लौकिकं ज्ञानमन्तवद् भवतीति ब्रह्मणः अन्तवत्त्वमापपद्येत । अतः तद्व्यावृत्तये अनन्तमिति विशेषणं अनन्तत्वस्वरूपं बोधयति । सत्यादीनि च विशेषणानि अनृतादिधर्मव्यावृत्ति-पराण्यपि लक्षणार्थ - प्रधानान्येव भवन्ति । ब्रह्मशब्दोऽपि स्वार्थेनैवार्थवान् भवति । अनन्तशब्दः परिच्छेदाभावबोधनद्वारा ब्रह्मणः विशेषणम् । सत्यज्ञानशब्दौ तु स्वार्थमेव समर्पयन्तौ विशेषणभावं भजतः । ब्रह्मवल्ल्यामेव उत्तरत्र "तस्माद्वा एतस्मादात्मनः" इति पूर्वोक्तब्रह्मण्येव आत्मशब्दः प्रयुज्यते । अतः वेदितुरात्मा ब्रह्मैव। "तत् सृष्ट्वा तदेवानुप्राविशत्" "तत्त्वमसि", "अयमात्मा ब्रह्म", "अहंब्रह्मास्मि" इत्यादयः श्रुतयः जीवब्रह्मणोरभेदं बोधयन्तीति हेतोः अनन्तं ब्रह्म इति जीवसकाशादपि ब्रह्मणः परिच्छेदाभावः प्रतिपाद्यत इति अनन्तत्वं सर्वथा सुस्थितं भवति । अतः अखण्डानन्दरस - चिन्मात्रस्वरूपं ब्रह्मेति सर्वास्वपि उपनिषत्सु समन्वयेन सुनिश्चितोऽर्थः ।

**अखण्डाद्वितीयस्यैव चैतन्यस्य उपाधिकल्पनया नानारूपेण वर्णनम् ।**

शुद्धचैतन्यस्यैव ईश्वरभावसम्पत्तये मायारूपोपाधिः श्रुतिषुवर्ण्यमानः उपलभ्यते। "पराऽस्य शक्तिर्विविधैव श्रूयते, स्वाभाविकी ज्ञानबलक्रिया च", "मायांतु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्" इत्यादयः श्रुतयः मायोपाधिकमीश्वरं समामनन्ति । "यतोवा इमानि भूतानि"- इत्यादिश्रुतिः ईश्वरस्यैव जगदुत्पत्तिस्थितिलयकारकत्वं प्रतिपादयति । अविद्योपाधिकत्वेन शुद्धचैतन्यमेव जीवभावमापद्य संसारित्वेन कर्मफलभोक्तृत्वेन च वर्ण्यते। "तयोरन्यः पिप्पलं स्वाद्वत्ति, अनश्नन् अन्योऽ - अभिचाकशीति" इत्यादिश्रुतिरत्रानुसन्धेया। जगज्जन्मादिकारणत्वं ब्रह्मणः तटस्थ लक्षणं भवति । स्वरूपात् भिन्नं सत्व्यावर्तकं लक्षणं तटस्थलक्षणमिति भण्यते । "सदेव सोम्येदमग्र आसीत्", "एकमेवाद्वितीयम्", ऐतदात्म्यमिदं सर्वं, तत्सत्यं, स आत्मा, तत्त्वमसि इतिश्रुतिः सर्वमखण्डाद्वितीयं ब्रह्मेति परमतात्पर्येण बोधयति। अथापि व्यवहारनिर्वाहाय सत्तात्रैविध्यमुपनिषत्स्वेव प्रक्रियाभेदेनोपवर्ण्यमानं दृश्यते। प्रक्रियादृष्ट्वैवच पारमार्थिकी व्यावहारिकी प्रातिभासिकी चेति त्रिविधा सत्ता उपनिषद्वाङ्मयपरिशीलनेन विभाव्यते । उपनिषदो हि सर्वलोकानुभवारूढं जाग्रत्स्वप्नसुषुप्तिरूपमवस्थात्रयमुपवर्ण्य तद्दृष्ट्या चतुर्थीं तुरीयावस्थां वर्णयित्वा "शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते, स आत्मा, स विज्ञेयः" इति तुरीयावस्थायां स्वरूपेण प्रकाशमानं शुद्धचैतन्यमेव परमार्थ इति उपायसोपानपंक्तिं प्रकल्प्य कल्पितसर्वप्रविलापेन परमार्थपदं प्रापयन्ति । क्वचिच्च नानारूपेण उपासनीयं ब्रह्मापि नानोपाधिद्वारा प्रतिपादयन्ति । उपाधिपरिकल्पनयैव जीवो नियम्यः, ईश्वरस्तु नियन्तेति च समुपवर्णयन्ति । उपनिषदां परमतात्पर्यपरिज्ञानेतु तत्र तत्र आपाततः प्रतीयमानो विरोधः स्वयमेव प्रविलीयते । अतश्च, परमतात्पर्यनिर्णयाय उपक्रमादीनि षड्विधानि तात्पर्यलिङ्गानि संपरिगृह्यन्ते : -

"उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ।।" इति ।

समस्तास्वपि उपनिषत्सु वाक्यानि अखण्डाद्वितीयचैतन्यरूपं ब्रह्मैव परमतात्पर्येण प्रतिपादयन्तीति वेदितव्यानि ।

"सदेव सोम्येदमग्र आसीत्, एकमेवाद्वितीयम्" (छां.६.२.१),

"आत्मा वा इदमेक एवाग्र आसीत् "(ऐत. २.१.१.१),

"तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्, अयमात्मा ब्रह्म सर्वानुभूः" (बृ.उ.२-५-१९); ब्रह्मैवेदममृतं पुरस्तात् (मुं. २-२-११) इत्यादीनि उपनिषद्वाक्यानि अत्र समनुसन्धेयानि । उदाहरणार्थं समन्वयप्रक्रिया एकत्र प्रदर्श्यते : -

छान्दोग्योपनिषदि श्रूयते "सदेव सोम्येदमग्र आसीत्, एकमेवाद्वितीयम्" (६-३-१) इति । तत्र हि विद्यास्तुतते निबद्धा आख्यायिका भवति । महर्षिरूद्दालकः पुत्रं श्वेतकेतुं प्रोवाच : - "हे सोम्य प्रियदर्शन ! इदं सर्वं जगत् अग्रे उत्पत्तेः पूर्वं सत् त्रिकालाबाधितं परमार्थभूतं ब्रह्मैवासीत् । एवकारेण प्रपंचस्य पृथक्सत्ता प्रतिषिध्यते । "एकमेवाद्वितीयम्" इति त्रीणि पदानि प्रयुक्तानि । तेनच पदत्रयेण सजातीयविजातीयस्वगतभेदत्रितयं निराक्रियते। इत्थमद्वितीयं ब्रह्म उपक्रमेण निर्दिष्टम् । "ऐतदात्म्यमिदं सर्वम्" इति चोपसंहारः कृतः । उपक्रमोपसंहारयोः संभूयैकरूप्येण तात्पर्यलिङ्गमेकमिति वेदितव्यम् । तत्रैवोपनिषदि "तत्त्वमसि" इति नवकृत्वः उपदेशात् अभ्यासरूपं तात्पर्यलिङ्गं सिद्ध्यति । अपूर्वत्वं नाम मानान्तराप्रतिपाद्यत्वम् । रूपादि विहीनस्य अद्वितीयब्रह्मणः अपूर्वत्वमुपदिष्टम् : - "अत्र वाव किल तत् सोम्य न निभालयसे" इति । तेजोऽबन्नादिकार्यसंघाते स्वयंप्रकाशमानं प्रत्यग्ब्रह्म न जानासीत्यर्थः । "तस्य तावदेव चिरं यावन्न विमोक्ष्ये, अथ संपत्स्ये" इति विदुषः ब्रह्मज्ञानात् ब्रह्मभावसम्पत्तिफलमभिहितम् । यावत्कालं देहविमोक्षो न भविष्यति तावदेव देहपातपर्यन्तः विलम्बो भवति । देहपातानन्तरमेव विद्वान् ब्रह्मैव संपत्स्यते । पूर्वमपि मुक्तस्यैव देहोपधिकृतो विलम्ब इव भवति । ब्रह्मविद् ब्रह्मैव भवतीत्यर्थः। उपचरितं फलत्वमिति वेदितव्यम् । अविद्यानिवृत्तिदृष्ट्या फलत्वोपचारः । विद्यास्तुतये खलु अर्थवादो निबद्ध्यते । "अनेन जीवेनात्मनानुप्रविश्य" इत्यादिः अद्वितीयज्ञानसम्पत्तये अर्थवादः। प्रकृतिं परित्यज्य विकारो न भवतीति मृदादिदृष्टान्तैः उपपत्तिरभिहिता भवति। एवमेव षट्प्रकाराणि तात्पर्यलिङ्गानि समस्तानि वा व्यस्तानि वा प्रतिवेदान्तमवगन्तव्यानि दरीदृश्यन्ते।

## ब्रह्मचैतन्यस्य वर्णनावैविध्यम् ।

उपनिषत्सु परमतात्पर्यविषयीभूतं तत्त्वं तु ब्रह्मचैतन्यमेकमेव । अथापि वर्णनादृष्ट्या तत्त्ववर्णने प्राधान्येन द्वयी गतिर्दृश्यते । कुत्रचित् स्थलेषु विधिमुखेन ब्रह्मणो वर्णनं दृश्यते । क्वचिच्च निषेधमुखेन । पाश्चात्यतत्त्वविचारपरेषु प्लोटैनस्नामा महाशयः मनोवागतीतं परं तत्त्वं निषेधमुखेनैव वर्णयितव्यं भवति नतु विधिमुखेनेत्यभिप्रैति । तदीयंहि वचनं वरीवर्ति : - "We say what he is not, we cannot say what he is." इति यत्साक्षादपरोक्षाद् ब्रह्म इति उपनिषद्वाणी अपरोक्षसाक्षात्काररूपं ब्रह्मानुभवं प्रतिपादयति । उपनिषत्सु ब्रह्मचैतन्यानुभववर्णनासौभाग्येन नितरां समाकृष्टाः बहवः तत्त्वविचारधुरीणाः उपनिषद्वचना-नामनितरसौभाग्यप्रकर्षं प्रमोदभरेण समुद्घोषयन्ति । महातत्त्वज्ञानीति प्रख्यातः डा. सर्वपल्ली राधाकृष्णमहोदयः स्वकीयग्रन्थभूमिकायां हर्षादरभरपूरितं वचो निस्सारयतिः-

"Anyone who reads the Upanishads in the original Sanskrit will be caught up and carried away by the elevation, the poetry, the compelling fascination of the many utterances through which they lay bare the secret and sacred relations of the human soul and the ultimate reality." इति ।

## उपनिषदां संख्या तत्त्वप्रतिपादनशैली च ।

ग्रन्थरूपेणोपनिषदः शताधिकाः समुपलभ्यन्ते । तत्र पञ्चदश वा षोडश वा उपनिषदः परिशुद्धब्रह्म - चैतन्यप्रतिपादनदृष्ट्या प्राधान्येन परिगण्यन्ते । शङ्कराचार्यप्रभृति-भिराचार्यैर्व्याख्याताश्च दशैकादशवोपनिषदः प्रख्याता भवन्ति ।

विवेकसंपन्नं मानवं श्रेयोमार्गे नेतुं श्रेयः - प्रेयोमार्गद्वय प्रदर्शनपूर्वकं श्रेयोमार्गस्य गरमाणं वर्णयति कठोपनिषत् : -

"श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ संपरीत्य विविनक्ति धीरः । श्रेयो हि धीरोऽभिप्रेयसो वृणीते प्रेयोमन्दो योगक्षेमाद्वृणीते ॥" (कठ. २-२) इति । तत्रैव, "नेहनानास्ति किंचन -- मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" (४-११) इति भेददर्शननिन्दां करोति । सर्वव्यापकस्यापि ब्रह्मणः आत्माभेदेन दर्शनानुभवं वर्णयतिः -

"अङ्गुष्ठमात्रः पुरूषो मध्य आत्मनि तिष्ठति ।
ईशानं भूतभव्यस्य न ततो विजुगप्सते । एतद्वैतत् ॥" (४-१२) इति ।

परिपूर्णब्रह्मचैतन्याभेदेन आत्मदर्शिनः परमशान्तिं निर्दिशतिः -

"एको वशी सर्वभूतान्तरात्मा एकं रुपं बहुधा यः करोति ।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥
नित्यो नित्यानां चेतनश्चेतनानामेकोबहूनां यो विदधाति कामान् ।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिःशाश्वती नेतरेषाम् ॥" (५-१२, १३) इति ।

माण्डूक्योपनिषत् अखण्डाद्वयचैतन्यानुभवं सर्वाकार रमणीयं वर्णयति : -

"नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम् । अदृश्यमव्यवहार्यमग्राह्यम-लक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः ॥" (मांडू. ७) इति । हृदयपुण्डरीके अध्यात्मयोगेन परमात्मसाक्षात्करे सति ब्रह्मचैतन्यामृतधाराप्रवाहरूपेण मुण्डकोपनिषद्वाणी निस्सरति : - "यः सर्वज्ञः सर्वविद् यस्यैष महिमा भुवि । दिव्ये ब्रह्मपुरे ह्येष व्योम्न्यात्मा प्रतिष्ठितः ॥ मनोमयः प्राणशरीरनेता प्रतिष्ठितोऽन्ने हृदयं सन्निधाय । तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद् विभाति ॥" (मुंड. २-२-६-७) इति ।

## उपनिषत्सु परमतात्पर्यदृष्टिः ।

प्रसिद्धासु दशस्वपि उपनिषत्सु एकमेवाखण्डमद्वितीयं ब्रह्मचैतन्यं परमतात्पर्येण प्रतिपाद्यते । तथा हि : -

ईशावास्योपनिषदि ईशावास्यमिदँ सर्वं यत् किं च जगत्यां जगत् ।
इति सर्वव्यापकं ब्रह्मचैतन्यमुपक्षिप्तम् ।

"तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ।" इति तस्यैव विशदीकरणं भवति ।
"यस्मिन् सर्वाणि भूतान्यात्मैवाभूद् विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥" इति सर्वात्मभावं तत्फलं च वर्णयति।

केनोपनिषदि : - "श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स उ प्राणस्य प्राणश्चक्षुषश्चक्षुः । अतिमुच्य धीराः प्रेत्या - स्माल्लोकादमृता भवन्ति ॥" इति सर्वप्रत्ययसाक्षिभूतं परब्रह्मचैतन्यं प्राधान्येन प्रतिपाद्यते ।

कठोपनिषदि : -

"अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात् । अन्यत्र भूताच्च भव्याच्च यत्तत् पश्यसि तद्वद ॥" इति नचिकेतसा पृष्टो ब्रह्मिष्ठो वैवस्वतः ओंकारतत्त्वप्रतिपादनद्वारा "अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगन्धवच्चयत्। अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात्प्रमुच्यते ॥" इति निर्गुण-ब्रह्मचैतन्यस्व-रूपमुपदिशति ।

"यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति । एवं मुनेर्विजानत आत्मा भवति गौतम ॥" इत्यभेददर्शनफलं निरूपयति ।

प्रश्नोपनिषदि : - षोडशकलपुरूषवर्णनद्वारा निर्गुणब्रह्मज्ञानफलं निर्दिश्य, "एतावदेवाहमेतत्परं बह्म वेद नातःपरमस्तीति ।" इति बह्मचैतन्यातिरिक्तं वेदितव्यं किंचिदपि नास्तीति जोघुष्यते ।

मण्डकोपनिषदि : - परापरविद्याविभागपूर्वकं परया विद्यया समधिगम्यं परमं ब्रह्म निर्दिश्यते : -

"अथ परा यया तदक्षरमधिगम्यते । यत्तदद्रेश्यमग्राह्य - मगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः ॥"

इति ।

"तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद् विभाति ।।" इति च। तत्रैव, ब्रह्मातिरिक्तविकारजातं सर्वं निराकृत्य निष्प्रतियोगिक - ब्रह्मचैतन्यमात्रावस्थानं वर्ण्यते :

"ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद् ब्रह्म दक्षिणतश्चोत्तरेण ।
अधश्चोर्ध्वं प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम् ।।" इति ।

माण्डूक्योपनिषदि : - "सर्वं ह्येतद् ब्रह्मायमात्मा ब्रह्म" इति नित्यापरोक्षब्रह्मभावमात्रावस्थानमखण्डैकरसं सर्वोपनिषत्सारभूतं संकीर्त्यते ।

ऐतरेयोपनिषदि : - "कोऽयमात्मेति वयमुपास्महे । कतरः स आत्मा" इति आत्मजिज्ञासां प्रस्तुत्य "प्रज्ञानं ब्रह्म" इति प्रत्यगब्रह्मैक्यं परमार्थ इति प्रतिपाद्यते।

तैत्तिरीयोपनिषदि : - "ब्रह्मविदाप्नोति परम्" इत्युपक्रम्य "रसो वै सः" इति परमानन्दरूपं परमं ब्रह्म निर्वर्ण्य सर्वाकाराभयरूपो ब्रह्मभावः, "अथ सोऽभयं गतो भवति", "न बिभेतिकदाचनेति", "न बिभेति कुतश्चनेति" इत्यादिरीत्या सम्यग् वर्णितः ।

छान्दोग्योपनिषदि : - चित्तशुद्धये सम्पाद्यमानाः अनेक विधाः उपासनाः प्रतिपाद्य प्राधान्येन "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" इति प्रतिज्ञाय "ऐतदात्म्यमिदं सर्वं, तत्सत्यं, स आत्मा, तत्त्वमसि" इति नवकृत्वः उपदेशकरणेन उपसंहृत्य प्रत्यगब्रह्मैक्यमात्रं परमार्थ इति सुस्पष्टं प्रतिपादितम् ।

बृहदारण्यकोपनिषदिः - जनकयाज्ञवल्क्यसंवादादिरूपेण ब्रह्मतत्त्वं नानाविधाभिर्युक्तिभिः प्राधान्येन प्रतिपाद्यते । याज्ञवल्क्यमैत्रेयीसंवादरूपेण आत्मविज्ञानेन सर्व विज्ञान सिद्धिपूर्वकं ब्रह्मात्मैक्यपारम्यं परमाद्भुतविधानेन निरूपितम् । निष्प्रतियोगिकब्रह्मात्मभावावस्थानसिद्धये मुमुक्षुभिर्निरन्तरमनुसन्धेयं "अहंब्रह्मास्मि" इति महामन्त्ररूपं महावाक्यं बृहदारण्यकोपनिषदि सिंहगर्जं गर्जति।

एवमुपनिषदः तत्त्वजिज्ञासून् परमार्थपदे नेतुं सर्वाकारेण समाकर्षन्तीति श्रुतिशिरोगिरां गरिमा संगीर्यतेतराम् ।

## महावाक्यार्थविचारः ।

उपनिषदां भगवद्गीतायाः ब्रह्मसूत्राणां च परमतात्पर्यं स्वयंप्रकाशमान-परमचैतन्यरूपं ब्रह्मात्मैक्यमिति श्री गौडपादशङ्करभगवत्पादप्रभृत्याचार्येभ्यः पुर्वं बहोःकालादारभ्य वेदान्तसंप्रदायारूढो विषय इति विदित एव । ब्रह्मात्मैक्य-सिद्धिरेव परमपुरूषार्थे मोक्षः । सच्चिदानन्दरूपब्रह्मात्मभावप्राप्त्यैव सकलशोकनिवृत्तिः । अपरोक्षानुभवरूपेण ब्रह्मात्मभावं बोधयन्ति उपनिषद्वाक्यानि महावाक्यानीति संप्रदायविदः समामनन्ति । आकारमहत्त्वं विभाव्य नैतानि वाक्यानि महावाक्यानीति व्यपदिश्यन्ते । निरूपाधिकमद्वितीयं ब्रह्मात्मभावं साक्षादनुभवपर्यवसायित्वेन बोधयन्तीति हेतोः वाक्यानामेषां महत्त्वं विद्योतते ।

"प्रज्ञानं ब्रह्म" (ऐत.२-३), "अहं ब्रह्मास्मि" (बृ.आ. उ. १-४-१०), "तत्त्वमसि" (छां.६), "अयमात्मा ब्रह्म" (मांड्.२) - प्रभृतीनि उपनिषद्वाक्यानि महावाक्यानि इति परिगणितानि। आधुनिकैः महावाक्यव्यपदेशः कल्पित इति वादः न स्थाने । यतः, महावाक्यविचारो हि वेदान्तसंप्रदायविदां परंपरया समारुढो विराजते। महावाक्यविवरण-महावाक्यविवेकप्रभृतयो ग्रन्थाः समुपलभ्यन्ते । ब्रह्मसूत्रभाष्ये शंकरभगवत्पादैरेव तत्त्वमासि-वाक्यस्य अर्थः अत्यन्तवैशद्येन निरूपित इति सर्वविदितोऽयं विषयः । शिवपुराणस्य कैलाससंहितायां संन्यासविधिनिरूपणप्रकरणे अथ महावाक्यानि - इति प्रस्तुत्य प्रज्ञानं ब्रह्म - इत्यादीनि द्वाविंशतिर्महावाक्यानि निर्दिष्टानि समुपलभ्यन्ते । शिवपुराणस्य, प्राचीनतायां नास्ति संशीतिलेशोऽपि ।

अद्याप्यद्वैतसंप्रदाये संन्यासदीक्षाप्रदानसंदर्भे गुरूः शिष्यं प्रणवार्थमवबोद्ध्य चतुर्णां महावाक्यानामर्थविवृतिपूर्वकमुपदेशं करोतीति संन्यास विधिसंप्रदायो वरीवर्ति। चतुर्भ्यो वेदेभ्यः संगृहीतानि इमानि महावाक्यानि सकलवेदपरमतात्पर्यं बोधयन्तीति परमार्थः। इतरास्वप्युपनिषत्सु महावाक्यानीमानि सन्दृश्यन्ते। सर्वासामप्युपनिषदां परमं तात्पर्यं तु अद्वितीयाखण्डनन्दपरम-चैतन्यरूपब्रह्मात्मैक्यमेव । साक्षादिममर्थं बोधयन्ति वाक्यानि महावाक्यानि मन्यन्ते। तदुपष्टम्भकत्वेन दृश्यमानानि चावान्तरवाक्यानीति परिगण्यन्ते । वेदान्तस्य संपूर्णं तत्त्वज्ञानं निर्दिष्टेषु चतुर्ष्वेतेषु महावाक्येष्वन्तर्निहितं विराजते ।

ब्रह्मज्ञानाभिलाषिणं शिष्यं प्रति ब्रह्मनिष्ठः सद्गुरूः प्रथममुपदिशति "प्रज्ञानं ब्रह्म" इति। लक्षणवाक्यत्वेन परिगणितमिदं वाक्यं शिष्यस्य चित्ते ब्रह्मस्वरूपमुद्बोध्य जोगुञ्जीति। अनन्तरं ब्रह्मात्मैक्य प्रबोधाय महागुरूरूपदिशति "तत्त्वमसि" इति । उपदेशवाक्यमिदं शिष्यान्तरङ्गेऽमृतधारावत्प्रवहति । तदनन्तरं "अयमात्माब्रह्म" इत्युपदिश्यमानं महावाक्यं शिष्ये बह्मानुभवं जागरयति । अतश्चेदमनुभववाक्यमिति व्यपदिश्यते । एवं शिष्यमध्यात्म भूमावारोप्य निरूपाधिकब्रह्मचैतन्यानुसन्धानाय सद्गुरूः स्वीयं पूर्णानुभवमेव गम्भीरघोषेण "अहं ब्रह्मास्मि" इति महावाक्यरूपेणोपदिशति । अनुसन्धानवाक्यत्वेन परिगणितमिदमुपदेशवाक्यं शिष्यहृदये प्रविष्टं निरन्तरं गुञ्जत् प्रतिष्ठितं भवति । आप्रायणाद् यतिनानुसन्धीयमानो महामन्त्रोऽयं देहपाते यतिं परिपूर्णब्रह्मचैतन्यात्मनावस्थापयति । अत एव विद्यारण्यस्वामिभिरभिहितम् : - "अनुभूतेरभावेऽपि ब्रह्मास्मीति विचिन्त्यताम् । अप्यसत् प्राप्यते ध्यानान्नित्याप्तं ब्रह्म किंपुनः ॥ इति । तेजोबिन्दूपनिषदि" अहं ब्रह्मास्मि इति महामन्त्रस्य परिपूर्णमहिमा वैशद्येन वर्णितो विराजते । अर्थानुभवपूर्वकमनुसन्धीयमानो महावाक्यमन्त्रोयं यतिं कृतकृत्यं करोति । "स यो हवै तत् परमंब्रह्मवेद बह्मैव भवति" इति मुंण्डकोपनिषद्घोषानुसारेण ब्रह्मविद् ब्रह्मण्येव प्रतिष्ठितो भवति । सर्वाण्यपि महावाक्यानि अखण्डार्थं बोधयन्तीति तत्वार्थविदां सिद्धान्तः समस्ति। पदार्थज्ञानेन खलु वाक्यार्थज्ञानं संपद्यते। पदार्थशोधनं कृत्वा अखण्ड-वाक्यार्थानुसन्धानं कर्तव्यम् ।

"प्रज्ञानं ब्रह्म" इति महावाक्यस्येदानीं परमार्थप्रकाशनरीतिर्निरूप्यते । ऐतरेयोपनिषदिश्रूयते : - आत्मा वा इदमेक एवाग्र आसीत् इति । त्रिष्वपि कालेषु आत्मैव स्वयंप्रकाशते इति वाक्यतात्पर्यम् । अध्यारोपापवादन्यायेन निष्प्रपंचं तत्त्वं प्रतिपादयितुमुत्तरत्रोपनिषत् लोकसृष्ट्यर्थं परमात्मनः ईक्षणादिकं वर्णयति । एवं विचारं प्रस्तुत्य कोऽयमात्मेति वयमुपास्महे । कतरः स आत्मा इति आत्मतत्त्वजिज्ञासामुद्भावयति। उपनिषदि च ईक्षणमारभ्य प्रवेशपर्यन्तं वर्ण्यमानाख्यायिका केवलमर्थवाद इति वेदितव्यम् । समस्तः संसारः आत्मनः संकल्पेन आत्मस्वरूपमेवेति बोधयितुमियमाख्यायिका प्रक्रान्ता। इन्द्रियद्वारा संपद्यमानानि

दर्शनादीनि ज्ञानानि, हृदयं, मनः, संज्ञानम् - इत्यादयः सर्वा अपि मनोवृत्तयः प्रत्यक्‌चैतन्यस्य स्फुरणमात्रमितिहेतोः प्रत्यक्‌चैतन्यस्य प्रज्ञानस्यैव केवलं नानावधिनि नामानि भवन्ति । सर्वविधोपाधिरहितं प्रकृष्टं चैतन्यमेव हिरण्यगर्भः, इन्द्रः - इत्यादिसमस्तजीवजन्तुरूपेण, प्रकाशते । अतः सर्वोऽपि संसारः प्रज्ञानेन प्रकाशितः प्रज्ञानेनैव स्थितिं लब्ध्वा प्रज्ञाने एव प्रलीयैकीभवति। आत्मैव ब्रह्मेति श्रुतयः संगिरन्ते। अतोहि प्रज्ञानमेव परंब्रह्म । उपनिषद्भिः प्रतिपाद्यमानः सर्वात्मभावोऽयमेव । अत्र प्रज्ञानशब्देन प्रत्यगात्मनः निर्विशेषत्वं सिद्ध्यति । प्रज्ञानं प्रकृष्टचैतन्यमित्यर्थः । सर्वं प्रज्ञानमितिहेतोः तदेव परमार्थसत्यम् । ब्रह्मशब्देन च उपनिषत्सु शारीरकमीमांसाभाष्यादिषु च प्रतिपादितं सकलोपाधिवर्जितं निर्विशेषमद्वितीयं परमात्मचैतन्यं प्रतिपाद्यते । सामानाधिकरण्यमहिम्ना उपनिषद्वाक्येऽस्मिन् निर्विशेषं शुद्धचैतन्यमे-वाखण्डवाक्यार्थरूपेण विराजते । प्रत्यगात्मचैतन्यं जगत्कारण-त्वोपलक्षितं ब्रह्मचैतन्यं च निर्विशेषचिद्रूपमितिहेतोः ऐक्यमेवाखण्डवाक्यार्थरूपेण प्रकाशते। अध्यारोपापवादन्यायेन आत्मैव अविद्याया संसारीव भासमानः आत्मबोधेन स्वयं मुक्तात्माद्वितीयोऽवतिष्ठते । इदमेवोपनिषदः परमं तात्पर्यम् ।

प्रकारान्तरेणापि अत्र जीवब्रह्मणोरैक्यं प्रतिपादितं भवति । तथाहि : - प्रज्ञानशब्देन प्रत्यगात्मा बोध्यते । ब्रह्मशब्देन च जगत्कारणत्वोपलक्षितं ब्रह्मचैतन्यं प्रतिपाद्यते । सामानाधिकरण्यमहिम्ना प्रत्यग्ब्रह्मणोः निर्विशेषचिद्रूपत्वं लक्षणावृत्त्या प्रतिपाद्यते । "सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति" इति वाक्येन देहेन्द्रियादीनां साक्षिरूपं त्वंपदार्थभूतं प्रज्ञानं निश्चीयते । "एष ब्रह्म ।" - इत्यादिवाक्येन जगत्कारणत्वेन रूपेण निश्चितं ब्रह्मैव प्रतिपाद्यते। ततश्च प्रत्यग्ब्रह्मणोर्भेदलेशोऽपि नास्तीति निश्चीयते । अहमितिप्रतीतौ भासमानं चेतन्यं जीव इति व्यपदिश्यते । उपनिषत्प्रतिपादितरूपेण अनुभवगम्यंतु ब्रह्मैव विद्योतते । व्यवहारे भेदभासेऽपि तात्त्विको भेदो नैवभासते। प्रज्ञानब्रह्मशब्दयोः एक एवार्थे गृह्यते चेत् नर्हि पुनरूक्तिः खलु ? इत्याक्षेपो न स्थानं लभते। प्रत्यक्‌चैतन्यं ब्रह्मचैतन्यात् न भिन्नम्, ब्रह्मचैतन्यं च न परोक्षमिति प्रतिपादनाय पदद्वयं प्रयक्तं वर्तते। ब्रह्मपदप्रयोगवशात् श्रुतिप्रपिपादितं ब्रह्म न परोक्षमित्येव सिद्यति । एवमखण्डचैतन्यैकरसं ब्रह्म उपनिषदः परमतात्पर्यमिति

निश्चितं भवति।

"अहंब्रह्मास्मि" इति महावाक्येऽपि अखण्डार्थप्रक्रिया निरूप्यते । इदं चानुसन्धानवाक्यमिति पूर्वमेवाक्तम् । मोक्षापेक्षिभिः सततमिदमनुसन्धेयम् । विनाप्यर्थज्ञानं श्रद्धया सततजपमात्रेण ब्रह्मानुभवसिद्ध्युपायभूतचित्तशुद्धि-सम्पादको भवत्ययं महामन्त्र इति सम्प्रदायविदः आमनन्ति । गुरूमुखेनैव महावाक्यमंत्रोपदेशः प्राप्तव्यः । अहमितिशब्देन अहङ्कारे प्रतिविम्बितं चैतन्यं प्रतिपाद्यते । बह्मशब्देन जगत्कारणत्वेन श्रुतिप्रसिद्धं ब्रह्मचैतन्यंबोध्यते । अस्मीतिपदेन तयोरैक्यं प्रतीयते । शुद्धयोः तात्त्विकभेदाभावात् स्वतः-सिद्धमैक्यमखण्डवाक्यार्थत्वेन विराजते । पुनरूक्तिदोषस्तु पूर्ववदेव परिहार्यः।

ब्रह्मज्ञानिना सद्गुरुणा यथार्थं ब्रह्मात्मैक्यमनुभवगम्यत्वेन प्रदर्शितं चेदेव मुमुक्षुस्तत्स्वरूपं प्रतिपद्यते । तावत्पर्यन्तं देहेन्द्रियादिषु अहंममाभिमानेन निरन्तरं क्लेशमनुभवन् परितपति जीवः। दृश्यं जगदेव सत्यत्वेन भावयति। तद्दृष्ट्यैवनाना-विधा वादाः प्रवर्तन्ते । सर्वाण्यपि मतानि स्वयंप्रकाशमानेन ब्रह्मणैव भासितानि भवन्ति। तदेव ब्रह्म अहमिति विद्योतते चेत् अहङ्कारः सर्वाकारेण दग्धो भवति । तृणभासकोऽपि भास्करकिरणः सूर्यकान्तमणिसमारुढः तृणं समूलं दहतीति लोके दृश्यते । तद्दृष्टान्तेन ब्रह्मज्योतिषा अहङ्कारदाहोऽपि समूलः संभवति । तथाच सुरेश्वराचार्यैरूक्त म् : -

"तृणादेर्भासिकाप्येषा सूर्यकान्तिस्तृणं दहेत् ।
सूर्यकान्तमुपारूह्य तंन्याय तत्र योजयेत् ।।" इति।

छांदोग्ये उद्दालकेन पुत्रं श्वेतकेतुं प्रत्युपदेशप्रसङ्गे "तत्त्वमसि" इति महावाक्यमुपदिष्टं श्रूयते । इदंच महावाक्यमद्वैतसिद्धान्ते महत्त्वमतीवावहति । "सदेव सोम्येदमग्र आसीत्, एकमेवाद्वितीयम्" इत्युपक्रम्य "ऐतदात्म्यमिदं सर्वम्" इत्युपसंहारेण षड्भिरपि तात्पर्यलिङ्गैः निश्चितं निरूपाधिकशुद्धब्रह्मचैतन्यमेवात्र वाक्ये अनुभवगम्यत्वेनोपदिश्यते । अत्रापि अखण्डवाक्यार्थ एव निश्चीयते । ततपदेन जगत्कारणत्वोपलक्षितं श्रुतिप्रतिपादितं बह्माभिधीयते । त्वम्पदेन च देहादिसंघातसाक्षि जीवचैतन्यं प्रतिपाद्यते । असिपदेन तयोरैक्यं विवक्षितं भवति।

विरूद्धधर्मयोरैक्यायोगात् अत्र विरोधपरिहाराय सामानाधिकरण्यमहिम्ना उभयत्र लक्षणया शुद्धं चैतन्यमेव प्रतिपाद्यते । शुद्धयोरैक्यं संजाघटीति । असिपदेन च तदेव प्रतिपिपादयिषितम् पुनरूक्तिदोषः पूर्ववदेव परिहर्तव्यो भवति । "सआत्मा, तत्त्वमसि" इति अव्यवहितपूर्वं पठितः आत्मशब्दोऽपि प्रत्यग्ब्रह्मणोरैक्यनिर्णयेऽ-नुकूलतामावहति । तथाच अखण्डार्थत्वेन निरूपाधिकं परिपूर्णं शुद्धं ब्रह्मचैतन्यमेव श्रुतेः परमतात्पर्यमिति निश्चीयते ।

"अयमात्मा ब्रह्म" इति महावाक्येऽपि अखण्डार्थप्रक्रिया निरूप्यते । ब्रह्मविद्या हि परममुरूषार्थसाधनमिति वेदान्तडिण्डिमः । ब्रह्मविद्यैव उपनिषच्छब्दस्य मुख्योऽर्थ इति सप्रमाणं पूर्वं निरूपितमेव । मोक्षापेक्षिणमुत्तमाधिकारिणं प्रति उपनिषद्वाक्यानि, विशेषतः महावाक्यानि प्रत्यग्ब्रह्मैक्यमेव बोधयन्तीति निश्चप्रचम् ।

"अयमात्मा ब्रह्म" इति महावाक्यं माण्डूक्योपनिषदिश्रूयते । वाक्यमिदं पदत्रयघटितं भवति । पदार्थज्ञानेनैव वाक्यार्थज्ञानं स्वरूपं लभते । महावाक्यानि च अखण्डार्थमेव बोधयन्तीति वेदान्तप्रक्रियासंप्रदाय इति आम्रेडितमेव । माण्डूक्योपनिषदि आदौ ओंकारस्य सर्वव्यापकतां प्रतिपाद्य समस्तोऽपि वाक्प्रपंचः ओंकारेऽन्तर्निहितः ओंकाररूप एव भवतीति पठितम् । तेनच कल्पितस्य सर्वस्यापि नामरूपप्रपंचस्य एकेनैव प्रयत्नेन निवृत्तिं संपाद्य प्रकृतं प्रत्यग्ब्रह्मैक्यं बोधयितुमानुकूल्यं प्रकल्पितम् । यतो हि, नामरूपात्मकः सर्वोऽपि प्रपंचः विकल्पमात्रं न तु वास्तविकंतत्त्वमित्यवगन्तव्यम् । महावाक्ये च अयमिति पदं प्रत्यक्षंवस्तु निर्दिशति । अतः महावाक्ये तात्पर्येण प्रतिपिपादयिषितं ब्रह्म न परोक्षं, किन्तु नित्यापरोक्षं तदिति सिद्ध्यति । ब्रह्मचैतन्यं स्वप्रकाशत्वात् सर्वात्मकत्वाच्च नित्यापरोक्षं विराजते । विश्वतैजसप्राज्ञतुरीयप्रकारैः चतुर्भिःपादैरुपेतः "सोऽयमात्मा चतुष्पात्" इत्यग्रेपठ्यते। आत्मनश्चत्वारः पादाः न गोरिव पादा भवन्ति । रूप्यके पादचतुष्टयमिव केवलं व्यवहारसौकर्यायैवं प्रकल्प्यते । विश्वतैजसप्राज्ञाश्च केवलं प्राप्तिसाधनत्वेन पादा अभिधीयन्ते । तुरीयश्च प्राप्तव्यरूपेण पादः पठ्यते । आद्यत्रये करणव्युत्पत्तिः । तुरीये च कर्मव्युत्पत्तिरिति व्युत्पत्तिभेदोऽवगन्तव्यः कल्पितस्यापि पूर्वत्रयस्य लये

वस्तुसत्यस्तुरीय एव केवलमद्वितीयः स्वयं प्रकाशते । "अयम्" इति निर्देशात् अदृष्टादिवत् ब्रह्म न नित्यपरोक्षमिति निश्चीयते, घटादिवच्च दृश्यवस्तु न भवतीति च । आत्मशब्दश्च प्रत्यगात्मनि प्रसिद्ध इति प्रत्यगात्मानमेव बोधयति । देहेन्द्रिय मनःप्राणाहंकारातिरिक्तं सर्वान्तरं तानि सर्वाण्यपि भासयत् तत्सर्वसाक्षिभूतं प्रत्यक्चैतन्यमेवात्मशब्देनात्र प्रतिपाद्यते । ब्रह्मशब्दश्च सर्वाधिष्ठानभूतं पारमार्थिकं परचैतन्यं प्राधान्येन प्रतिपादयति । दृश्यत्वेन मिथ्याभूतस्य आकाशादिसमस्तप्रपंचस्य बाधपरमावधिभूतं तु परं ब्रह्मैव । तद्ब्रह्म सच्चिदानन्दरूपमद्वितीयं स्वयं विभाति । एवं महावाक्यघटकपदानां अर्थज्ञाने संपादिते पूर्वोक्तवत् ऐक्यप्रक्रियया-स्वयंप्रकाशमानमद्वितीयं प्रत्यगब्रह्मैक्यं अखणडवाक्यार्थत्वेन निश्चीयते । महाद्भुतोऽयमनुभवः । गुरूशिष्ययोरेकानुभवस्य परमप्रतिष्ठा विजृम्भते । ब्रह्मणः किमपि कारणं न भवति । ब्रह्मणश्च किमपि कार्यं नोत्पद्यते । ब्रह्मणि च नान्तर्भेदो नबहिर्भेदः । स्वयंप्रकाशमानं प्रत्यक्चैतन्यमेव अद्वितीयं ब्रह्मचैतन्यं सर्वात्मकं स्वयं विद्योतते । सर्वेषामेव वेदान्तानामिदमेव परमतात्पर्यमितिशम् ।

# पुराणेषु चैतन्यस्यावधारणा

डॉ. विन्ध्येश्वरीप्रसादमिश्रो 'विनयः'

प्रत्यक्चैतन्यरूपाय विश्वरूपायसाक्षिणे ।

नमः श्रीकृष्णचन्द्राय पुराणपुरुषात्मने ॥

पुराणानि, चतुर्दशविद्यासु प्रथमाङ्गत्वेन परिगणितानि[1] इतिहासेनसमं पञ्चमवेदत्वेनसमाम्नातानि[2], भारतीयधर्मदर्शनैतिह्यकलासाहित्यसंस्कृती-नामाकरभूतानि च लोकप्रथितानि ग्रन्थरत्नानीति सुविदितमेव विदितवेदितव्यानां सुरगवीगवेषणै-कव्रतभव्यानाम्। अत्र हि -

सर्गश्चप्रतिसर्गश्च वंशो मन्वन्तराणि च ।

वंशानुचरितञ्चैव पुराणं पञ्चलक्षणम् ॥

(मत्स्यपु. ५३/६४)

इति "पञ्चलक्षण्या", क्वचित् -

अत्रसर्गो विसर्गश्च स्थानं पोषणमूतयः ।

मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥

(श्रीमद्भाः २/१०/१)

इत्युक्तदिशा, तथैव -

सर्गोऽस्याथ विसर्गश्च वृत्तीरक्षान्तराणि च ।

वंशो वंशानुचरितं संस्था हेतुरपाश्रयः ॥

(तत्रैव १२/७/९)

इत्युक्तरीत्या च "दशलक्षण्या", ब्रह्माण्डस्य समग्रस्य सृष्टिस्थितिप्रलयात्मिका

व्यावहारिकी व्यवस्था वैशद्येन निरूपिता । अत्र प्रासङ्गिकरूपेण समेषामपि भारतीयानामास्तिकदर्शनानां तत्त्वानि स्वसिद्धान्तरूपेण नास्तिकदर्शनानां मतानि च पूर्वपक्षत्वेन तत्र तत्र कथासु विन्यस्य कक्षीकृतानि । प्रत्येकमपि पुराणं परब्रह्मणः स्वरुपद्वयमवलम्व्य प्रवर्तते, प्रथममधिष्ठानसत्तात्मकमद्वयं गुणातीतं तत्त्वरूपमपरं लीलया धृतविग्रहं ब्रह्मविष्णुशिवदुर्गागणेशसूर्यादिमूर्त्या भक्तानामुपासनालम्बनं सगुणं, जगतः सृष्ट्यादिविधायकं परमेश्वररुपश्चेति । उभयमप्येकरूपमभिन्नमिति पौरणिकानांपद्धतिः । सन्त्यत्राष्टादश- महापुराणानि - ब्रह्म पद्म विष्णुशिवभागवतनारदीयमाकर्ण्डेयाग्नि भविष्य ब्रह्मवैवर्तलिङ्गवराहस्कन्दवामनकूर्ममत्स्यगरुडाख्यानि [३] । तत्रापि चतुर्थेशिवपुराणस्थाने क्वचिद् वायुपुराणस्य परिगणनं । पञ्चमे भागवतस्थाने च श्रीमद्भागवत-देवीभागवतयोरेकतमस्य ग्रहणाभिनिवेश इति समुपजातायां विचिकित्सायां कल्पभेदात् संहिताभेदाच्च समाधानमुपपादयन्ति पारम्परीणा इत्यवधेयम् । एतदतिरिक्तान्यष्टादश-संख्याकान्युपपुराणान्यपि पठ्यन्ते - सनत्कुमारनृ-सिंहनारदीय-शिवदुर्वाससांख्य-कापिलमानवौशनसाख्य-वारुणकालिका-साम्बनन्दिप्रोक्तसौरपारा-शरादित्यमाहेश्वर भागवतवासिष्ठसञ्ज्ञकानि[४] । अपिच, पुराणाख्यया केचनान्येऽपि ग्रन्थाः प्रसिद्धास्तेषु महाभारतस्य खिलपर्वरूपं श्रीहरिवंशपुराणमन्यतमं विद्यते, गर्गसंहिता-सदृक्षानि कतिचनान्यान्यपि पौराणीं पद्धतिमनुधावन्ति प्रकरणानीति विदन्त्येव विद्वासः ।

एतेषु वाङमयस्यास्य बहुलोंऽशोधर्मशास्त्रीयं व्रततीर्थदेवोपासनादिकमेव भजते, अग्निपुराणाद्यात्मकोऽन्यश्च बहुविधविद्यानांसङ्ग्रहात्मकतामेवाश्रयते, श्रीविष्णुपुराण-श्रीमद्भागवत - प्रभृतिपुराणविग्रहःकश्चनान्यः प्रभागोविशिष्य दार्शनिकीं तात्त्विकतामेवाङ्गीकरोति तथापि समेष्वपि भगवत्तत्त्वस्य सच्चिदानन्दात्मकता तत्र तत्र स्तवनादिप्रसङ्गेषु न न शक्याविष्करणा, सर्वत्र च तत्त्वदृष्ट्या चैतन्यस्यावधारणाऽपि प्रायशः सांख्यदर्शनोक्तरीत्या प्रत्यभिज्ञादर्शनरीत्याऽद्वैतवेदान्तादिपद्धत्या वा समुपलभ्यत एव सर्गादिनिरुपणप्रसङ्गेषु परतत्त्वनिरूपणसन्दर्भेषु च वैशद्यभूमिकामुपनीयमानेति सङ्क्षेपेण निदर्शनपुरस्सर वयमत्र प्रदर्शयामः ।

पुराणेषु चैतन्यस्य स्वरूपम् - सर्वत्रापि पुराणेषु चैतन्यस्य वास्तविकस्वरुपं परसत्तात्मकं परब्रह्म, तत्स्वरूपिणी पराशक्तिर्वेत्यभितम् ।

तच्च क्वचिद् ज्ञान शब्देन क्वचिज्ज्योतिरित्याख्यया क्वापि चिच्छब्देन साक्षात्क्वचन तु संविदित्यभिधानेन व्यपदिश्यते, यथेमानि विविधपुराणानां वचनानि -

वदन्ति तत्तत्त्वविदस्तत्त्वंयज्ज्ञानमद्वयम् ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥

(श्रीमद्भा. १/२/११)

विशुद्धं केवलं ज्ञानं प्रत्यक् सम्यगवस्थितम् ।
सत्यं पूर्णमनाद्यन्तं निर्गुणं नित्यमद्वयम् ॥

(तत्रैव २/६/३९)

*ज्ञानमात्र* परंब्रह्म .....

(तत्रैव ३/३२/२६)

*ज्ञानमेकं* पराचीनैरिन्द्रियै र्ब्रह्मनिर्गुणम् ।
अवभात्यर्थरूपेण भ्रान्त्या शब्दादिधर्मिणा ॥

(तत्रैव ३/३२/२८)

अहमेवासमेवाग्रे नान्यत्किञ्चान्तरं बहिः ।
सञ्ज्ञानमात्रमव्यक्तं प्रसुप्तमिव विश्वतः ॥

(तत्रैव ६/४/४७

नमो विज्ञानमात्राय

(तत्रैव ६/१६/१९)

नमो ज्ञानधनाय च

(तत्रैव ८/३/१२)

नमो विज्ञानमात्राय सर्वप्रत्ययहेतवे ।

(तत्रैव १०/४०/२९)

केवलं ज्ञप्तिमात्रम् (तत्रैव १०/६३/२५)

अवबोधो भवान्बुद्धे.....

(तत्रैव १०/८५/१०)

आसीज्ज्ञानमथोह्यर्थमेकमेवाविकल्पितम् ।

(तत्रैव ११/२४/२)

ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः ।
तमेवार्थस्वरूपेण भ्रान्तिदर्शनतःस्थितम् ॥

(श्रीविष्णुपुराणम् १/२/६)

यदेतद् दृश्यते मूर्त्तमेतज्ज्ञानात्मनस्तव ।
भ्रान्तिज्ञानेन पश्यन्ति जगद्रूपमयोगिनः ॥

ज्ञानस्वरूपमखिलं जगदेतदबुद्धयः ।
अर्थस्वरूपं पश्यन्तो भ्राम्यन्ते मोहसम्प्लवे ॥

(तत्रैव १/४/३८,४१)

विशुद्धबोधवन्नित्यमजमक्षयमव्ययम् ।
अव्यक्तमविकारं यत्तद्विष्णोः परमं पदम् ॥

(तत्रैव १/९/५१)

ॐ नमो वासुदेवाय शुद्धज्ञानस्वरूपिणे ।

(तत्रैव १/११/५५)

प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरम् ।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्म सञ्ज्ञितम् ॥

(तत्रैव ६/७/५३)

स्थूलसूक्ष्मादिभेदेन द्वे रूपे परमात्मनः । ख
ज्ञानरूपं निराकारं निदानं तत्प्रचक्षते ॥

(श्रीमद्देवीभागवतम् ३/७/३९)

ज्ञानस्वरूपमखिलं जगदेतदबुद्धयः ।
अर्थस्वरूपं पश्यन्तो भ्राम्यन्ते तमसःप्लवे ॥
ये तु ज्ञानविदः शुद्धचेतसस्तेऽखिलं जगत् ।

ज्ञानात्मकं प्रपश्यन्ति त्वद्रूपं परमेश्वर ॥

(पद्मपु. सृष्टिखण्डे ३/४९-५२)

विशुद्धविज्ञानघनं पुराणम्.... ।

(स्कन्दपु. वैष्णवखण्डे २/३३)

एवं ब्रह्ममयं विभाति सकलं विश्वं चरं स्थावरं
विज्ञानाख्यमिदं पदं स भगवान् विष्णुःस्वयंव्यापकः ।

(तत्रैव ब्रह्माण्डखण्डे ३०/८०)

यन्निःसङ्गं चिदाकाशं ज्ञानरूपमसंवृतम् ।
निरीहमचलं शुद्धमगुणं व्यापकं स्मृतम् ॥

(वराहपु. उत्तरार्धे ४२/३५/९८)

नमो विश्वात्मने लोकस्थति व्यापारकारिणे ।
सत्त्वविज्ञानरुपाय पराय प्रत्यगात्मने ॥

(ब्रह्मान्डपु. उपोद्घातपादे ३/२५/२१)

अहं ब्रह्म परं ज्ञानम्....

(तत्रैव ३/३७७/२२)

उपाधिहीनो विमलस्तथैवात्मा प्रकाशते ।
ज्ञानस्वरूपमेवाहुर्जगदेतद्विचक्षणाः ॥

(कूर्मपु.उत्त. १/२६)

तस्माद्विज्ञानमेवास्ति न प्रपञ्चो न संस्थितिः ।
अज्ञानेनावृतं लोके विज्ञानं तेन मुह्यति ।

तत्रैव, उत्त. १/३९)

विज्ञानं निर्मलं सूक्ष्मं निर्विकल्पं तदव्ययम् ।

(तत्रैव, उत्त. १.४०)

ज्ञानरूपं सदानन्दं प्राहुर्वैमोक्षसाधनम् ।

(नारदपु., पूर्वखण्डे ३३/११)

एकः शुद्धोऽक्षरो नित्यः परमात्मा जगन्मयः ।
नृणां विज्ञानभेदेन भेदवानिव लक्ष्यते ॥

(तत्रैव, उत्तरार्धे ३३/६१)

नमो विज्ञानमात्राय परमानन्दमूर्त्तये ।

(गरूडपु. आचारकाण्डे १९५/२)

अजममरमनन्तं ज्ञानरुपं महान्तम्.... ।

(तत्रैव, आचार. १/१)

एकमासीत्परं ब्रह्म सूक्ष्मं नित्यमतीन्द्रियम् ।
अव्यक्तं ज्ञानरूपेण द्वैतहीनविशेषणम् ॥

(कालिकोपपुराणे १२/७)

इत्येतेषु ज्ञानशब्देन चैतन्यस्यैवाभ्युपगमोऽवगन्तव्यस्तद्यथोक्तं, श्रीशिवपुराणे -

ज्ञानशब्दस्य पर्यायश्चिच्छब्दःस्त्रीत्वमागतः ।
प्रकाशश्चिच्च मिथुनं जगत्कारणतां गतम् ॥

(शिवपु. कैलाससंहिता १६/२७/२८)

इत्यत्र,

प्रज्ञानशब्दश्चैतन्यपर्यायःस्यान्नसंशयः ।
चैतन्यमात्मेति मुने शिवसूत्रं प्रवर्तितम् ॥
चैतन्यमिति विश्वस्य सर्वज्ञानक्रियात्मकम् ।
स्वातन्त्र्यं तत्स्वभावो यः स आत्मा परिकीर्तितः ॥

(तत्रैव, कै. सं. १६/४४-४५)

इत्यत्र च । तथैवास्यज्योतिरिति प्रकाश इति च समाख्यया समाम्नानं, यथा -

प्रत्यग्धामा स्वयञ्ज्योतिः

(श्रीमद्भा. ३/२६/३)

स्वयम्प्रकाशाय नमस्करोमि ।

(तत्रैव, ८/३/१६)

त्वं हि ब्रह्म परं ज्योतिः.... ।

(तत्रैव, १०/६३/३४)

एकं स्वयञ्ज्योतिरनन्तमव्ययम् ।

(तत्रैव, १०/७०/५)

आत्मा ह्येकः स्वयञ्ज्योतिः ..... ।

(तत्रैव, ११/८५/११)

ब्रह्म स्वयञ्ज्योतिरतो विभाति ।

(तत्रैव, ११/२८/२२)

एष स्वयञ्ज्योतिरजोऽप्रमेयो

महानुभूतिः सकलानुभूतिः ॥

(तत्रैव, ११/२८/३५)

प्रधानमव्ययं ज्योतिः.....

(वायुपु., पूर्वार्द्धे २४/३३)

उक्तेभ्यो व्यतिरिक्तोऽयमात्मा सर्वहृदि स्थितः ।
सर्वद्रष्टा च भोक्ता च नक्तमुज्ज्वलदीपवत् ॥

(अग्निपु. ३७७/७)

अहं ब्रह्म परञ्ज्योतिः ।

(तत्रैव, ३७७/१-२२)

परात्परतरं तत्त्वं परं ब्रह्मैकमव्ययम् ।
नित्यानन्दमयं ज्योतिरक्षरं तमसः परम् ॥

(कूर्मपु. १/९४)

अविकारमजं शुद्धं स्वप्रकाशं निरञ्जनम् ।

(नारदपु., पूर्वखण्डे ३३/११)

आनन्दमजरं ब्रह्म परं ज्योतिः सनातनम् ।

परात्परतरं यच्च तद्विष्णोः परमं पदम् ॥

(तत्रैव, पू. ख. ३३/२२)

ज्योतिः समूहं प्रलयेपुराऽऽसीत्केवलं द्विज ।

सूर्यकोटि प्रभं नित्यमसंख्यं विश्वकारणम् ॥

(ब्रह्मवैवर्तपु. ब्रह्मखण्डे २/४)

नमामि सर्वबीजं त्वां ब्रह्मज्योतिः सनातनम् ।

(तत्रैव, ब्र. ख. ४/४)

योगिभिश्चिन्त्यते योऽसौ वेदान्तान्तगचिन्तकैः ।

अन्तरन्तः परंज्योतिस्वरूपं प्रणमामि तम् ॥

(कालिकोपपुराणे १/२२)

प्रकाशकरणज्योतिः स्वरूपान्तरगोचरा ।

त्वमेव जङ्गमस्थेयरूपैका बाह्यगोचरा ॥

(तत्रैव, ५/४९)

सत्त्वोद्रेकप्रकाशेन यज्ज्योतिस्तत्त्वमुत्तमम् ।

स्वप्रकाशं जगद्धाम तत्त्वांशं महेश्वरि ॥

(तत्रैव, ८/१३)

अथ चैतन्यस्य ज्योतीरूपत्वं किन्निमित्तकमिति पर्यनुयोगे समादधाति स एव तत्रभवान् पुराणकारः -

चैतन्यस्य न दृश्यत्वं दृश्यत्वेजडमेव तत् ।

स्वप्रकाशश्च च चैतन्यं न परेणप्रकाशितम् ॥

अनवस्थादोषसत्त्वान्न स्वेनापिप्रकाशितम् ।

कर्मकर्तृविरोधःस्यात्तस्मात्तद्दीपवत्स्वयम् ॥

इति । (श्रीदेवीभागवतम् ७/३२/१२-१३)

अथायमत्र प्रयोगः -

चैतन्यं जडाद्भिन्नम् दृश्यभिन्नत्वात् । यद्यद् जडाद् भिन्नं न भवति तद् तद् दृश्यभिन्नं न भवति यथाघटः, न चेदं चैतन्यं तथा, तस्मान्न तथेति । इत्थं चैतन्यस्य

जड भिन्नत्वसिद्धये तस्य द्रष्टृत्वमवश्यमभ्युपगन्तव्यं, तद्दृष्टृत्वमेवात्र स्वयंज्योतिरित्यादि पदैःसाध्यते । तथा च सांख्यसूत्रमपि -

जडव्यावृतो जडं प्रकाशयति चिद्रूपः

(सां.सू. ६/५०)

यद्येकं चैतन्यं चैतन्यान्तरेण प्रकाश्यत इत्यभ्युपगम्येत तदपि नसत्, तदितरेतरकल्पना-गौरवादनवस्थाप्रसङ्गाद् द्वैतापत्तेश्च, यद्यंश विशेषेण प्रकाशकत्वमंशभेदेन च प्रकाश्यत्वमुपकल्प्येत तदप्यसमञ्जसमेव चैतन्य एकस्मिन् भेदकल्पनाया अप्रामाणिकत्वात्कर्मकर्तृ विरोधप्रसक्तेश्चेति प्रकाशकत्वमेवास्य सिद्धयति न प्रकाश्यत्वम् ।

किञ्च,

न तत्र सूर्यो भाति न चन्द्रतारकं
नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदं विभाति ॥

(मुण्डकोपनिषद् २/२/१०)

इति श्रुतिः,

न तद्भासयते सूर्यो न शशाङ्को न पावकः ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥

(श्रीमद्भगवद्गीता १५/६)

यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धिमामकम् ॥

(श्रीमद्भगवद्गीता १५/१२)

इति स्मृतिश्चापि सिद्धान्तमिमं दृढयतः । श्रीमदाद्यशङ्करभगवत्पादा अपि

"यतो यदुपलभ्यते तत्सर्वं ब्रह्मणैव ज्योतिषोपलभ्यते,
ब्रह्म तु नान्येन ज्योतिषोपलभ्यते स्वयं ज्योतिः

स्वरूपत्वात् ... ।"

(ब्रह्मसूत्रे १/३/२२ इत्यत्रशाङ्करभाष्यम्)

इति चैतन्यापरपर्यायस्य ब्रह्मणः स्वयम्प्रकाशकत्वमद्वैतवेदान्तदृशा समाम्नासिषुः पुराणेष्वपि श्रुतिमूलकस्यास्यैव सिद्धान्तस्य स्वीकाराच्चैतन्यस्य ज्योतीरूपत्वं सुतमां सङ्गच्छते । अथ साक्षाच्चिदिति शब्देन संविदिति शब्देनवा निर्देशो यथा -

एतद्रूपं भगवतो ह्यरूपस्य चिदात्मनः ।

(श्रीमद्भा. १/३/३०)

ब्रह्मन् कथं भगवतश्चिन्मात्रस्याविकारिणः ।
लीलया अपि युज्येरन् निर्गुणस्य गुणाः क्रियाः ॥

(तत्रैव, ३/७/२)

चिन्मात्रमेकमभयम्......

(तत्रैव, ४/७/२६)

अनामरूपश्चिन्मात्रः

(तत्रैव, ६/१६/२१)

तद्ब्रह्म परमं सूक्ष्मं चिन्मात्रं सदनन्तकम् ।

(तत्रैव, १०/८८/१०)

ॐ सर्वचैतन्यरुपां तामाद्यां विद्याञ्च
धीमहि । बुद्धिः या नः प्रचोदयात् ।

(श्रीदेवीभा.पु. १/१/१)

चैतन्यं सर्वभूतेषु यत्तद्विद्धि परात्मकम् ।
तेजः सर्वत्रगं नित्यं नानाभावेषु नारद ॥

(तत्रैव ३/७/११)

अहमेवास पुर्वं तु नान्यत्किञ्चिन्नगाधिप ।
तदात्मरूपं चित्संवित्परब्रह्मैकनामकम् ॥

(तत्रैव, ७/३२/२)

मनो महान्मतिर्ब्रह्मा पूर्बुद्धिःख्यातिरीश्वरः ।
प्रज्ञा चितिःस्मृतिःसंवित् विपुरं चोच्यते बुधैः ॥

(वायु पु., पूर्वार्द्धे प्रक्रियापादे ६/२५)

दिक्कालाद्यनवच्छिन्नं नित्यम् चिन्मात्रमव्ययम् ।

(वराहपु. उत्तरार्द्धे ४२/२९)

एवं ब्रह्मणि चिन्मात्रे.....

(तत्रैव, उत्त. ४२/५३)

यन्निस्सङ्गं चिदाकाशं ज्ञानरूपमसंवृतम् ।

(तत्रैव, उत्त. ४२/९८)

अहं साक्षी च चिन्मात्रः

(अग्नि पु. ३७७/२०)

आत्मायं केवलः स्वच्छः शुद्धःसूक्ष्मः सनातनः ।
अस्ति सर्वान्तरः साक्षाच्चिन्मात्रस्तमसः परः ॥

(कूर्मपु., उत्तरार्द्धे १/४)

कूटस्थो निर्गुणो व्यापी चैतन्यात्मा स्वभावतः ।

(तत्रैव, उत्तरार्द्धे, १/२७)

नमो भूम्यादिरूपाय नमश्चैतन्यरूपिणे ।

(नारदपु. ४/५९)

चैतन्यमिति विश्वस्य सर्वज्ञान क्रियात्मकम् ।
स्वातन्त्र्यं तत्स्वभावो यः स आत्मा परिकीर्तितः ॥

(शिवपु., कैलास. ६/१६/४५)

वेदाहमेतं पुरुषं चिद्रूपं तमसः परम् ।
सोऽहमस्मीति मोक्षाय नान्यः पन्था विमुक्तये ॥

(गरुडपु., आचारकाण्डे २३६/६)

सर्वात्मकश्च वै यावदात्मचैतन्यरूपकम् ।
शुभमेकाक्षरं विष्णुं सदा ध्यायन् विमुच्यते ॥

(तत्रैव, आचारं. २३२/१४)

विशतु हृदयपद्मे सर्वसाक्षी चिदात्मा ।

(तत्रैव, आचार. २३४/६१)

त्वंचितिः परमानन्दा परमात्मस्वरूपिणी ।

(कालिकोपपुराणे ५/१७)

चितिशक्तिं निर्विकारां परमब्रह्मरूपिणीम् ।

प्रणमामि महामायां योगनिद्रां सनातनीम् ॥

(तत्रैव २७/३१)

इत्थं सर्वत्रापि पुराणकदम्बे ब्रह्मस्वरूपमात्मस्वरूपं वा चैतन्यमित्यभिप्रेतं दृश्यते।

नास्तिकास्तिकोभयभेदभिन्नेषु भारतीयदर्शनेषु चैतन्यविषयिव्यवधारणायां ते ते वादिनो मिथो भिद्यन्ते तत्र क्षित्यम्ब्वग्निवाय्वात्मकस्य देहाकारपरिणतस्य भूतचतुष्टयस्य चैतन्यमागन्तुको धर्मः किण्वादिभ्यो मदशक्तिवत्ताम्बूलपूग-चूर्णखदिरादिसं-योगाद्रागोत्पत्तिवद् वेति देहात्मवादिनां चार्वाकाणामभिमतिः । माध्यमिक-योगाचारसौत्रान्तिकवैभाषिकसञ्ज्ञाभिश्चतुःसम्प्रदायिनो बौद्धाः:क्रमेणशून्य-वादविज्ञानवादबाह्यार्थानुमेयवाद बाह्यार्थप्रत्यक्षवादांश्चातिष्ठन्ते, चतुर्णामप्यमीषांमते स्पष्टतरा न चैतन्यावधारणा दृष्टिपथमायाति, कथञ्चिद्विज्ञानवादिनामालय-विज्ञानमेवात्र चैतन्यमिति वक्तुमुचितम् । आर्हतास्तावद् जीवाजीवयोर्भेदकतत्त्वरूपेण चैतन्यमभि प्रयन्ति तत्र बोधाख्यचैतन्यात्मको जीवोऽबोधात्मकस्त्वजीवः - चिदचिद् द्वे परे तत्त्व इति पद्मनन्दिवचनप्रामाण्यात्[५] । अक्षपादीये काणादे च समानतन्त्रे नयद्वये, चैतन्यस्यात्मरूपत्वं नाङ्गीकृतमपि तु ज्ञानाभिन्नत्वेन तद्गुणत्वमेवाम्नातम् । सांख्यास्तत्समान धर्माणो योगाश्च पुरुषस्वरूपत्वेन चैतन्यं स्वीकुर्वाणास्तस्य बुद्धौ प्रतिबिम्बितत्वेन बुद्धिवृत्यनुकरणत्वमापादयन्ति इत्थं बुद्धिपरिणामेन ज्ञानेन साकमत्र चिद्रूपस्यपुरूषस्य पार्थक्यं सुतरामायाति । मीमांसकानां भाट्टप्रघट्टके, सांख्या-दिवदात्मनः स्वरूपेण चैतन्यमभिमतं न दृश्यते, एभि : - 'अहं प्रत्ययेनहिचैतन्यस्वभावस्यात्मनोऽस्तित्वमात्रमवगम्यते[६] भूतेन्द्रियविज्ञाना-नामसञ्ज्ञित्वम् -चैतन्यमन्यस्तु तेभ्यो नित्यश्चेतन[७] आत्माचैतन्यन्याश्रय[८]

इत्यादिभिर्वचनैर्नित्यज्ञानशक्तिमत्वेन रूपेणैवात्मनश्चैतन्यं प्रसाध्यते । अस्मादेव कारणादनुकूलासु स्थितिषु शरीरेन्द्रियविषयेषु सत्स्वात्मन्युत्पन्नं ज्ञानात्मकं चैतन्यमात्मनः स्वभावत्वेन गृहीतुंशक्यते शरीरेन्द्रियाद्यभावरूपायां प्रति-कूलावस्थायां सुषुप्तौ मुक्तौ वा, ज्ञानात्मकस्य चैतन्यस्यास्तित्वं च नाङ्गीक्रियत इति विलक्षणश्चैतेषामयमात्मचैतन्यवाद इति तज्ज्ञा विमृशन्ति[९] । विशिष्टाद्वैत-वादिनश्चिच्छब्देन ईश्वरात्पृथगवस्थितानां जीवानामभिप्रयणमुदीरयन्ति ते चासङ्कुचितापरिच्छिन्ननिर्मलज्ञानरूपा अप्यनादिकर्म-रूपाऽविद्यावेष्टिता अचित्संसर्गेण तदनुगुणसुखदुःखभोक्तारो भगवत्प्रतिपत्तिप्रतिपन्नाश्च तत्पदमुपगन्तारश्च नित्या - द्वासुपर्णेति श्रवणादित्या-करग्रन्थेष्ववगन्तव्यम् । शैवाध्वनि पाशुपतदर्शने च, चैतन्यं दृक्क्रियारूपं मुक्त्यपरपर्यायं शिवपदमित्युच्यते । बद्धो जीवः पशुसञ्ज्ञकः पाशप्रहाणान्ते, "पाशान्ते शिवताश्रुतेः" इति मृगेन्द्राचार्यवचनाच्छिवत्वमुपयाति । सिद्धान्तेऽस्मिन् यद्यपि दृक्क्रियारूपंचैतन्यमात्मनि सर्वदा सर्वतश्च तिष्ठति तथाप्यस्य सर्वतोमुखात्मकः प्रभावो मुक्तावेव प्रकाशतेतराम् । अस्यैव भेदविशेषे प्रत्यभिज्ञादर्शने चैतन्यात्मा महेश्वरः, 'तमेव भान्तमनुभातीति' श्रुत्या प्रकाशचिदूपमहिम्ना सर्वस्य भावजातस्य भासकत्वमभ्युपेयते । एवमत्र चैतन्यमेव प्रकाशपदवाच्यं प्रामातृस्वरूपमात्मेत्यवगम्यते तथा चात्र शिवसूत्रं, 'चैतन्यमात्मेति'[१०] । एवमेव, केवलाद्वैतवेदान्तिनांराद्धान्तेऽपि 'सत्यंज्ञानमनन्तंब्रह्म'[११], 'प्रज्ञानं ब्रह्म'[१२], 'स यथा सैन्धवघनोऽनन्तरोऽबाह्यःकृत्स्नो रसधन एवैवं वाऽरेऽयमात्मानन्तरो बाह्यः कृत्स्नः प्रज्ञानघनएव[१३], "साक्षीचेता केवलो निर्गुणश्च[१४]", नित्यो नित्यानां चेतनश्चेतनानाम्[१५] इत्यादिभिः श्रुत्यन्त देशनाभिः चैतन्यमात्मनः स्वरूपमेवेति सङ्क्षेपेण दर्शनवीथीस्वभिमतं चैतन्यस्वरूपसारमावेदितमत्र येन पुराणेषु प्रतिपादितस्यापि चैतन्यस्वरुपस्यावधारणं सुगमं स्यात् ।

यद्यपि विविधेषु पुराणेषु तत्र तत्र प्रसङ्गविशेषे सांख्यादिसमेषामपि दर्शनानामन्वितिः प्रागुक्तरीत्या समुपलभ्यते तथाप्यद्वैतवेदान्तस्य मुख्याचार्यत्वेन, ब्रह्मसूत्ररूपवेदान्तस्य तर्कप्रस्थानप्रणेतृत्वेन च प्रथितस्य तत्रभवतः श्रीकृष्णद्वैपायनव्यासस्यैव पुराणसम्पादकत्वाङ्गीकारात् पुराणेषु वेदान्तसिद्धान्तानां

माहात्म्यं विशेषेण वरीवर्तीत्यत्र चैतन्याभिस्वीकृतिः प्रायस्तमेव पन्थानमनुसरन्ती दृश्यते, तद्यथा श्रीमद्भागवते -

एक एवाद्वितीयोऽभूदात्माधारोऽखिलाश्रयः ।
परावराणां परम आस्ते कैवल्यसञ्ज्ञितः ॥
केवलानुभवानन्दसन्दोहो निरूपाधिकः ।
केवलात्मानुभावेन स्वमायां त्रिगुणात्मिकाम् ॥
सङ्क्षोभयन्सृजत्यादौ तया सूत्रमरिन्दम ।
तामाहुस्त्रिगुणव्यक्तिं सृजन्तीं विश्वतोमुखम् ।
यस्मिन् प्रोतमिदं विश्वं येन संसरते पुमान् ।
यथोर्णनाभिर्हृदयादूर्णा सन्तत्य वक्त्रतः ।
तया विहृत्य भूतस्तां ग्रसत्येवं महेश्वरः ॥

श्रीमद्भा. ११/९/१७-२१)

यथा वा, देवीभागवते -

अहमेवास पुर्वं तु नान्यत्कश्चिन्नगाधिप ।
तदात्मरूपं चित्संवित्परब्रह्मैकनामकम् ॥ इति ।

(७/३२/२)

अत्र चैतन्यस्वरूपस्यात्मनः परब्रह्मणो वाऽद्वैततासुस्पष्टं दर्शिता पुराणर्षिणा । यथा सांख्यदर्शने प्रकृतिर्जडरूपा, तज्जातं निखिलमपि वस्तुजातं जडमिति निरूप्यते तथैवात्रापि -

देहस्त्वचित्पुरुषोऽयं सुपर्णः

(श्रीमद्भा. ११/२३/५५)

दारुवदचिद्देहः (तत्रैव ११/२८/१२)

असत्यं यज्जडं दुःखमवस्त्विति निरूपितम् ।

वाराहपु. उत्तरार्द्ध ४२/३५

देह आत्मा न भवति दृश्यत्वाच्च घटादिवत् ।
प्रसुप्ते मरणे देहादात्माऽन्यो ज्ञायते ध्रुवम् ॥

देहः सचेद् व्यवहरेदविकार्यादिसन्निभः ।

चक्षुरादीनीन्द्रियाणि नात्मा वै करणं त्वतः ।

मनो धीरपि आत्मा न दीपवत्करणं त्वतः ॥

प्राणोऽप्यात्मा न भवति सुषुप्ते चित्प्रभावतः ।

***

अहङ्कारोऽपि नैवात्मा देहवद् व्यभिचारतः ।

उक्तेभ्यो व्यतिरिक्तोऽयमात्मा सर्वहृदिस्थितः ॥

सर्वद्रष्टा च भोक्ता च नक्तमुज्वल दीपवत् ।

(अग्निपु. ३७७/२-७)

इत्येवमादिभिर्वचनैः प्रकृतिर्जडाचिद्भिन्नेति प्रतिपाद्यते किन्त्वेषा प्रातिभासिकी स्थितिः ।

सर्वंखल्विदं ब्रह्मेति[१६] श्रवणात्पारमार्थिकदृष्ट्या तु निरिवलमपि प्रपञ्चजातं चिदात्मन्यध्यस्तं भ्रमात्मकमेव -

तस्माद्विज्ञानमेवास्ति न प्रपञ्चो न संस्थितिः ।

(कूर्मपु. उत्तरार्द्धे १/३९)

एकःशुद्धोऽक्षरो नित्यः परमात्मा जगन्मयः ।

नृणां विज्ञानभेदेन भेदवानिव लक्ष्यते ॥

एक एव परानन्दो निर्गुणः परतः परः ।

भाति विज्ञानभेदेन बहुरूपधरोऽव्ययः ।

(नारद पु. पू.ख. ३३/६१, ६७)

यदि शुद्धाद्वैतादिरीत्या कथञ्चि त्प्रकृतिजातानां पदार्थानां जगतोवासत्यत्वमभ्युपगम्येत तदा तेऽपि

चित्तत्त्वस्यैव स्वरूपभूता, यथोक्तं वायुपुराणे -

मनुते सर्वभूतानां यस्माच्चेष्टाफलं विभुः ।

सौक्ष्मत्वेन विवृद्धानां तेन तन्मनउच्यते ॥

तत्त्वानामग्रतो यस्मान्महांश्च परिणामतः ।

शेषेभ्योऽपि गुणेभ्योऽसौ महानिति ततःस्मृतः ॥

(पूर्वार्द्धे, प्रक्रिया, ६/२६-२७)

त्वमेव जङ्गमस्थेयरूपैका बाह्यगोचरा ।

इति कालिकोपपुराणे च [१७] । एवमेव देवीभागवते, भगवत्या जगज्जनन्याः प्रकृतिरूपत्वेऽपि चैतन्यसमवेतत्वमेवाभिमतं ग्रन्थकारेण -

सांख्या वदन्ति पुरुषं प्रकृतिश्चयां तां
चैतन्यभावरहितां जगतश्चकर्त्रीम् ।
किं तादृशासि कथमत्र जगन्निवास -
श्चैतन्यताविरहितो विहितस्त्वयाद्य ॥

(देवीभा. १/७/२१)

इत्यादौ ।

व्यावहारिकदृष्ट्या तु पुराणकृन्महर्षिः -

भूतेन्द्रियान्तःकरणप्रधानविषयात्मकम् ।
अपरं ब्रह्म निर्दिष्टं परं ब्रह्म चिदात्मकम् ॥

(शिवपु. ७/४/४)

स्थूलसूक्ष्मादि भेदेन द्वेरूपे परमात्मनः ।
ज्ञानरूपं निराकारं निदानं तत्प्रचक्षते ॥

***

तदा भूत विभागे च चैतन्ये च प्रकाशिते ।
चैतन्यस्य प्रवेशाच्च तदाऽहमिति संशयः ।
प्रतीयमाने तेनैव विशेषेणाभिमानतः ॥
आदिनारायणो देवो भगवानिति चोच्यते ।

(देवीभा. ३/७/३९, ४६, ४७)

इत्याद्युक्त्या ब्रह्मणो चिदचिदात्मकंरूपद्वयं समर्थयति । तत्र परमात्मा जीवात्मा

चोभौ चित्कक्षान्तर्गतौ शेषं त्वचित्, चैतन्यप्रकाशेन प्रकाश्यमिति विवेकः। जीवोऽपि चिद्रूपस्य परमात्मन एव कलाविशेषो वनोपहिताऽऽकाशान्तर्गतवृक्षोपहिताकाशवद् यथोक्तं पारमहंस्य संहितायां श्रीमद्भागवत महापुराणे -

अहं सर्वेषु भूतेषु भूतात्मावस्थितः सदा ।

(३/२९/२१)

इत्यत्र,

ईश्वरो जीवकलया प्रविष्टो भगवानिति ।

(३/२९/३५)

इत्यत्र च । निर्विशेषं ब्रह्मैव वास्तविकं विशुद्धञ्च चैतन्यं लीलादृष्ट्या स्वात्ममाययाऽसौ प्रकृतिपुरुषात्मकञ्च द्विविधस्वरूपमङ्गीकरोति । चैतन्यात्मना पुरुषरूपेणायं सृष्टेरस्य निमित्तकारणत्वं, प्रकृतिरूपेणचोपादानकारणत्व समवायिकारणत्वं वा स्वस्मिन् दधाति -

चैतन्यस्य समायोगान्निमित्तत्वञ्च कथ्यते ।

प्रपञ्चपरिणामाच्च समवायित्वमुच्यते ॥

(देवीभा. ७/३२/८)

प्राकृतपिण्डरूपजडसमुदायमयमेव, तत्सृष्ट्वा तदेवानु प्राविशदिति[१८] श्रुत्या तदाविश्य चैतन्यमिवावभासयति, यथोक्त, श्रीमद्भागवते -

कालसञ्ज्ञां तदा देवीं बिभ्रच्छक्तिमुरुक्रमः ।

त्रयोविंशतितत्त्वानां गणं युगपदाविशत् ॥

सोऽनुप्रविष्टो भगवान् चेष्टारूपेण तं गणम् ।

(३/६/३)

सृष्ट्वाग्रे महदादीनि सविकाराण्यनुक्रमात् ।

तेभ्यो विराजमुद्धृत्य तमनु प्राविशद्विभुः ॥

(३/७/२१)

चित्तेन हृदयं चैत्यः क्षेत्रज्ञः प्राविशद् यथा ।
विराट् तदैव पुरुषः सलिलादुदतिष्ठत् ॥

(३/२६/७०)

सर्गपर्याये, पुरुषाधिष्ठितप्रकृत्या महत्तत्त्वं ततो वैकारिकस्तैजस[१९] स्तामसश्चेति त्रिविधोऽहङ्कारोजायते, वैकारिकादहङ्कारान्मन इन्द्रियाधिष्ठातृ-देवताश्च भवन्ति, तैजसा - द्दशेन्द्रियाणि, तामसाच्चपञ्च महाभूतान्याविर्भवन्ति।

अत्र यद्यपि मन इत्यादिकं ज्ञानशक्तित्वेन व्यपदिष्टं किन्तु तत्स्वरूपं तु चैतन्यं न भवति तत्र मूलचैतन्यस्यैव तादात्म्याध्यासो ज्ञानेच्छादिरूपेणादर्शप्रतिबिम्बितरविप्रकाशवत्प्रकाशते। आत्मस्वरूपं मुख्यचैतन्यं त्वेतेभ्यः पृथगेव, द्रष्टृरूपत्वात् मन आदीनाञ्च दृश्यपरिसीम्नि समापतितत्वात्, तच्चोक्तं तत्रैव, यथा-

यथा जलस्थ आभासः स्थलत्वेनावदृश्यते ।
स्वाभासेन तथा सूर्यो जलस्थेन दिविस्थितः ॥

(श्रीमद्भा. ३/२७/१२)

यथा पुत्राच्च वित्ताच्च पृथङ्मर्त्यःप्रतीयते ।
अप्यात्मत्वेनाभिमताद् देहादेः पुरूषस्तथा ॥
यथोल्मुकाद्विस्फुलिङ्गाद्धूमाद्वापिस्वसम्भवात् ।
अप्यात्मत्वेनाभिमताद् यथाग्निः पृथगुल्मुकात् ॥

(तत्रैव, ३/२८/४०)

भूतेन्द्रियान्तःकरणात्प्रधानाज्जीवसञ्ज्ञितात् ।
आत्मा तथा पृथग्द्रष्टा भगवान् ब्रह्मसञ्ज्ञितः ॥

(तत्रैव ३/२८/४१)

जीवात्मनो जाग्रत्स्वप्नसुषुप्तिसञ्ज्ञकासुतिसृस्वप्यवस्थासु चैतन्यमनुविद्धमपि ताभ्यः सुतरामतीतं तुरीयत्वेनाभिमतं वेदान्तवादिभिरिव पुराणेष्वपीति तत्र तत्र बहुत्र, शक्यतेऽधिगन्तुं, कानिचन निदर्शनपद्यानि, यथा -

जीवे जाग्रति विश्वाख्यं स्वप्ने यत्तैजसंस्मृतम् ।

सुषुप्ते प्राज्ञसञ्ज्ञं तत्सर्वावस्थासु संस्मृतम् ॥

(वराहपु., उत्तरार्द्धे ४२/३६)

अहं साक्षी च चिन्मात्रो जाग्रत्स्वप्नादिकस्य च

(अग्निपु. ३७७/२०)

बुद्धेर्जागरणं स्वप्नः सुषुप्तिरितिवृत्तयः ।
ता येनैवानुभूयन्ते सोऽध्यक्षःपुरुषः परः ॥

(श्रीमद्भा. ७/७/२५)

जाग्रत्स्वप्नसुषुप्तैश्च विहीनो वैचतुर्थकः ।

(गरुडपु., आचारकाण्डे १५/१४७)

अपिच, यथा पञ्चदश्यां,

शब्दस्पर्शादयो वेद्या वैचित्र्याज्जागरे पृथक् ।
ततो विभक्ता तत्संविदैकरूप्यान्न भिद्यते ॥
तथा स्वप्नेऽत्र वेद्यं तु स्थिरं जागरे स्थिरम् ।
तद्भेदोऽतस्तयोः संविदेकरूपा न भिद्यते ।
सुप्तोत्थितस्य सौषुप्ततमोबोधो भवेत्स्मृतिः ।
सा चावबुद्धविषयाऽवबुद्धं तत्तदा तमः ॥
सबोधो विषयाद्भिन्नो न बोधात्स्वप्नबोधवत् ।
एवं स्थानत्रयेत्येका संवित्तद्वद् दिनान्तरे ॥
मासाब्दयुगकल्पेषु गतागम्येष्वनेकधा ।
नोदेति नास्तमेत्येका संविदेषास्वयम्प्रभा ॥

(पञ्चदशी, तत्त्वविवेकप्रकारणे ३-७)

इत्यवस्थाभेदेष्वपि संविदपरपर्यायस्य चैतन्यस्यभिन्नत्वमेवोपदर्शितं तथैवात्र श्रीदेवीभागवतेऽपि तदेव सिद्धान्तितं, तद्यथा -

जग्रत्स्वप्नसुषुप्त्यादौ दृश्यस्य व्यभिचारतः ।
संविदो व्यभिचारश्च नानुभूतोऽस्ति कर्हिचत् ॥

यदि तस्याप्यनुभवस्तर्ह्ययं येन साक्षिणा ।
अनुभूतः स एवात्र शिष्टः संविद्वपुः पुरा ॥
अत एव च नित्यत्वं प्रोक्तं सच्छास्त्रकोविदैः ।
(७/३२/१५-१७)

इत्थं, यदद्वयं क्षेत्रज्ञरूपं, तदेव चैतन्यमन्यन्मनोबुद्धिचित्ताहङ्काराणाम् यावत्यो विकृतयस्ताश्चैतन्याधिष्ठितत्वात् चैतन्यत्वेन भासमाना अपि जडरूपाक्षेत्रान्तर्भूता एवेति प्रकरणस्यास्य हार्दं, तच्च सुनिपुणमभ्यधायि भगवता भागवतकारेण, तत्र मनोबुद्ध्यादीनां जडप्रकृतिजन्यत्वं, यथा -

वैकारिका[२०]द्विकुर्वाणान्मनस्तत्त्वमजायत ।
यत्सङ्कल्पविकल्पाभ्यां वर्तते कामसम्भवः ॥
तेजसात्तु विकुर्वाणाद् बुद्धितत्त्वमभूत्सति ।
द्रव्यस्फुरणविज्ञानमिन्द्रियाणामनुग्रहः ॥
संशयोऽथ विपर्यासो निश्चयःस्मृतिरेव च ।
स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितःपृथक् ॥
(श्रीमद्भा. ३/२६/२७, २९)

आपि च,

सर्वे गुणमया भावाः पुरुषाव्यक्तधिष्ठिताः ।
दृष्टं श्रुतमनुध्यातं बुद्ध्या वा पुरुषर्षभ ॥
एताः संसृतयः पुंसो गुणकर्मनिबन्धनाः ।
(तत्रैव ११/२५/३१-३२)

इति क्षेत्रान्तर्गतानि बुद्ध्यादीनि तत्त्वानि लौकिकजनैश्च चैतन्य-लक्षणत्वेनाङीकृतानि निश्चयादीनि, सङ्कल्पविकल्पादीनि, हर्षशोकभयादीनि कामक्रोधलोभमोहादीनि तद्विकाराणि सर्वाण्यप्यचेतनान्येव, चेतनस्तु क्षेत्रज्ञः प्रत्यगात्मा परमात्मा वेति पुराणकारस्याशयः ।

ननु,

महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च ।
इन्द्रियाणि दशैकञ्च पञ्च चेन्द्रियगोचराः ।
इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः ।
एतच्छेत्रं समासेन सविकारमुदाहृतम्[२१]॥

इति भगवदुक्तिप्रामाण्याच्चेतनाया अपि क्षेत्रान्तःपातित्वात्कथं, 'चेतनः प्रत्यागात्मा परमात्मा वेति', भवदुक्तं स्वीकर्तुंशक्नुम इति चेत्कैश्चिदुच्येत तद्ब्रूमः - अत्र शब्दस्यास्य चैतन्यतादात्म्याध्यास एव पूर्वनिरूपिते प्रवृत्तिनिमित्तत्वं, यदाहुः, श्रीमच्छङ्करभगवत्पादाः-

सङ्घातो देहेन्द्रियाणां संहतिः । तस्यामभिव्यक्तान्तःकरणवृत्तिस्तप्त इव लोह पिण्डेऽग्निरात्मचैतन्याभासरसविद्धा चेतना, सा च क्षेत्रं ज्ञेयत्वात् ।[२२]

इत्थमत्र स्वरूपज्ञानव्यञ्जिका प्रमाणासाधारण कारणिका चित्तवृत्तिरेव ज्ञानाख्या[२३] चेतनेति पदेनाख्याता भगवता सा दृश्यत्वात् क्षेत्ररूपिण्येव, एतदेव समर्थयन्नाह शुकोऽपि भगवाञ्छ्रीमद्भागवते -

देहेन्द्रियप्राणमनोधियोऽमी
यदंशविद्धाः प्रचरन्ति कर्मसु ।
नैवान्यदा लोहमिवाप्रतप्तं
स्थानेषु तद्द्रष्ट्रपदेशमेति ॥
(६/१६/२४)

इत्यभियुक्तजनवाचो युक्त्या पुराणमणेश्च समार्थितत्वाद्भगवद्-वचनाविरोधिन्येवास्म त्प्रतिपत्तिः, पर्यन्ते त्विदमेवोक्त्वा विरम्यते, यथा -

पौराणींयं विमला
भगवद्व्यासस्य कीर्त्तिकल्याणी -
वाणी, बिभर्ति स्वस्मिन्

तत्सिद्धान्तस्य[२४] सारसर्वस्वम् ॥

अत्र प्रकरणमात्तं

यच्चैतन्यस्य चित्रणं चारु ।

उपनिषदां गीताया -

स्तदभिमतं ब्रह्मसूत्रकस्यापि ॥

इति दिक् ।

१. पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥
(याज्ञवल्क्यस्मृतिः १/३)

२. ऋग्वेदो यजुर्वेदः सामवेद आथर्वणश्चतुर्थ इतिहासपुराणः पञ्चमो वेदानां वेदः ।
(छान्दोग्योपनिषद् ७/२/१)

३. ब्राह्मंपाद्मं वैष्णवञ्च शैवं भागवतं तथा ।
तथान्यं नारदीयञ्च मार्कण्डेयञ्च सप्तमम् ॥
आग्नेयमष्टमञ्चैव भविष्यन्नवमं स्मृतम् ।
दशमं ब्रह्मवैवर्तं लैङ्गमेकादशं स्मृतम् ॥
वाराहं द्वादशञ्चैव स्कान्दञ्चात्र त्रयोदशम् ।
चतुर्दशं वामनञ्च कौर्मं पञ्चदशं तथा ॥
मात्स्यञ्च गारुडञ्चैव ब्रह्माण्डञ्च ततः परम् ।
महापुराणान्येतानि ह्यष्टादश महामुने ॥
(श्रीविष्णुपु. ३/६/२१-२४)

४. तथैवोपपुराणानि श्रृण्वन्तु ऋषिसत्तमाः ।
सनत्कुमारं प्रथमं नारसिंह ततः परम् ॥
नारदीयं शिवञ्चैव दौर्वाससमनुत्तमम् ।
कापिलं मानवञ्चैव तथा चौशनसंस्मृतम् ॥
वारुणं कालिकाख्यञ्च साम्बं नन्दिकृतं शुभम् ।
सौरं पाराशरं प्रोक्तमादित्यञ्चातिविस्तरम् ॥
माहेश्वरं भागवतं वासिष्ठञ्च सविस्तरम् ।

एतान्युपपुराणानि कथितानि महात्मभिः ॥

(श्री देवीभागवतम् १/३/१३-१६)

५. द्रष्टव्यं, 'सर्वदर्शनसङ्ग्रहे' 'आर्हतदर्शनम्' इति प्रकरणम् ।

६. अजितोपेतं 'तन्त्रवार्तिकम्' पृ.स. ६३, गङ्गनाथ झाकेन्द्रीयसंस्कृत-विद्यापीठप्रयाग इत्यनेन प्रकाशितम् (१९६०)

७. श्लोकवार्तिकस्य न्यायरत्नाकराख्यटीकायाम् द. 'श्लोकवार्तिकम्' पृ.सं. ५१४, पङ्क्तिः २७, तारापब्लिकेशंस वाराणसी १९७८

८. मानमेयोदयः पृ.सं. १८३, चौखम्बाविद्याभवन, वाराणसी १९९६

९. द्रष्टव्यमस्मिन्नेव ग्रन्थे प्रकाशितो डॉ. सोमनाथनेने महाभागानां लेख : - 'मीमांसायां चैतन्यावधारणा' इति ।

१०. शिवसूत्रम् १/१

११. तैत्तिरीयोपनिषद् ३/५

१२. ऐतरेयोपनिषद् ५/३, आत्मबोधोपनिषद् १

१३. बृहदाण्यकोपनिषद् ४/५/१३

१४. श्वेताश्वतरोपनिषद् ६/११

१५. तत्रैव ६/१३

१६. छान्दोग्योपनिषदि ३/१४/१

१७. ५/४१

१८. तैत्तिरीयोपनिषदि २/६

१९. वैकारिक इति सात्त्विकस्तैजस इति राजसो बोध्यः

२०. वैकारिकादिति - प्रकृतिजन्यमहत्तत्त्व तज्जन्यस्त्रिविधोऽहङ्कारः सात्त्विकराजसताम-साख्यस्तस्यान्यतम भेदात्सात्त्विकाहङ्कारादित्यर्थः ।

२१. श्रीमद्भगवद्गीता १३/५-६

२२. श्रीमद्भगवद्गीता १३/६ इत्यत्र शाङ्करभाष्यम्

२३. दष्टव्योऽत्रैव श्रीमधुसूदनसरस्वतीकृता गूढार्थदीपिका (ख्या) व्यारव्या

२४. ततसिद्धान्तस्य - वेदान्तदर्शनस्य, व्यासस्यैव तत्प्रतिपादकाचार्यरूपेण सुप्र-सिद्धत्वा-दित्याशयः

# तान्त्रिकवाङ्मये चैतन्यम्

डॉ. राधेश्यामचतुर्वेदी

किंनाम तन्त्रम् - तन्त्रशब्दः विस्तारस्यबोधकः । तनु विस्तारे इति धातोः 'अल्' अथवा 'ष्ट्रन्' प्रत्यये कृते तन्त्रशब्दस्य निष्पत्तिभवति । एष च विस्तारो जीवापरनामधेयस्य सङ्कुचित शिवस्य भवति । परमशिवः स्वेच्छया स्वस्वा-तन्त्रयेणात्मानं सङ्कुचितं कृत्वा जडचेतननानारूपैः स्फुरति । पश्चाच्चानेकै-रुपायैरात्मन आवरणमपसार्य स्वं विस्तारयति पूर्णरुपतां वा प्रापयति । यया प्रक्रियया परमशिवः आत्मानं विश्वरुपेणोत्ल्लासयति पश्चाच्च स्वकीये रुपे स्वस्थो भवति सैव प्रक्रिया तन्त्रशास्त्रस्य वर्ण्यविषयः। तन्त्रमात्मदर्शनस्यै-काव्यवस्थाऽस्ति । इदमेकोराजपथः, एकाकला, एका वा वैज्ञानिकीविधिर्या द्रुतगत्या आत्मसाक्षात्कारं सम्पादयति पूर्णाहन्तां च प्रापयति । यद्यपि तन्त्रमेकं स्वतन्त्रं वर्ण्यवस्तु भूतं तथापीदं मध्यवर्त्तीबिन्दुः । अस्मात्पूर्वं मन्त्रः पश्चाच्च यन्त्रमास्ति । इमानि मन्त्रतन्त्रयन्त्राणि परस्पराश्रितानि । एकस्याभावे इतरद्द्वयमपूर्णम् । को नाम मन्त्रः ? - इति जिज्ञासायां यद्यपि मननात्त्राणनाच्च मन्त्रः - इति मन्त्र शब्दस्य व्युत्पत्तिः सर्वजनप्रसिद्धा तथाप्यद्यत्वे मन्त्रशब्दस्यार्थोऽस्ति सूत्रम् - फार्मुला - । मन्त्राः सूत्ररूपाः पदार्थानां मूलस्वरुपस्य विज्ञापयितारः । पदार्थानां मूलस्वरूपं ज्ञात्वा तेषां संयोगेन मिश्रणेन वा संभाव्य स्थितीनां ज्ञानं तन्त्रमित्युच्यते। अस्य संयोगस्य मिश्रणस्य वा अङ्कैरक्षरै रेखामिश्च चित्रणं यन्त्रमित्यभिधीयते । परमतत्त्वमेकं ज्ञानातीतं निष्कलं निर्भिन्नमवाच्यं चास्ति । तद् यदा स्वेनैवैश्वर्येण ज्ञानमयीमवस्थामासादयति तदा मन्त्र इत्युच्यते । इयं च ज्ञानमयी अवस्था यदा क्रियारुपतामाप्नोति तदा सा तन्त्रमित्यभिधीयते । मन्त्रेषु वर्णसमुदायरूप पदानां प्राधान्यं भवति तन्त्रे च क्रियायाः । मन्त्राणां जपेन शरीरस्थकोशा विकसिता भवंति । एतद्विकासद्वाराऽर्जित शक्त्या साधकः चक्राणां (मूलाधारादीनाम्) भेदनं करोति। एतस्मिन् कार्ये प्रतीकरूपं यन्त्रं सहायकं भवति ।

तन्त्रस्य अस्ति पक्षद्वयम् - (१) लौकिकमथवा व्यावहारिकम् (२) अलौकिकमथवाऽऽध्यात्मिकम्। विश्वविस्तारस्य माध्यमेन प्रवृत्तेरवाच्यसत्तायाश्च ज्ञानं पश्चाच्च तस्यः प्रकृतेः मानवानां हितायोपयोगः तन्त्रस्य त्नौकिकः पक्षः। विश्वविस्तारं परिज्ञाय तस्य मूलस्य अन्वेषणं तन्त्रस्याध्यात्मिकः पक्षः। वेदा निवृत्तिपराः अतएव ते केवलं मुक्तये साधकतां भजन्ति। धर्मार्थकामास्तेषामानुषङ्गिकं लक्ष्यं मुक्तिश्च परमं फलम्। तन्त्रशास्त्रं प्रवत्तिनिवृत्युभयफलम्। प्रवत्तिद्वारा तद् व्यक्ते समाजस्य वा हितं सम्पादयति। निवृत्तिद्वारा समस्ते विश्वस्मिन् एकत्वस्याद्वितीयत्वस्य वा दर्शनं तेन च तादात्म्यस्थापनं तन्त्रस्य परा कोटि.।

तन्त्रमन्वेषणस्य एका पद्धतिः। विज्ञानमप्यन्वेषणं करोति किन्तु तद् बाह्योपकरणद्वारा बाह्यतंन्त्रस्यान्वेषणाय चिन्तयति। यावान्वा एष बाह्यः संसारास्तावानेवायमाभ्यन्तरः संसारः। तन्त्रमन्तर्जगतः अन्वेषणाय यतते। विज्ञानं जडमन्विष्यति तन्त्रं तु चेतनम्। इदं च चेतनं सर्वव्यापि, 'ब्रह्म' 'परमशिवः' 'परमाशक्तिः' इत्यादि नामभिर्व्यवह्रियते। संसारेऽस्मिन् तन्त्रद्वयमुपलभ्यते - 'तत्' च 'अहम्' च। एकः प्रथमपुरुषः पूर्णः द्वितीयश्च उत्तमपुरुषोऽपूर्णः। तौ आपाततः भिन्नौ प्रतिभातः। पारमार्थतस्तु तौ द्वावप्येकमेव। वस्तुतः 'तत्' एव 'अहम्' रूपेण स्फुरन्नास्ते। तत् पदार्थः कया रीत्या केनप्रकोण वा अहंरूपेण स्फुरितः इत्यस्य ज्ञानम्, अहम् च केन प्रकारेण कया पद्धत्या वा तत् पदार्थेन समाविष्टः तद्रूपो भविष्यति इति प्रक्रियाया अनुसन्धानमेव तन्त्रशास्त्रस्य प्रतिपाध्यम्। संस्कृतभाषाया अनुस्वारः बिन्दुर्वा (.) तन्त्रसम्मतपरमतत्त्वस्य प्रतीकभूतः द्वौ बिन्दू विसर्ग इति (:) कथ्यते। अयंविसर्गः शिवशक्त्योयामलावस्थायाः प्रतीकः। अयमेव सृष्टेः प्रारम्भः। यदा बिन्दुद्वयाद् बिन्दुत्रयस्य स्थितिर्भवति तदा त्रिकोणं जायते। इदं त्रिकोणं द्विविधम् - शिवत्रिकोणम् शक्तित्रिकोणं च। त्रिकोण द्वयस्य यामलावस्था षट्कोणं भवति। इदं षट्कोणचक्रं शिवशक्त्योः सनातन सम्बन्धस्य प्रतीकः। अस्मिन् जगति सर्वेस्त्रीपुरुषाः शक्तिशिवयोः प्रतीकभूताः। किं बहुना प्रत्येकशरीरे शिवांशः शक्त्यंशश्च विद्यमानौ स्तः। शरीरेऽस्मिन् मज्जाशुक्रप्राणजीवाः शिवमूलकाः, अस्थिचर्मरक्तमांसभेदसश्च शक्तिमूलकाः। 'यथा पिण्डे तथा ब्रह्माण्डे' इति सिद्धान्तमनुसृत्य ब्रह्माण्डेऽपीयमेव

स्थितिः । प्रवृत्तिमहदहं- कारपञ्चतन्मात्राणि पञ्चमहाभूतानि शक्तिमूलकानि । माया शुद्धविद्या ईश्वर सदाशिवाः शिवमूलकतत्वानि सन्ति । तन्त्रशास्त्रस्य तत्त्वसमूहस्य सर्वाङ्गीणं परिचयं ददाति। तन्त्राणामावरणं भिन्दन् साधकः शुद्धविद्यादीनतिक्रम्य बिन्दु-अर्धचन्द्र - रोधिनी नाद - नादान्त - शक्ति - व्यापिनी - समनापर्यन्तं रहस्यभेदनं कृत्वा उन्मनामधिगम्य तदहमोर्भेदमपसारयन् शिवसमावेशं लभते । इदमेव तन्त्रं तन्त्रशास्त्रस्य प्रतिपाद्यं वाऽभि धीयते ।

किं नाम चैतन्यं - चिती संज्ञाने इत्यस्माद् धातोः ल्युट् प्रत्यये कृते चेतन शब्दो निष्पन्नो भवति । चेतनस्य भावः चैतन्यम् इत्यत्र चेतनशब्दात् ष्यञ् प्रत्ययः । चैतन्यं ज्ञानमित्यनर्थान्तारं । निगमागमयोरुभयत्र चैतन्यस्य चर्चा चलति । निगमे अथवा वेदे अर्थादुपनिषत्सु चैतन्यमात्मशब्देन[१] ब्रह्मशब्देन[२]वा व्यवहृतो दृश्यते। उपनिषदः भारतीय दर्शनस्य विशेषतयाऽऽस्तिक दर्शनस्य मूलभूताः । किं बहुना नास्तिक दार्शनिक्या ? अपि स्वमत प्रमाण्यायोपनिषद्वाक्यानि तत्र तत्र उदाहरन्ति। सर्वेष्वपि दर्शनेषु चैतन्यस्य सत्ता भिन्न भिन्न रूपेण स्वीकृता । अत्र चैतन्यविषये तत्तद्दार्शनिकानां भवति निरुपणमनावश्यकं नेत्यालोच्य चार्वाकादीनां मतमनुसृत्य चैतन्य स्वरूप संक्षेपेण प्रस्तूयते ।

तत्र चार्वाकमते आकाशो नाम नैव कश्चन पदार्थः । पृथिव्यादि चत्वारि एव भूतानि। यथा गोमय मृत्तिका जलसंयोगाद् वृश्चिको जायते, यथा वा किण्वादिभ्यो मदशक्तिः तथैव पृथिव्यादिचतुर्भ्यो भूतेभ्यः विशिष्टमात्रया संश्लिष्टेभ्य चैतन्यमुपजायते। एतच्च चैतन्यमनित्यम् । देहेन सहोत्पद्यमानं देहेनैव सह विनश्यति। प्रमाण स्वरूपं ते चार्वाकाः बृहदारण्यकवाक्यमुदाहरन्ति - विज्ञान घन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति, न प्रेत्य संज्ञाऽस्ति (बृ.उ- २.४.१२) । एतच्चैतन्यं नूतनं नूत्नं वारं वारमुत्पद्यते इति उत्पादविनाशशालि । अथ बौद्धाः - माध्यमिकान् विहाय योगाचाराः सौत्रान्तिका वैभाषिका सर्वेऽपि चैतन्यस्य सत्तां स्वीकुर्वते । तेषां मते विज्ञानमेव चैतन्यम्। तन्मूलतः एकमेव किन्त्वविद्यया द्विविधम् - आलयविज्ञानं प्रवृत्तिविज्ञानं च[३] । तत्र 'अहम्' 'अहम्' इति बोध आलयविज्ञानम् । एतदतिरिक्तं

सर्वं प्रवृत्तिविज्ञानम्। उभयात्मकं च विज्ञानं क्षणिकमर्थात् द्वितीयक्षणवृत्तिध्वंस-प्रतियोगि। एतेषां मते चैतन्यं विज्ञानं मनः प्रज्ञप्तिरित्यनर्थान्तरम् । जगति प्रतीयमानानि समस्तानि वस्तूनि विज्ञानस्यैव प्रत्ययाः । 'चैतन्यलक्षणो जीवः' (षड्दर्शनसमुच्चय, कारिका ८४) इति ब्रुवाणा आर्हताः चैतन्यम् जीवनाम्ना व्यवहरन्ति । एष जीवः वस्तूनि जानीतः, व्यवहरति, कर्मणां भोक्ता, शरीरादभिन्नः, स्वप्रकाशः। नित्यत्वेसति परिणामित्वमस्य धर्मः। मध्यमपरिमाणवानयं संकोचविकासशालित्वाद्[४] गजशरीरे गजमात्रः पिपीलिकाशरीरे च पिपीलिका मात्रः। प्रत्यक्षानुमानाभ्यां स्वसंवेदने चास्य ज्ञानं कर्तुं शक्यते।

अथेदानीमास्तिकदर्शनानुसारं चैतन्यशरीरमुपवर्ण्यते - तत्र न्यायवैशेषिकनये आत्मनश्चतुर्दशगुणेषु बुद्धिरेको गुणः। बुद्धिश्च चैतन्यस्य नामान्तरम् । एतच्चैतन्यम् नात्मनः स्वाभाविकोधर्मः किन्तु आगन्तुको वा । नित्योविभुश्चात्मा यदा शरीरबद्देन जगति वर्त्तमानो भवति तदा तस्मिन्नात्मनि चैतन्यमुपजायते । देहान्ते चात्मनः सकाशात् पृथग्भूय विलीयते। अत एव मुक्तिदशायामात्मा चैतन्यरहितः काष्ठपाषाणादिवत् निःसंज्ञस्तिष्ठति । सांख्ययोगमते शरीरेन्द्रिय मनोभ्यो भिन्नः स्वतन्त्रः स्वस्थः स्वच्छः पुरुष एव चैतन्यम् । अयं च ज्ञातैव न कदाचित् ज्ञानविषयः । न्यायनये चैतन्यमात्मन आगन्तुको गुणः किन्तु सांख्ये राद्धान्ते चैतन्यं पुरुष इत्यनर्थान्तरम् । चैतन्यम् पुरुषस्य स्वभावः । य एव पुरुषः स एव चैतन्यम्, यदेव चैतन्यम् तदेव पुरुषः । 'साक्षी चेता केवलो निर्गुणश्च' । एतच्च चैतन्यं कूटस्थनित्यं, व्यापकमपरिणामि दृक्शक्तिः । अथ मीमांसकाः - तत्र कौमारिला कथयन्ति यत् आत्मनि चिद् अचिद् इत्यंशद्वयम् । तत्र चिदंश एव चैतन्यम् । एतेषांमते चैतन्यमात्मनो गुणः स च कादाचित्कः । यदा शरीरेण विषयस्य संयोगो भवति तदा चैतन्यमुपजायते । अत एव स्वप्ने सुषुप्तौ च आत्मा चैतन्यरहितो जडः सन्मात्रस्तिष्ठति । वेदान्तिनां मते ब्रह्म आत्मा सत्यं ज्ञानं चैतन्यं अनन्तं आनन्दः मोक्षः इत्येते शब्दा अपरपर्यायाः । अत्र नानाश्रुतिवचानानि[५] प्रमाणानि। एतच्चैतन्यं नानावच्छेदेन नानारूपाणि धृत्वा जगति नाना रूपेण भासते । तद्यथा - अन्तःकरणावच्छिन्नं चैतन्यं प्रमातृचैतन्यम्; अन्तःकरणवृत्यवच्चिन्नं चैतन्यं प्रमाण चैतन्यं; विषयावच्छिन्नं चैतन्यं विषय चैतन्यं । अन्तःकरणं तद्वृत्तयो विषयाश्च

सर्वाणि मूलतः चैतन्यमेव सन्ति किन्त्वनाद्यविद्यावशादन्तःकरणादिरूपेण विवर्त्तते। चैतन्यस्य विषये उपर्युक्ताः सर्वेऽपि विचाराः खण्डदृष्टयः। सङ्कुचितदृष्टयो वा सन्ति। यथा केचन सङ्कुचितदृष्टयः पुरुषाः गजस्य समीपं गताः सन्तः पृष्टाः - कीदृशोगजः ? इति। एवं पृष्टे येन गजस्य पादः स्पृष्टः स होवाच - स्तम्बवत् इति । येनकर्णस्पृष्टं स उदतीतरत् - न हि, सर्पवत् इति । यः शुण्डंस्पृष्टवान् तेनोक्तं - नहि , अधोभागे संकीर्णमुपरिभागे विस्तीर्णं हि दृश्य म्संयुतं स्थूल दण्डवत् इति । इत्थं सङ्कुचितदृष्टिभिः पुरुषैः गजस्य वर्णनं यथार्थं सदपि सर्वथा समीचीनं पूर्णं च नास्ति तथैवोपरि वर्णितानि नानादार्शनिकमतानि यथार्थानि सन्त्यपि अपूर्णानि अतस्तेषाम् खण्डदृष्टीनां परिचायकानि । चैतन्यस्य विषये तन्त्रशास्त्रीयं मतं सर्वतः सर्वथा परिपूर्णम् ।

शैवतन्त्रे शाक्ततन्त्रेवा चैतन्यस्य सत्ता ऐकमत्येन स्वीकृता । 'चैतन्यमात्मा' इति प्रथमं शिवसूत्रम् । चितिः स्वतन्त्रा विश्वसिद्धिहेतुः इति प्रत्यभिज्ञा हृदयोक्तं प्रथमं शाक्तसूत्रम् । एतच्चैतन्यं परमशिवः परमाशक्तिः वा इति तान्त्रिकाणां विचारः। यद्यपि तच्चैतन्यमेकमलिङ्गं चास्ति[६] तथापि व्यवहारदृष्या आस्थामनुसृत्य वा तस्य विषये पुल्लिङ्ग स्त्रीलिङ्ग व्यवहाराः प्रचलन्ति । वस्तुतस्तु तस्यरूपं सर्वोपाधिविवर्जितम्[७]। यथोक्तं विज्ञानभैरवे -

चिद्धर्मा सर्वदेहेषु विशेषो नास्ति कुत्रचित् ।
अतश्च तन्मयम् सर्वं भावयन् भवजिज्जनः ॥ (वि.भै.)

चैतन्यं चितिः इत्यत्र एकवचनं अस्य तत्त्वस्य देश कालाध्यन-वच्छिन्नतामद्वैतत्वं च ब्रूते । यथोक्तम् -

इदं द्वैतमिदं नेति तदिदंच द्वयाद्वयम् ।
इति यत्र समंभाति तदद्वयमुदाहृतम् ।

इदं सत्तात्मकं चैतन्यमखण्डप्रकाशस्वरुपम् । महेश्वरोक्त प्रथमसूत्रस्य, 'अ इ उण्' इत्यस्य 'अकारः' अनुत्तरं संकेतयति । चैतन्यमेवानुत्तरम् । एतच्चैतन्यं सर्वोत्तीर्णं सर्वमयमित्युभयथा वर्त्तते । सन्मात्रमिदं पूर्णतत्त्वं प्रकाशस्वभावम् । अस्यैतादृश्यां गभीरायां स्थितौ सत् चित् आनंदस्य कल्पनाऽपि कर्त्तुं न पार्यते । इयमस्य निरंशा

निर्विशेषा च स्थितिः सन्मात्रस्वभावा । स्वप्रकाशस्य एतस्यामेव स्थितौ अस्या एव परमसत्ताया एकाकला प्रस्फुटी भवति या तान्त्रिकैः चित् अथवा चितिः इति कथ्यते। अयंचिद् भावश्चैतन्यं वा तस्य परमेश्वरस्य बहिरुन्मुखतायाः प्रथमः प्रकाशः । अस्या बहिरुन्मुखताया मूलं तस्य विमर्शनाम्नी शक्तिरस्ति । विमर्शं विना स नैवाभासितुं शक्नोति । विमर्शः प्रकाशस्य स्वभाव एव -

स्वभावमवभासस्य विमर्शं विदुरन्यथा ।
प्रकाशोऽर्थोपरक्तोऽपि स्फटिकादि जडोपमः ॥

इमौ प्रकाशविमर्शौ अग्नितद्दाहकताशक्त्योरिवाविनाभावेन तादात्म्येन वा स्थितौ । एकेन विनाऽपरस्य अस्तित्वमपि कल्पयितुं न शक्यते । एतस्य विमर्शस्यैवेदं फलं यत् परमसत्ता बहिरुन्निनायिषति । यथा परमासत्ताऽनादिर्नित्या निरुपाधिस्तथैव तस्याश्चिद्भावोऽपि निरुपाधिर्नित्यः । अयं चिद्भावस्तस्मात् सतः शश्वन्निरच्छिन्नास्ते। एतस्य कारणमस्ति स्पन्दनम् । स्पन्दनस्य स्वरूपं यथा -

यदमनुत्तरमूर्त्तिर्निजेच्छया विश्वमेषितुं स्रष्टुम् । पस्पन्दे स स्पन्दः .........॥

तथा -

स्पन्दनं च किंचिच्चलनम् । एषैव च किंचिद्रूपता यदचलमपि चलमाभासते। प्रकाशस्वरूपं हि मनागपि नातिरिच्यते अतिरिच्यत इवेति अचलमेवाभासभेदयुक्तमेव च आभाति । (ई.प्र.वि. १.५.१४)

अखण्डसत्तातश्चिद्भावः शश्वद् बहिर्निर्गच्छन्नास्ते इति पूर्वमुक्तम् । स्पन्दकारणाद् यथा सतश्चैतन्यं बहिर्भवति तथा चैतन्येपि स्पन्दनं शश्वद् भवदास्ते। एतत्स्पन्दनस्य परिणामोऽयं यत् चैतन्यमेकतः सता संश्लिष्टो भवति अपरतस्तस्माचैतन्याद् द्वितीयं चैतन्यं प्रादुर्भवति । इदं द्वितीयम् चैतन्यं यदा प्रथमे चैतन्ये प्रतिबिम्बितं भवति तदा स्वकीयं रूपं तत्र पश्यति । प्रथम चैतन्यस्य या सत्ता तस्या इदमेव वेदनं प्रत्यभिज्ञानं वा आनन्द इति नाम्नाऽभिधीयते । यथा स्थूले जगद्व्यवहारे प्रतिबिम्बस्य दर्शनार्थं दर्पणस्यावश्यकता भवति तथैवेदं चैतन्यमपि बिम्बप्रतिबिम्बोभयरूपेण भासमानं वर्तते । एतावता इदमायातं यत् या अखण्डसत्ता

सा नित्या सती चित्स्वरूपा चित्स्वभावा च । अर्थात् यदेव सत् तदेव चित् यदेव च चित् तदेव सत् । इयं चिन्मयीसत्ता स्वतन्त्रा अर्थात् अन्यनिरपेक्षा । 'चितिस्वतन्त्रा विश्वसिद्धिहेतुः' इति सूत्रे स्वतंत्र शब्दस्यायमेव परमार्थः । सत्यं शिवं सुन्दरं अथवा सच्चिदानन्दपदैरेतस्या एव सत्ताया अभिव्यक्तिर्भवति । यदिदं विशुद्धं सत् तत् अभिव्यक्तिदृष्ट्या चित्, रसास्वाददृष्ट्या च आनन्द इति ज्ञायते । इदमेव शैवानां परमाशिवः शाक्तानां च परमा शक्तिः । यद्यपि पूर्वदोक्तमतवादिनां नये अनयोः शेषशेषिभावः । शिवः शेषी अर्थात् अङ्गी शक्तिश्च शेष अर्थादङ्गम् । किन्तूत्तरकौलानां मते इदमनुचितम्। नानयोः शेषशेषिभावः । युक्तं चैतत् । गजवृषभन्यायेनदं[८] शिवोऽप्यस्ति शक्तिरपि। शक्तिं विना शिव इच्छाज्ञानरहितः स्वप्रकाशने असमर्थः शव इव भवति। सौन्दर्यलहरीग्रन्थे[९]ऽस्य संकेतोलभ्यते । एवमेव प्रकाशात्मक शिवंविना शक्तिरप्यात्मा प्रकाशने असमर्था । उभयमपि चिद्रूपम् । यथा अग्निस्तस्य दाहकताशक्तिश्चाभिन्ने एवमेव शिवशक्ती द्वावप्येकमेव । इदमेव परमं साम्यमद्वैतभावो वा । एतस्यैव विषये उक्तम् - 'निरञ्जनः परमं साम्यमुपैति'[१०] । यद्यपि अत्र नास्ति लिङ्गभेदः[११] तथापि भेददृष्ट्या शिवांशः सन्नपि चित्स्वरूपः निष्क्रियः साक्षी[१२] च । शक्त्यंशश्च सर्वदा पञ्चकृत्यकारी । इयं चित्सत्ता एकतः पूर्णतया रिक्ता शून्या विश्वोत्तीर्णा शिवस्यरूपा, अपरतः पूर्णतया पूर्णा विश्वमयी शक्तिरूपा । एतेनेदमायातं यत् परमाशक्तिः परमाशिवश्चेत्युभयमपि नित्याचिन्मात्र स्वभावं नित्यमुक्तं च । संस्कृतसाहित्येऽर्द्धनारीश्वरस्यकल्पना एनमेव भावं द्योतयति । तत्र शिवः शक्तिश्चोभावपि शश्वद्विद्यमानौ भवतः । एतस्मादेव कारणात् विश्वस्याभेदेन भानं भवति। यतो हि लीलामयी महाशक्तिमतिरिच्य अन्यत् किमपि नास्ति ।

'चितिः स्वतन्त्रा विश्वसिद्धिहेतुः' इति सूत्रे चितिः स्वतन्त्रा इत्युभयमपि पदं प्रथमान्तम् । 'नानार्थयोरभेदातिरिक्तः सम्बन्धोऽव्युत्पन्नः' । इति नीत्या चैतन्यस्वातन्त्रययोरभेदः सम्बधः । यदेव चैतन्यम् तदेव स्वातन्त्र्यं यदेव च स्वातन्त्र्यं तदेव चैतन्यम् । चितिमतिरिच्य सर्वं परतन्त्रमेव । यत्किञ्चिद् दृश्यतेऽनुभूयते ज्ञायते विमृश्यते तत्सर्वं तस्य चैतन्यस्य स्वातन्त्र्यमेव । एष स्वातन्त्र्यसिद्धान्तः शैवागमस्य शाक्तागमस्य वा प्राणभूतः । चिन्मयी सर्वोच्च सत्ता परमाशिवः परमाशक्तिर्वा

परमस्वतन्त्रा । स्वस्वातन्त्र्यादेवेयं सत्ता सर्वदा चिद् आनन्द इच्छा ज्ञान क्रियेति पञ्चभिः शक्तिभिर्युक्ता विराजते । चैतन्यं तस्य सत्तात्मक परमेश्वरस्य अन्तरङ्गा शक्तिः आनन्दश्च बहिरङ्गा । कौलाचार्यास्तां सत्तां विश्वमयीं मन्यन्ते तन्त्राचार्यस्तु विश्वोत्तीर्णाम् । किन्तु भिन्नदार्शनिकानाम् अर्थात् काश्मीर शिवाद्वयवादिनां मते सा सत्ता विश्वमयी विश्वोत्तीर्णा च एकसहैव वर्त्तते । एतदेव तस्याः स्वतन्त्र्यम् । निखिलमेव विश्वं तस्या स्वातन्त्र्यस्यैव क्रीडा अभिनयो वा । स्वस्वातन्त्र्यवशात् सा विश्वरूपं नाटकं रचयति । तदुक्तम्-

स्वेच्छया स्वभित्तौ विश्वमुन्मीलयति[१३] । इति ।

तन्नानां अनुरूपग्राह्यग्राहकभेदात्[१४] । इति च ।

विश्वरूपनाटकस्य रचनां कृत्वा अनेकानि रूपाणि बिभ्रती सैव अभिनयमपि करोति । स्वयं कृतमभिनयमनेकरूपेण दृष्ट्वा मन्त्रमुग्धाऽपि सैव भवति । तत्कालमेव एतस्मात् स्वस्मात् तटस्थेयम् स्वात्मनिविश्रामं कुर्वती आस्ते। सर्वं कृत्वाऽपि सा किमपि न करोति । किमप्यकृत्वा च सा सर्वस्य कर्त्री भवति । सैव परमो भोगः परमश्च त्यागः । पक्षान्तरे सा समस्तभोगत्यागविवर्जिता केवला तिष्ठति । इयं सर्वत्र स्वप्रकाशते पक्षान्तरे च परमान्वेषणेनापि तस्या लेशमात्रमपि चिह्नं न परिलक्ष्यते । अनन्तमहिमामयीयं चितिः ज्ञानिनां ब्रह्म, योगीनां परमात्मा भक्तजनानां च भगवती अस्ति । वाङ्मनोऽतीतापि सा सर्वेन्द्रियवेद्या सर्वभावगम्या चास्ति । इयं चितिः सत्स्वरूपा सती स्वप्रकाशा अर्थात् अवबोध स्वरूपा । अर्थात् इयं स्वात्मनः स्वप्रकाशत्वं सुष्ठु अवबुध्यते । अयमवबोधः विमर्शनाम्ना व्यवह्रियते । अयं च विमर्शः प्रकाशस्य स्वभावः । तदुक्तम् -

स्वभावमवभासस्य विमर्शं विदुरन्यथा ।

प्रकाशोऽर्थोपरक्तोऽपि स्फटिकादि जडोपमः ॥ (ई.प्र.)

यदा सा स्वकीयं विश्वमयं रूपं विमृशति तदानन्दोच्छलिता भवति । तस्यां प्रकाश विमर्शौ सहैव वर्त्तमानौ शाश्वतौ वर्त्तेते । एतदेवास्याः स्वातन्त्र्यं यदियं स्वसत्तायाः स्वशक्तिसत्तायाश्चावबोधं सर्वदा कुर्वाणाऽस्ति । इदं विश्वमपि

तद्विमर्शस्यैव परिणामः । तदुक्तं तन्त्रसारे -

अन्तर्विभाति सकलं जगदात्मनीह
यद्वद् विचित्ररचना मुकुरान्तराले ।
बोधः परं निजविमर्शरसानुवृत्त्या
विश्वं परामृशति नो मुकुरस्तथा तु ॥

तच्च विश्वं परमसत्तायां नित्यं विराजमानमस्ति । सहैव अस्या विश्ववर्त्तमानताया बोधोऽपि तस्या अन्तर्नित्यं जागर्त्ति । एतस्मात् कारणात् सा निग्रहसृष्ट्यादि पञ्चकृत्यै नित्यं कुरुते । तत्रस्वेच्छया स्वयं स्वरूप गोपनं निग्रहः । पश्चात् सृष्टिस्थितिसंहारानन्तरं पुनः स्वरूपे प्रतिष्ठा अनुग्रहः । इमानि पञ्चकृत्यानि तस्यां चितौ तत्स्वातन्त्र्यवशात् अनवरतं प्रचलन्ति । अस्य कृत्यपञ्चकस्य नास्ति किञ्चन कारणं न चापि किञ्चनोद्देश्यम् । एतद्धि तस्याः स्वभावः स्वातन्त्र्यं वा । यतो हि सा सर्वशक्तिसम्पन्ना । यथाऽभिनयस्तस्याः स्वभावस्तथैवास्माद-भिनयात्तारस्थ्यमपि तस्याः स्वभावः । किमधिकं वर्णयामो यत्किमपि दृश्यतेऽस्ति तत्सर्वं तस्याः चित्तेः स्वातन्त्र्यस्य माहात्म्यम् ।[१५]

इयतावर्णनेनेदमायातं यत् चैतन्यस्य स्वातन्त्र्यमेव सर्वोपरि । स्वे महिम्नि प्रतिष्ठितः[१६] इत्युपनिषद् वाक्यमपि स्वातन्त्र्यमेव संकेतयति यतो हि स्वातन्त्र्यमेव तस्या महिमा यस्मिन् स परमेश्वरः प्रतिष्ठितः । पूर्वमुक्तं यदेतद्विश्वं चैतन्य-स्योन्मीलनम्। चैतन्यमेव स्वभित्तौ आत्मानं प्रतिबिम्बितं कृत्वा विश्वमाभासयति । यदाह -

चिदात्मैवहि देवोऽन्तःस्थितामिच्छावशाद् बहिः ।
योगीवनिरुपादानमर्थजातं प्रकाशयेत् । (ई.प्र.१.५.७)

तथा

अस्थास्यदेकरूपेण वपुषा चेन्महेश्वरः ।
महेश्वरत्वं संवित्त्वं तदत्यक्षत् घटादिवत् ॥ (तं.आ. ३.१००)

सामान्यव्यवहारे एकं बिम्बं भवति यथा मुखम् । तस्य प्रतिबिम्बं दर्पणाद्याधारे दृश्यते। दर्पणाध्याधारं विना बिम्बप्रतिबिम्बभावस्य कल्पनाऽपि कर्त्तुं न शक्यते । किन्तु परमसत्ता चितिरेकाऽद्वितीयैव । सा स्वस्वातन्त्र्यात् स्वस्यामेव स्वात्मानं प्रतिबिम्बयति । तत्र कोहि नाम बिम्बप्रतिबिम्ब भावः कथं च परमात्मा बिम्बप्रतिबिम्बरूपेणात्मानामाभासयति ? अत्र अभिनवगुप्तपादाचार्याः -

अतोऽसौ परमेशानः स्वात्मव्योमन्यनर्गलः ।
इयतः सृष्टिसंहाराऽम्बरस्य प्रदर्शकः ॥
निर्मले मुकुटे यद्वद् भान्ति भूमिजलादयः ।
अभिन्नास्तद्वदेवस्मिंश्चिन्नाथे विश्ववृत्तयः ॥ (तं. आ. ३.३.४)

अयं चैतन्यस्वरूपः परमात्मा व्योमवन्निरर्गलोऽसीमविस्तारवान् । यथा स्वच्छे दर्पणे भूमिजलादयः सहैव प्रतिबिम्बिता भवन्ति तथैवेतन्निखिलमपि विश्वं तस्मिन् स्वच्छे चित्परमेश्वरे सदैव युगपद् भासते । दर्पणदृष्टान्तस्तु परमेश्वरस्य दर्पणगतस्वच्छतानामकभूयोधर्मवत्त्वमेवातिदिशति नेतरान् धर्मान्। यदाहुः -

न देशो नो रूपं न च समययोगो न गरिमा
न चान्यान्यासङ्गो न च तदपहानिर्निधनता ।
न चावस्तुत्वं स्यान्न च किमपि सारंनिजमिति
ध्रुवं मोहः शाम्येदिति निरदिशद् दर्पणविधिः ॥ (तं. आ. ३.२३)

एतेनेदमायातं यद् विश्वमिदं चैतन्ये दर्पण प्रतिबिम्बन्यायेनावस्थितम् न तु तदतिरिक्ततया बहीरूपत्वेन वस्तु सत् । स्वच्छातातिशयान्मुकुर भूतेऽस्मिन् विश्वात्मके चैतन्ये आत्मनः प्रतिबिम्बं ददातः संविन्नाथः युक्त्यनुभवोप-पादितत्त्वात् निरवद्यां स्वात्माभिन्नाताम् विश्वरुपताम् भासयति । तेन निखिलमिदं जगत् चैतन्यात्मनः परमेश्वरस्यैवैकस्य रूपम् । तथा च

यथा च गन्धरूपस्पृग्रसाद्याः प्रतिबिम्बिताः ।
तदाधारोपरागेण भान्ति खड्गे मुखादिवत् ॥
तथा विश्वमिदं बोधे प्रतिबिम्बितमाश्रयेत् ।

प्रकाशत्वस्वतन्त्रत्वप्रभृतिं धर्मविस्तरम् ॥(तं आ. ३.४५.४६)

यथा खड्गमुकुटतैलादौ प्रतिबिम्बितं मुखं तेषाम् खड्गादीनां दैर्ध्यादिधर्मान् आत्मनि अधास्यति तथेदं विश्वं तस्मिंश्चैतन्ये प्रतिबिम्बितं सत् तस्य प्रकाशत्व स्वतन्त्रत्वचैतन्यादि धर्मान् स्वात्मन्यारोपयति । अर्थात् स्वतन्त्रत्वप्रकाशत्वादि रूपतां भजते । प्रकाशातिरिक्तत्वे हि विश्वस्य स्वयमप्रकाशत्वाज्जडत्वं स्यात् ।

पूर्वमुक्तम् यदनन्ते नित्ये सदात्मनि तत्त्वे प्रथमं स्पन्दनं चैतन्यं । अस्माच्चैतन्यादुद्भूतं द्वितीयं चैतन्यं प्रथमे चैतन्ये स्वस्वरूपं विमृशति आनन्दरूपतां च याति । इदमेव चैतन्यस्य प्रतिबिम्बनम् । लोकव्यवहारेऽपि वयम् तदैवानन्दमनुभवामः यदा पत्नीपुत्रादि रूपे सजीवेऽथवा चित्रकलादौ निर्जीवे आत्मनः प्रतिबिम्बं पश्यामः । नानारूपेण दृश्यमानमिदं विश्वमुत्पत्तिदृशा तस्या एव चैतन्यात्मकसत्तायाः प्रतिबिम्बम् । यथा दर्पणादिगतं प्रतिबिम्बं दर्पणं विहायान्यत् किञ्चिदपि नास्ति तथैव चैतन्ये प्रतिबिम्बितं विश्वं चैतन्यं विहाय न किमपि वस्त्वन्तरं सत्तान्तरं वा । यथा दर्पणेऽस्मत्प्रतिबिम्बस्य बोधोऽस्माकं मनसि जायते तथैवस्य स्वसृष्टस्य विश्वस्य बोधः परमासत्तानुभवति । अयं बोध आभास इति कथ्यते । यथा समुद्रे उत्पध्यमाना अनन्तरूपेण आवर्त्तबुद्बुद तरंङ्गादय अनन्तरूपैर्लोकानां बुद्धिविषया भवन्ति तथैवेदमनन्तं विचित्रं विश्वं तस्यां परायां चिति तस्या एवांवभासन्ते । एतदन्तवैचित्र्यानन्तरूपेणाभासनमपि तस्यैव चैतन्यस्य लीलाविलासः । यथा चित्ते अन्यत्रसंलग्ने दर्पणगतप्रतिबिम्बस्य बोधो न भवति नास्ति तथा स्थितिः चिदात्मिकायाः सत्तायाः । तत्र प्रतिबिम्बिता सर्वेऽपि पदार्थाः समस्तं वा विश्वं तस्यां निरन्तरं शाश्वतं चाभासते । तस्माध्यथा चिदात्मिका परमसत्ता नित्या यथार्था च तथैव तस्यां प्रतिबिम्बान्याभासाश्चापि नित्यानि ।

इदं चैतन्यं विश्वावभासस्य हेतुः । सांख्यनये विश्वं पञ्चविंशति तत्त्वात्मकम् । तानि च तत्त्वानि पृथिव्यादिपञ्चमहाभूतादारभ्य पुरुषान्तानि । तेषु तत्त्वेषु पुरुषः प्रकृतिश्चेत्ति तत्त्वद्वयं मूलभूतम् । तान्त्रिकवाङ्मये षटत्रिंशत् तत्त्वानि ।

सांख्यसम्मतपञ्चविंशतितत्त्वैः सह एकादशान्यानि तत्त्वानि सन्ति । तद्याथा - माया, तस्या पञ्चकञ्चुकानि (=कलाविद्या रागःकालोनियतिः) इति षट् शुद्धविद्या, ईश्वरः, सदाशिवः, शक्तिः, अनश्रित शिवः इति पञ्च । एवं पञ्चविंशति + षट् + पञ्च इति षट्त्रिंशत्तत्त्वानि तदात्मकं च विश्वम् । यथा मालास्थमणिगणेषु सूत्रं सर्वत्रानुस्यूतं भवति यथा वा नानाविधेषु मिष्ठान्नेषु सितशर्कराऽनुस्यूता भवति तथैवानाश्रितशिवादारभ्य पञ्चमहाभूतपर्यन्तं सर्वत्र चैतन्यमनुस्यूतं वर्त्तते । यथा लूता स्वनिर्मिततन्तु जालस्य निमित्तमुपादान-मुभयात्मकमपि कारणं भवति तथैवेदं चैतन्यं षट्त्रिंशत्तत्त्वात्मकस्य विश्वस्याभिन्ननिमित्तोपादानम् । क्वचिदिदं साक्षान्निमित्तं क्वचिच्च परम्परया । तयानाश्रितशिवादारभ्य शुद्धविद्यापर्यन्तानि तत्त्वानि साक्षान्निर्मिमीत इदं चैतन्यम् । मायातश्चारभ्यक्षित्यादिपर्यन्तं श्री अनन्तनाथभट्टारकद्वारा सृष्टिं विदधाति । चैतन्यं परमसत्ताया अन्तरङ्गशक्तिरिति प्रागवोचाम ।एतदेव यदा आत्मानं संकोचयति तदा 'अहं', 'इदम्' इत्यात्मकम् विश्वं प्रमातृप्रमेय प्रमाणेति त्रिविधरूपेण विकासितं भवति । क्वचित्सदाशिवादितत्त्वे 'अहन्तायाः' प्राधान्यम् भवति क्वचिच्चमायादितत्त्वे 'इदन्तायाः'। शुद्धविद्यातत्त्वे अहन्तेदन्ते समधृततुलापुटन्यायेन समानं प्राधान्यमावहतः । तत्रतत्त्वेषु मन्त्रमहेश्वर - मन्त्रेश्वर - मन्त्र - विज्ञानकला - अकल - सकलेति प्रमातारो भवन्ति । प्रमेयं च अहमतिरिच्य घटपटाध्यात्मकं निखिलं विश्वम् । प्रमाणानि च प्रत्याक्षानुमाना-गमात्मकानीति सर्वत्रशास्त्रेषु चर्चितानीतिलेखविस्तारभयान्नात्र विशदीकृतानि।

इदं चैतन्यं यदा स्वं रूपं गोपयित्वा संकोचं गृह्णाति तदाऽस्य द्वयीगतिः - कदाचिदुल्लसितमपि संकोचं गुणी कृत्येदं चित्प्राधान्येन स्फुरति : कदाचिच्च संकोचप्रधानतयोल्लसति । प्रथमे पक्षे तद्विज्ञानाकलः द्वितीये च पक्षे विद्याप्रमाता इत्युच्यते। यदा तस्मिञ्चैतन्ये सङ्कोचस्य घनीभूतत्वं प्रसरति तदा तदेव चैतन्यं नीलसुखादिरूपेणोल्लसति। अर्थात्, स्वातन्त्र्यात्मा चितिशक्तिरेव ज्ञानत्रियामाया-रूपमाधाय पशुदशायाम् संकोचप्रकर्षात् सत्त्वरजस्तमःस्वभावात्मकचित्तरूपेण स्फुरति[१७]। इदं चित्तं बुद्धिर्वा ज्ञानाज्ञानयोराश्रयभूता। तत्र अज्ञानं नाम न ज्ञानाभावः (किन्तु अल्पं ज्ञानं)। नञः अल्पार्थे प्रयोगात्। न केवलं बुद्धिरेव ज्ञानाज्ञानयोराश्रयः

किन्तु स्वयं चैतन्यमपि संकोचवशाद् गृहीतपशुभावं ज्ञानाज्ञानयोराश्रयभूतं । एवं ज्ञानमज्ञानमुभयमपि द्विविधम् - बौद्धं पौरुषं च। तत्र उभयमप्यज्ञानं सृष्टिकारणं ज्ञानं चोभयं मोक्षाधायकम् [१८]। जागतिक वस्तूनि शिवरूपाणि सन्तीत्यननुसन्धाय तानि घटपटादिरूपाणि सन्ति इत्यवधारणा बौद्धमज्ञानम् । इदं बौद्धमज्ञानं बौद्धज्ञानेन नश्यति। यदा जीवः स्वमनसि जागतिकवस्तूनि शिवस्वरूपाण्यवबुध्यते तदा ज्ञेयं यद् बौद्धाज्ञानं विनष्टम् । अयमज्ञाननाशः शास्त्राणामभ्यासेन गुरुपदेशेन वा जायते । आत्मनः जीवरूपेण बोधः पौरुषमज्ञानं कथ्यते । इदमज्ञानं दीक्षया नश्यति । बौद्धज्ञानमपि प्रकारान्तरेण पौरुषाज्ञानमेव । यदा गुरुकृपान्वितदीक्षया शिष्योऽनुगृहीतो भवति तदारभ्य शिष्यान्तर्गतं मलं पौरुषमज्ञानं वा शिथिलायते । तात्पर्यंत्विदमस्ति यत् पुरुषस्य बुद्धिरात्मा चोभयमपि मलरहितौ भवेताम् । बौद्धज्ञानेन बौद्धाज्ञानं नश्यति । स्फीतबुद्धिः पुरुषः गुरुभक्तिशास्त्राभ्यासप्रवणः सन् दीक्षारूपां गुरुकृपामाप्नोति । दीक्षया पौरुषमज्ञानं नश्यति । बौद्धं ज्ञानं ज्ञानमिति कथ्यते पौरुषं च ज्ञानं विज्ञानम्। ज्ञानं विज्ञानस्य प्राप्तौ हेतुभूतम् । तत्र

भूमिरापोऽनलं वायुः खं मनो बुद्धिरेव च । (भ.गी. ७.५०) इत्युक्तनीत्या यत्किञ्चिदस्मिन् विश्वस्मिन् दृश्यतेऽनुभूयते च तत्सर्वं वासुदेवमयं वासुदेवात् प्रादुर्भूतं तथैव स्थितं तस्मिन्नेव लयं याति इति वस्तुगतिः । किन्त्वेतादृग्बुद्धौ सत्यामपि 'अहमन्यः, वासुदेवमयेभ्यो वस्तुभ्यः पृथक् तेषां साक्षी, तानि सर्वाणि वासुदेवमयान्यनुभवामि' इति बुद्धिज्ञानं । एवं दृढनिश्चयस्य सततमभ्यासम् कुर्वतो ज्ञानिनो हृदये परमेश्वरकृपावशात् संविन्नामकं चैतन्यमुदेति । अत्रेदमवधेयम् - परमात्मनिस्तिस्रोशक्तयो राजन्ते - ह्लादिनी, साधिनी संविच्च। यद्यपि मूलत एतच्छक्तित्रयं चैतन्यमेव तथापि भेददृष्ट्या एतास्तिस्रः स्वीक्रियन्ते। तया यदा संविच्छक्तेरुदयो भवति तदा वासुदेवः सर्वम्[१९] इति मतिरुदेति । एषा या मतिः सा ज्ञानम् एतदन्तरं यदा 'अहं सर्वम्' अथवा 'अहं वासुदेवः (शिवः) सर्वम्' इति बुद्धिरपि न किञ्चित् पृथक् वस्तु किन्त्वहमेव इत्याभासो जायते तदा एष आभासो विज्ञानमिति कथ्यते। यच्चेदं ज्ञानं यच्च विज्ञानं तत् सर्वं चैतन्यमेव किन्तु संकुचितं न तु पूर्णम् ।

चैतन्यस्य पूर्णत्वं कदायाति - इतीदानीं विचार्यते - जीव अनादिकालात् पाशैरुपनिबद्धः । पाशाश्चाशुद्धविकल्पस्वरूपाः । ननु अशुद्धविकल्पाः के ? इति जिज्ञासायामुच्यते - घटपटादयः पदार्थाः सद्भूताः वासत्वाः इति धारणा अशुद्धविकल्पः । एतैरशुद्धविकल्परूपैः पाशैरूपनिबद्धं चैतन्यं स्वरूपगोपनात् प्रसुप्तामिव वर्त्तते । यदासाधको दीक्षादिना परमात्मनोऽनुग्रहं प्राप्नोति तदा प्रसुप्तमिदं चैतन्यं । चितिशक्तिर्वा जीवस्य स्पर्शनं करोति । ततआरभ्य जीवस्य विकल्पदृष्टी परिवर्तनम् प्रारभ्यते । चिच्छक्तिर्जाग्रदवस्थां प्राप्य कालं ग्रसितुमारभते यतो हि काल एव जीवेषु विकल्पनां प्रवर्त्तको जनको वा । अयम् कालग्रसनव्यापारः क्रमशो भवति। अस्मिन् क्रमे जीवः सर्वप्रथमं प्रमेयाणां शुद्धिमनुभवति। यावत् प्रमेयशुद्धिर्नभवति तावत् जीवानां रूपान्तरणमसंभावि। प्रमेयशुद्धेः साधारणं लक्षणमिदमस्ति यज्जीव इदं विश्वं बहिष्ट्वेन स्थितं नानुभवति किन्तु स्वात्मनि संस्थितमनुभवति । यावद्देहात्माभिमानं तिष्ठति न तावच्चिच्छक्तेर्जाग्रदवस्था नचैव प्रमेयशुद्धिः। यदा जीवः इदं शरीरमन्यत्, आत्मनः पृथक् - इत्यनुभवन्नास्ते तदा विश्वं बाह्यरूपेणस्थिते न प्रतीयते किन्त्वात्मनि स्थितम् । बाह्याभासस्य निवृत्तिरेव प्रमेयशुद्धिः ।

प्रमेयशुद्धौ सत्यां बाह्ये वस्तुतः स्थितमपि, अन्यैर्बाह्यत्वेन बुध्यमानमपि विश्वं साधकस्य कृते न बहिः स्थितम् । प्रतीयते यत् इदं विश्वं ममाभ्यन्तर एवास्ति । यथा दर्पणे प्रतिभासमानाः पदार्थाः दर्पणादतिरिक्तत्वेन प्रतीयमाना अपि न वस्तुतो दर्पणादतिरिक्ताः प्रत्युत दर्पण एव विश्रान्ताः प्रतीयन्ते तथैव चैतन्यस्य प्रथमोन्मेषे जगतो बाह्याभासो निवर्तते। प्रमेयस्य बोधः सन्नपि आभ्यन्तररुपेण भवति न तु बाह्य रूपेण । इदं जाग्रच्चैतन्यं बुभुक्षुरिव प्रथमं बाह्यं जगत् आत्मसात्करोति । इदमेवानुग्रहशक्तेः प्रथमं सोपानम् । यथाहुः शंकराचार्यपादाः -

'विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतम्' इति । अत्रेदं तात्पर्यम् - जगतो लोपोवस्तुतो न भवति । तत्रैव तिष्ठति । किन्तु तस्य भानमिन्द्रियग्राह्यरूपेण न भवति प्रत्युदात्मस्वरूपान्तर्गतत्वेन भवति । एवमियं चिच्छक्तिः बाह्यं जगद् विषयरूपेण ग्रसित्वा तृप्तिमायाति । अनया प्रक्रियया विषयाणाम् विषयत्वं निवर्त्तते । फलतः

जीवस्य कृते विषयोपभोगनामकं किमपि वस्तु नावशिष्यते । तदानीं विषयज्ञानं रागात्मकं भवति तच्च पराशक्तिः निर्विकल्पकभावेनानुभवति। तान्त्रिकदृष्ट्याऽयं वीरभोग इति ज्ञायते । अयं च भोगो जाग्रत् स्वप्न सुषुप्तिदशास्वप्यनिर्वर्त्तमान-स्तुरीयदशारूपः । इयमेव वास्तवी भगवदाराधना या सर्वास्वप्यवस्थास्वेकरूपेण प्रचलति । एतस्यां दशायां साधकस्य प्रत्येकं कर्म भगवदाराधनं भवति । यथाहुर्भगवत्पादशंकराचार्याः -

आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं
पूजा ते विषयोपभोगरचना निद्रासमाधिस्थितिः ।
सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणिसर्वा गिरः
यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥

अस्य भोगस्य समाप्तौ परमा तृप्तिरुदेति । फलतः साधकस्यान्तर्मुखी दशाविर्भवति। भोगसाधनभूतः समस्तेन्द्रियवर्गः करणेश्वरीसमूहो वा परमतृप्तः सन् चैतन्येनालिङ्गितः तेनाभिन्नतां प्राप्नोति । तस्यामवस्थायां विषयोपभोगतदाकाङ्क्षाभ्यां रहितः करणवर्गः प्रमातृरूपताम् प्राप्नोति । अत्र केवलं स्वरूपानुसन्धानमवशिष्यते। स्वरूपानुसन्धानं सातत्येन कुर्वन् योगी परप्रमातृभावं प्राप्नोति । इयमेव परमशिवदशा। परचैतन्यस्य दशा द्विविधा - कृशा पूर्णा च । यदा कायरूपा महाशक्तिर्निवृत्तप्राया भवति एकमात्रममा-कलावशिष्यते तदा चैतन्यस्य कृशा दशा । यदा च सर्वाः कलाः पूर्णरूपेण विकासिता भवन्ति तदा तस्य पूर्णा दशा । प्रमेयशुद्ध्यन्तरं प्रमाण शुद्धिस्तदनन्तरं च प्रमातृशुद्धौ सत्यामेषा पूर्णा दशोदेति । कौलमार्गीया द्वैतशक्तिसाधका एवैनां निर्वक्तुं शक्नुवन्ति । जागरणस्य पूर्णदशायां सर्वं चिन्मयं भवति । इयं महाशक्तेः पूर्णावस्थाऽस्ति । कालस्योर्ध्वं महाकालस्तदूर्ध्वं च पराशक्तिः परमासंवित् परमं चैतन्यं वा विराजते । एतावतावर्णनेनेदमायातं यत् पूर्णं चैतन्यं स्व स्वातन्त्र्यात् स्वस्मिन्नेव सत्त्वे संपूर्णं विश्वमाभास्य तत्रैव लीनतां नयति। अनेनैवाशयेन छान्दोग्येउक्तम् - 'सर्वं खल्विदं ब्रह्म तज्जलान् इति शान्तमुपासीत' (३.१४.१.)। यतश्च चैतन्यं

परमसत्ताया अन्तरङ्गा शक्तिन्दश्च बहिरंगा (यथा पूर्वमेवोक्तम्) तस्मादिदं परमासत्तात उद्भूतं जगत् चिदानन्दात्मकमिति निश्चप्रचंम् । तथाचोक्तं तैत्तिरीयोपनिषदि - 'आनन्दाध्येव खल्विमानि भूतानि जायन्ते, अनन्देन जातानि जीवन्ति, आनन्दं प्रयन्त्यभिसंविशन्ति । आनन्दं ब्रह्म' । इति । तस्मात् इदमवधेयं यत् -

पूर्णमदः (चैतन्यम्) पूर्णमिदं (विश्वम्)
पूर्णात् (चैतन्यात्) पूर्णम् (विश्वम्) उदच्यते ।
पूर्णस्य (विश्वस्य) पूर्णं (चैतन्यम्) आदाय
पूर्णम् (चैतन्यम्) एवावशिष्यते ॥

संकेतसूची -

ऐ.उ. - ऐतरेयोपनिषत् ।

बृ.उ. - बृहदारण्यकोपनिषत् ।

तै.उ. - तैत्तिरीयोपनिषत् ।

त. सू. - तत्त्वार्थसूत्र ।

श्वे.उ. - श्वेताश्वतरोपनिषत् ।

मु.उ. - मुण्डकोपनिषत् ।

सौ.ल. - सौन्दर्यलहरी ।

छा.उ. - छान्दोग्योपनिषत् ।

तं .आ. - तन्त्रालोक ।

ई.प्र. - ईश्वरप्रत्यभिज्ञा ।

प्र.हृ.सू. - प्रत्यभिज्ञाहृदयम् सूत्र ।

मा.वि.तं - मालिनीविजयतन्त्र ।

भ.गी. - भगवद्गीता ।

१. अयमात्माब्रह्म सर्वानुभूः (बृ.उ. २.५.१४)

२. विज्ञानमानन्दं ब्रह्म (बृ.उ. ३.८.२८)

प्रज्ञानं ब्रह्म (ऐ.उ. ६.३.)

३. तत्स्यादालयविज्ञानं यद्‌भवेदहमास्पदम् ।

तत्स्यात् प्रवृत्तिविज्ञानं यन्नीलादिकमुल्लिखेत् ॥

४. प्रदेश संहारविसर्गाभ्यां प्रदीपवत् (त.सू. ५.१६)

५. अयमात्मा ब्रह्म सर्वानुभूः (बृ.उ. २.५.१८.),

सत्यं ज्ञानमनन्तं ब्रह्म (तै.उ. २.१.१.),

विज्ञानमानन्दं ब्रह्म (तै.उ. ३.४.२८),

आनन्दो ब्रह्म (तै.उ. ३.६.),

स वा अयमात्मा ब्रह्म विज्ञानमयः (बृ.उ. ४.४.५),

प्रज्ञानं ब्रह्म (ऐ.उ. ३.३.),

इदं सर्वं यदयमात्मा (बृ.उ. २.४.६)

६. नैव स्त्री न पुमानेष न चायं स्यान्नपुंसकः (श्वे.उ. ५.१०)

७. परमात्मस्वरूपं तु सर्वोपाधिविवर्जितम् ।

चैतन्यमात्मनो रूपं सर्वशास्त्रेषु पठ्यते ॥

तथा -

शिवोदेवः शिवा देवी शिवंज्योतिरितित्रिधा ।

आलिङ्गमपि तत्तत्त्वंलिङ्गभेदेन कथ्यते । (तत्त्वप्रकाश)

८. यथा एकं चित्तमेकस्मात् कोणतः दृष्टंसत् गजस्य चित्तं विपरीताच्च कोणतो दृष्टं सद् वृषभस्य चित्रं प्रतीयते तद्वत् ॥

९. शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं

न चेदेवं देवः न खलु शक्तः स्पन्दितुमपि ॥ (सौ.ल. १)

१०. मु.उ. ३.३.

११. नैव स्त्री न पुमानेष न चायं स्यान्नपुंसकः ।

यत् यत् शरीरमादत्ते तेन तेन स युज्यते ॥ (श्वे.उ. ५.१०)

१२. साक्षी चेता केवलो निर्गुणश्च । (श्वे.उ. ३.६.११)

१३. प्र.हृ.सू (१.२)

१४. प्र.हृ.सू. (१.३)

१५. निग्रहः, सुष्टिः, स्थितिः, संहारः, अनुग्रहः ।

१६. छा.उ. (७.२४.१)

१७. चितिरेव चेतनपदादवरूढा चेत्यसंकोचिनी चित्तम् । (प्र.हृ.सू. ५)

१८. इहतावत् समस्तेषु शास्त्रेषु परिगीयते ।

अज्ञानं संसृतेर्मूलं ज्ञानं मोक्षैककारणम् ( तं.आ. १.२२)

तथा -

मलमत्तानमिच्छन्ति संसाराङ्कुरकारणम् । (मा.वि.त. १.२३)

१९. बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते ।

वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥ (भ.गी. ७.४.)

# चार्वाकचिन्तनसरण्यां चैतन्यस्यस्थानम्

बि.जि. श्रीलक्ष्मीः

दृष्टिर्हि दर्शनम्, साक्षादनुभूतिः न व्यवहितज्ञानम् । प्रमाणैर्निणी - तं यथार्थ तत्त्वंवादर्शनम् (अनेन दृश्यते इति वा) शास्त्रम् । दृष्टयः मतानि, इत्यपि न्यायसूत्र व्याख्याने(४.१.१४) ।

भारतीयदर्शने तावत् द्वौ अंशौ विद्येते, चैतन्यांशः, तर्कांशश्च । एतदंशद्वययुक्तस्य दर्शनस्योगमः भारते वेदेषु एव मृग्यः । भेदप्रभेदतया दर्शनानि बहून्यपि षड़ेव प्रसिद्धानि । तेषाममूनि नामानि -

बौद्धं नैयायिकं सांख्यं जैनं वैशेषिकं तथा ।
जैमिनीयं च नामानि दर्शनानाममून्यहो ।
नैयायिकमतदन्ये भेदं वैशेषिकैः सह
न मन्यन्ते मते तेषां पञ्चैवास्तिक वादिनः ॥
षड् दर्शन संख्या तु पूर्यते तन्मते किल ।
लोकायतमतक्षेपात्कथ्यन्ते तेन तन्मतम् ॥

तेषु द्वौ प्रमुखौ विभागौ स्तः । वैदिकानि दर्शनानि अवैदिकानि च । अवैदिकानि दर्शनानि नास्तिक दर्शनपदेन व्यवह्रियन्ते, वैदिकानि च आस्तिकपदेन । परलोकः अस्तीति यस्य मतिः अस्ति स आस्तिक., तद्विपरीतो नास्तिकः, प्रमाणानुपातिनी यस्य मतिः सदैष्टिक (प्रामाणिकः) इति काशिकायां नास्ति दिष्टंमतिः (४.४.६०) इति पाणिनिसूत्रं विवृतम्। न केवलं आमष्मिकलोके नास्तिक्यभावना अपि तु वेदप्रामाण्ये विमतिः नास्तिक्यमिति मन्यते[1] । तत्र अवैदिकदर्शनानि - चार्वाक दर्शनं, बौद्ध (सौगत) दर्शनं, जैन (आर्हत) दर्शनञ्च। गौतमकाणाद - कापिल पातञ्जल

जैमिनीय - वैयासिकदर्शनानि आस्तिकानि।

चारुः वाक् इति चार्वाकशब्दस्यनिरुक्तिः । आपातमनोरम लोकचित्ताकर्षकः वाकः वाक्यमस्य (पृषोदरादित्वाद्) । चर्चअदने, चर्वन्ति अदन्ति (भक्षयन्ति) तत्वतो न मन्यन्ते पुण्यपापादिकं परोक्षं वस्तुजातमिति चार्वाकाः इत्यपि निर्वचनम् । तेषां मतं चार्वाकम्। बार्हस्पत्यमित्यपरं नाम बृहस्पति प्रणीतत्वात् । आचार्योऽयं अर्थशास्त्रप्रणेतुर्बृहस्पतेर्भिन्नः। लोके आयतं बाहुल्येन प्रचरितत्वातं लोकानां आयतनं वा लोकायतमित्यपि व्यवह्रियते । निर्विचाराः सामान्या लोकास्तावदाचरन्तिस्मेति लोकायता लोकायतिका इत्यपि (धूर्तचार्वाकाः सुशिक्षितचार्वाका इति सविशेषमपि व्यवहरन्ति दर्शनकाराः)

विज्ञानधन एतेभ्यः भूतेभ्यो समुत्थाय तान्येवानुविनश्यति, न प्रेत्य संज्ञास्तीत्यरे ब्रवीमि इति होवाच याज्ञवल्क्यः ॥ बृ.उप. २.४.१२..... इत्यादयः वेदेषु पुराणेषु रामायणमहा भारतादिकृतिषु विद्यमानाः विचाराः चार्वाकमतस्य मूलमिति भासते। यद्यपि चार्वाक दर्शनमायतं लोके अस्य ग्रन्थाः अधुना नोपलभ्यन्ते । 'वर्णिका भागुरी लोकायतस्य (७-३-४५) इति महाभाष्ये पतञ्जलिनोक्तेनानेन ज्ञायते यत् पतञ्जलिसमये अस्य मतस्य ग्रन्थाःप्राप्यन्ते स्म। किंतु गच्छता कालेन ऽऽस्तिकदर्शनकारैरिदं बहुधा निराकृतम् । अनेनकारणेन संप्रति दर्शनान्तरग्रन्थेषु पूर्वपक्षरुपेण एव अस्योल्लेखः दरीदृश्यते । वेदान्तसूत्रभाष्ये गीताटीकासु च अथ लोकायतम्, 'पृथिव्यप्तेजोवायुरिति तत्त्वानि', तत्समुदाये शरीरेन्द्रिय विषयसंज्ञा, 'तेभ्यश्चैतन्यं किण्वादिभ्यो मदशक्तिवद्विज्ञानम्', चैतन्यविशिष्टः कायः पुरुषः, 'काम एवैकः पुरुषार्थः', 'मरणमेवापवर्गः' इत्येतानि बार्हस्पत्यसूत्राणि उद्धृतानि । अत एव जयन्तभट्टेन न्यायमञ्जर्यामुक्तम् - 'तदेवं पूर्वपक्षवचनमूलत्वात् लोकायतशास्त्र' मपि न स्वतन्त्रम् आह्निकम् किंच 'नहि लोकयते किंचित् कर्तव्यमुपदिश्यते । वैतण्डिककथैवासौ न पुनः कश्चिदागमः आह्निकम्[४] बौद्धादिग्रन्थेषु च लोकायतिकानां नास्ति दीक्षादिकं वितण्डवादसत्यम् (शास्त्रम्) इत्यपि प्रत्याख्यातम् ।

तथापि माधवीय सर्वदर्शनसंग्रहे तथा हरिभद्रसूरिकृतषड्दर्शनसमुच्चये दर्शनत्वेनाङ्गीकृतस्यास्य प्रमुखानि तत्त्वानि तानि संगृहीतानि । अस्य वादसरणी अन्याऽनपकरणीया विजृम्भते । मतेऽस्मिन्,

इन्द्रियार्थसन्निकर्षजं ज्ञानमेव (प्रत्यक्ष) प्रमाणपदवीमवगाहते । अक्षजमेवैकं प्रमाणमिति निश्चितम् । पृथ्वी - जलं - तेजो-वायुरिति भूतचतुष्टयस्य प्रमेयम् (विषयः) (दर्शनान्तरे) अनुमानगम्याकाशविषये प्रत्यक्षस्याभावात् आकाशाभावः। मानात् हि मेयसिद्धिः । अपि च, अग्नेरौष्ण्यं जलस्यशैत्यै वा स्वभावात् न तु अकस्मात् सिद्यति ।

ननु, व्याप्तिज्ञानाधीनमनुमानं प्रमाणं कथं भवेत् । व्याप्तिज्ञानं न प्रत्यक्षगग्यं खलु । कालत्रयेऽपि पदार्थानां संयोगसंभवात् भूतभविष्यतोरिन्द्रियाणामप्रवेशश्च। सामान्यगोचरं व्याप्तिज्ञानं भवेत् तर्हि तस्य इन्द्रियज्ञेयत्वेन अप्रयोजकत्वात् अनवश्यकत्वात् वा । तस्य व्यक्ति साहचर्यं च कुतोन स्यात् । बहिरिन्द्रियतन्त्रेण दुर्ज्ञेयोऽर्थ; अन्यकारणेनापि दुर्ज्ञेयः इति विवदन्ते बार्हस्पत्याः। किंच सर्वाः धूमाग्निव्यक्तयः प्रत्यक्षविषयाः भवितुं न शक्याः । ननु उपाधिज्ञाने जाते व्याप्तिज्ञानं, व्याप्तिज्ञानाधीनमित्यन्योन्याश्रयः । साध्य साधनाविनाभावस्य दुर्बोधतया नानुमानावकाशः। अत्र जयन्तभट्टः न्यायमंजर्याम् -

न प्रत्यक्षीकृता यावद्धूमग्नि व्यक्तयोऽखिलाः ।<br>
तावत् स्यादपि धूमोऽसौ यो नाग्नेरिति शङ्कते ॥<br>
ये तु प्रत्यक्षतो विश्वं पश्यन्ति हि भवादृशाः ।<br>
किंदिव्यचक्षुषामेषामनुमान प्रयोजनम् ॥<br>
सामान्यद्वारको ऽ प्यस्ति ना विनाभावनिश्चयः ।<br>
वास्तवं हि न सामान्यं नाम किंचन विद्यते ॥ (आ . २.)

प्रसङ्गात्, वादिदेवकृतस्याद्वादरत्नाकरे अनुमानाप्रामाण्यविषये क्रोडीकृताः अंशाः स्मरणीया : - अस्पष्टत्वात् स्वार्थनिश्चये परापेक्षत्वात्, प्रत्यक्षपूर्वकत्वात्, अर्थादनुपजायमानत्वात्, अवस्तुविषयत्वाात्, बाध्यमानत्वात् साध्यसाधनयोः

प्रतिबन्धसाधक प्रमाणाभावाद् वा नानुमानं प्रमाणं, अपि तु ऊहामात्रमेव ।

एवमेव, औपाधिकसबन्धसंयुक्तत्वात् उपमानादिकमपि दूरापास्तम् ।

पञ्चेन्द्रियगोचरमेव वस्त्वस्ति नापरं किंचन । प्रत्यक्षाभावाद् एव परलोकस्या प्रमाण्यम्। पुण्यपापे न स्तः । तयोः फलं स्वर्गनरकादिरूपं न विद्यते। ईश्वरः नास्ति नापि मोक्षः ।

लोकायता वदन्त्येवं नास्ति देवो न निर्वृतिः ।
धर्माधर्मौ न विद्येते न फलं पुण्यपापयोः ॥

परलोकाभावे शारीरकक्लेश प्रापणीयस्य पारलौकिकस्य सुखस्याभावे-अग्निहोत्रादौ न कश्चिन्मतिमान् प्रवर्तते । अग्निहोत्रादयः बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः । यागे हन्यमानः पशुः स्वर्गं गच्छेत् यजमानेन स्व पिता कुतो न हन्यते । मृतानां तृप्तये यदि श्राद्धं तिलाञ्चलिर्वा अर्प्यते पथिकानां कृते किमुत न दीयते । दानेन तृप्तिमनुभवेयुः चेत् स्वर्गताः प्रासादस्थिताः कस्मान्न तृप्यन्ति । अतः न कर्म न स्वर्गः नाप्यपवर्ग; न वर्णाश्रमधर्माश्च। ये शास्त्रकाराः अनुमानागम प्रमाणद्वारा पुण्यपापचेष्टा-प्राप्यस्वर्गनरकादिसुखास्सु खं व्यवस्थापयन्ति हेयोपादेयादि संकटे पातयन्ति निमज्जयन्ति वा ते वाचाटा वैदिकम्मन्याः धार्मिकमानिनः एवेति अवमन्यन्ते चार्वाकमतानुसारिभिः ।

पृथिव्यादिभूतचतुष्टयसंयोगात् शरीरोपत्पत्तिः, शरीरे तावत् चेतनत्वं च प्रतिपादितं लोकायतिकैः। प्रत्यक्षादृते अनुमानाद्यस्वीकारे देहातिरिक्तात्मभावे प्रमाणा भावात् शरीरस्यैवात्मता किण्वादिभ्यः उन्मादकत्वं यथा। मरणात्परं नस्ति किंचिदतः देहनाशे मोक्षप्राप्तिरप्युपपादितम् ।

यावज्जीवं सुखं जीवेन्नास्ति मृत्योरगोचरः। (ऋणंकृत्वाघृतं पिबेत्)
भस्मीभूतस्य देहस्य पुनरागमनं कुतः ॥

– इति उद्‌धोषयन्ति । वरमद्यकपोतः श्वोमयूरात् इति लोकायतिकानां प्रत्ययः। देहाभिन्नात्मवादे उपपन्ने मम देहः इत्यादिप्रयोगः केवलं लाक्षणिकः। अर्थकामावेव

पुरुषार्थौ इति मन्यमानाः चार्वाकाः दुःखसंमिश्रितमपि सुखं त्यक्तुं नोचितम् । दुःखभयात् दृष्टसुखत्यागेन नरः पशुवन्मूर्खो भवेत् । भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते किल इति तर्कयन्ति । प्रत्यक्षानुभाव्यं ऐहिकं सांसारिकसुखमुपेक्ष्य तपश्चरणादिकष्टक्रिया साध्यपरलोक सुखादौ प्रवृतिः मोक्षो रतिर्वा निरर्था । सा मौढ्यस्य पराकाष्ठा इत्यभ्युपगम्यते बार्हस्पत्यैः ।

अत्र वेदान्तिनस्तु प्रत्याचक्षन्ते - न चैतन्यं पृथिव्यादीनां संधातः धर्मो वा[२]। अशरीरता हि चैतन्यमयस्यात्मनः स्वरूपम् । आत्मानाम सकलप्राणिनां स्वसंवेद्यः अशरीरः प्रत्यक्चेतनः । अयमात्मा ब्रह्म[३] । ब्रह्मैव जगतः कारणं भवति चेतनत्वेन[४] । आगमाद्विना प्रमाणान्तरेण चिद्रूप्यात्मतत्वं न ज्ञातु शक्यम् । न शास्त्रं पदार्थान् सृजति किंतु यथाभूतानज्ञातान् ज्ञापयति । अतीन्द्रियार्थविषये - आत्मतत्वज्ञाने धर्माधर्मस्वरूपविज्ञाने च नः श्रुतिरेव प्रमाणमिति[५] ।

अहो, नैरात्म्यवादिनां चार्वाकानां चिंतन चमत्कृतिराचारहीना निश्चेतना। परमपुरुषार्थं मोक्षं विना शास्त्रं भावयेत् किंतु धर्मेण विना (शरीरभिन्न) चैतन्येन विना पुरुषस्य जीवितम् पशुवद् भवेत्[५]।

तथापि अध्यात्मविद्याप्रधानेऽस्मिन् भारते चार्वाकचिंतन प्रवृत्तिर्प्रादुरभूत् प्रचारं प्रापत् च इतीयं चिंतनास्वातन्त्र्यस्य वाक्स्वातन्त्र्यस्य च द्योतिका ।

१. (i) युक्तिर्बलीयसी यत्र सर्वं स्वभाविकं मतम् ।
कस्यापि नेश्वरः कर्ता न वेदो नास्तिकं हितत् ॥ शुक्रनीति सारः ४.३.५५

(ii) योऽवमन्येत ते मूले हेतु शास्त्राश्रयाद्द्विजः ।
स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दकः ॥ मनु. स्मृति. २.॥

(iii) मिथ्यादृष्टिर्नास्तिकता । अमर कोष : १.५

२. (i) चैतन्याव्यतिरेकेणैव हि कला (प्राणाद्याः) जायमानस्तिष्ठन्त्यः

प्रलीयमानाश्च सर्वदा लक्ष्यते। अत एव भ्रान्ताः केचित् । अग्निसंयोगात् घृतमिव घटाद्याकारेण चैतन्यमेव प्रतिक्षणं जायतेनश्यतीति । तन्निरोधे शून्यमिव सर्वमित्यपरे । घटादिविषयं चैतन्यं चेतयितुर्नित्यस्यात्मनोऽनित्यं जायते विनश्यतीत्यपरे। चैतन्यं भूतधर्म इति लोकायतिकाः । प्रश्नो प. शां भा. ६.२.

(ii) चैतन्यं पृथिव्यादीनामन्यतमस्य सर्वेषां विपरिणतानां वा धर्मो न भवति तथा

श्रोत्रादीनामन्तःकरणस्य च धर्मो न भवति इति ब्रह्मणो रूपमितिः ब्रह्मरूप्यते चैतन्येन । केनोप शा. भा. २.१

३. आत्मा हि नाम सर्वजंतूनां प्रत्यक्चेतनः स्वसंवेधः प्रसिद्धस्तेनैव स्वरूपेणोक्षीय अशरीरो व्योमवत्सर्वगत आत्मा ब्रह्मेत्यवगन्तन्यम् । छा.उप. शां. भा. ८.१४.१.

४. यस्माच्च जायते किंचिदस्तीति दृष्टं लोके तथा घटांकुरादिकारणं मृद्बीजादि। तस्मादाकाशादि-कारणत्वादस्ति ब्रह्म । ... तद्यदि मृद्बीजादिवत्कारणं स्यादचेतनं तर्हि । न । कामयितृत्वात् । न हि कामयित्रचेतन मस्ति लोके । सर्वज्ञं हि ब्रह्मेत्यवोचाम । तै.उप.शा. भा २.६

५. (i) न च धर्माधर्मयोः स्वरुपफलसाधनादिसमधिगमे शास्त्रादतिरिक्तं कारणं शक्यं संभावयितुम् । ब्र.सू.शं.भा. ३.१.८.

(ii) न तथा एतदात्मतत्त्वं प्रमाणान्तरेण विषयीकर्तुं शक्यते । बृ. उप. शा. भा. ४.४.२०

(iii) आगममात्रसमधिगम्य एव त्वयमर्थो धर्मवत् । ब्र.सू.शा. २.१.६.

# वैयाकरणनये चैतन्यस्वरूपम्

डॉ. दीक्षितपुष्पा

यद् वेदान्तनये ब्रह्मपदेनाभिधीयते, तदेव व्याकरणनये शब्दपदेन गीयत इति व्याकरणदर्शनमद्वैतसिद्धान्तेभ्यो नातिभिन्नं वर्तते । जाग्रदवस्थाया यो साक्षी स्थूलभुक्, स एव स्वाप्नप्रपञ्चस्य साक्षी प्रविविक्तभुक्, अथ च स एव सुषुप्तिगताज्ञानस्य साक्ष्यानन्दभुगिति, तिसृष्वप्यवस्थासु यन्न विलुप्यते, तदेव नित्यम् । जाग्रदवस्थायामुपलभ्य-मानानामिन्द्रियाणामसत्ता वर्तते स्वप्ने, तथा च स्वप्नावस्थायामुलभ्यमानानामन्तः- करणानामसत्ता वर्तते सुषुप्तावित्यनित्यता बाह्योन्द्रियाणामन्तःकरणानाञ्च । परन्तु सुषुप्तिगताज्ञानमपि यः साक्षात्करोति सुखमहमस्वाप्सं न किञ्चिदवेदिषम् इत्याकारकज्ञानेन, तस्य विलोपो न भवति कदापि, 'नहि द्रष्टुर्दृष्टेः विपरिलोपो भवती' ति श्रुतेस्तस्यैव नित्यत्वम्।

स च विज्ञानात्मात्मसंविदातिरिक्तं न किमपीति को न जानाति । अत्र नास्ति नानात्वं, 'नेह नानास्ति किञ्चन', 'एकमेवाद्वितीयम्', 'न तु तद् द्वितीयमस्ति' 'असङ्गो नहि सज्जते' इत्यादिश्रुतेः।

ज्ञेयभेदाद् बाह्यज्ञानेषु वैविध्यं वर्तते, परन्तु ज्ञेयरहितस्यास्य विशुद्ध-ज्ञानस्यात्मस्व-रूपस्य सजातीयविजातीयस्वगतादिभेदत्रयशून्यत्वमेव । जाग्रत्प्रपञ्चस्य ग्रहणं बाह्येन्द्रियै-र्भवति, स्वाप्नस्य चान्तरिन्द्रियैरिति तेषां पारतन्त्र्यम्, परन्त्वस्यावस्थात्रयस्य साक्षिणो ग्रहणाय नापेक्ष्यते तदतिरिक्तं किञ्चिदपीति स्वयंप्रकाशत्वमस्य । अस्मिन्नेव देशकालवस्तुगताः सर्वाः प्रतीतयः समुल्लसन्ति ।

एष प्रत्यक्चैतन्यरूप आत्मा सर्वेषां रूपादिविषयविकल्पानामधिष्ठानरूपेण वर्तमानोऽपि विषयभेदादतीतः । यतः विवर्तदशायां रूपादिविषयाणा-मस्तित्वरूपा भावरूपता स्वाकारेण विवृत्तसद्रूपब्रह्मोपधानादेव न स्वतः, तेन च नानात्वम् ।

संवर्तदशायामसताञ्च रूपादिविषयाणामभावरूपता नास्तित्वरूपा ब्रह्मसत्ताकारोपहितस्व-रूपनिषेधरूपत्वात् । तौ च रूपादीनां भावाभावौ ब्रह्मणि दशाभेदेन कल्पितौ, वस्तुतस्तु ब्रह्म तादृशदशाद्वयविनिर्मुक्तमेव । एकस्मिन्नेव ब्रह्मणि कार्यत्वञ्च कारणत्वञ्च, यथाक्रमं विभक्तत्वमविभक्तत्वं चेति सर्वेषु श्रुतिप्रमितवादेष्ववस्थितम् ।

देशकालोपाधिकृतौ क्रमाक्रमावप्यत्र न संभवतः । व्यावहारिकं सत्यं प्रपञ्चरूपं, प्रातिभासिकं च स्वाप्नप्रपञ्चाद्यप्यत्र न सन्ति, अतोऽन्नमयादिकोशेभ्यः पञ्चभ्यः पृथक्करणादेष आत्मा स्वरूपेणैव प्रकाशते ।

अन्तर्यामी स भूतानामाराद् दूरे च दृश्यते ।

सोऽत्यन्तमुक्तो मोक्षाय मुमुक्षुभिरूपास्यते ॥ वा १/१ उद्धरणम्

अयमेव देशकालवस्तुकृतपरिच्छेदत्रयशून्यत्वात्, तिसृष्वप्यवस्था-सूपलभ्यमानत्वात्, त्रिकालाबाधितत्वाच्च वेदान्तिनां सद्वस्तु, उपनिषदां च औपनिषदः पुरूषः, 'तं त्वौपनिषदं पुरुषं पृच्छामी' ति श्रुतेः ।

नास्यात्मसंविदात्मकस्य ज्ञानस्योत्पत्तिविनाशौ संभवतः । 'घट उत्पद्यते' इति घटोत्पत्तिर्ययात्मसंविदा ज्ञायते तयैवात्मसंविदा 'घटो नश्यती' त्यपि ज्ञायते । 'घटोऽस्ति' इति घटसत्ता यया ज्ञायते 'घटो नास्ति' इति घटाभावोऽपि तयैवात्मसंविदा ज्ञायते । इत्थञ्च घट उत्पद्यते, घटो नश्यति, परं ययात्मसंविदा घटस्योत्पत्तिविनाशौ ज्ञायेते तस्या संविद उत्पत्तिविनाशौ न भवतः । सा संवित्तु ज्ञानात्मिकैव । घटमहं जानामि, घटमहं न जानामि, इत्याकारकाणां सर्वेषां ज्ञानानामज्ञानाञ्च प्रत्ययो ज्ञानरूपेणैव भवति। घटस्य नाशेऽपि घटनाशस्य यज्ज्ञानं वर्तते, तस्य नाशो न भवतीति ज्ञानस्याविना-शित्वम्। अतः सृष्ट्यादावपि स्थितादस्मादेव ज्ञानात् सृष्टिर्जायते । महाप्रलयादिषु सर्वेषु प्रलीनेष्वप्येतन्न प्रलीयते । तथा च -

मासाब्दयुगकल्पेषु गतागम्येष्वनेकधा ।

नोदेति नास्तमेत्येका संविदेषा स्वयंप्रभा ॥ पञ्चदशी - १/७

1

एतावता वेदान्तिनां ज्ञानात्मकं ब्रह्म निरूपितम् । तच्च ब्रह्म शब्दात्मकमिति वैयाकरणाः । इदं ब्रह्मैव वैयाकरणानामात्मचैतन्यमस्ति । इदमेव स्फोटात्मकः शब्दः। इदं ज्ञानस्वरूपं शब्दब्रह्मैव सर्वजगतो बीजम् ।

ननु प्रागुक्तं ब्रह्म सर्वविकल्पातीततत्त्वम् । अधुना तु कथं तद्विपरीतमुच्यते। शब्दतत्त्वमिति ? इति चेन्न । विकाराणां प्रकृत्यन्वयाच्छब्दत्वोपपत्तेः । यथा हि घटकुण्डलादयो विकारा मृत्सुवर्णादिप्रकृत्यन्विता दृश्यन्ते, तथैवैते रूपादयो विषयाः शब्दरुपानुगता दृश्यन्ते । अत एषां प्रकृतिः शब्दतत्त्वमेव । विकाराश्च शब्दैरेव गृह्यन्ते, अत एव ब्रह्मणः शब्दतत्त्वरुपता । ज्ञेयस्य ज्ञानस्य चोपलब्धिः शब्देनैव जायत, इति ब्रह्मणः शब्दतत्त्वरूपता । निर्विकल्पकप्रत्यक्षेऽपि सूक्ष्मशब्दा अनुस्यूताः सन्तीति ब्रह्मणः शब्दतत्त्वरूपता । ज्ञानाकारस्य ज्ञेयाकारेण न स्वरूपगतो भेद, इति ब्रह्मणः शब्दतत्त्वरूपता। तदुक्तम् -

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते । वा १/१२३

ननु भिन्नस्वरूपाणां भिन्नेन्द्रियग्राह्याणाञ्च रूपादीनां कथमभिन्नरूपमभिन्नेन्द्रियग्राह्यञ्च शब्दतत्त्वं प्रकृतिः, उपादानोपादेययोः सारुप्यस्यैवोचितत्वात् इति चेन्न, रूपादीनां भिन्नरूपताया आविद्यकत्वात् "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति श्रुत्या प्रकृतेरेव सत्यत्वलाभात् । किञ्च, शब्देन वस्तु परिच्छिद्यते, अतः प्रकृतिविकृतिभावेन शब्दात्मकं वस्तु । तथाहि - यद्यर्थः शब्दात्मको न भवेत् तदा शाब्दे ज्ञाने न प्रतीयेत, किन्तु शब्देन शब्द एव प्रतीयेत, अन्येनान्यस्य प्रतीत्यसंभवात्, स्वस्यैव स्वप्रतीतिजनकतायाः प्रत्यक्षे दृष्टत्वात् । प्रतीयते च शब्देन अर्थ इति शब्दप्रकृतिकतया शब्दात्मकोऽर्थः । किञ्च, शब्देन विषयविशिष्टं ज्ञानमभिलप्यते, मम घट इति ज्ञानं जातमिति । न चान्येनान्यस्या-भिलापो युक्त इति शब्दात्मकोऽर्थो ज्ञानञ्चेति । किञ्च, सर्वेऽपि स्थितिप्रवृत्तिनिवृत्तिरूपा व्यवहाराः शब्देनैव क्रियन्त इत्यतोऽपि तेषां व्यवहाराणां तद्विषयाणां च मूलभूतं शब्दात्मकं

ब्रह्मैवेत्यतोऽप्यत्र शब्दतत्त्वमित्युक्तिर्ब्रह्मणि युज्यये । अतः शब्दतत्त्वस्यैव रूपाद्यात्मना विवर्तः स्वीकर्तव्यः इति शब्दतत्त्वमेव ब्रह्म । तदुक्तम् ।

शब्देष्वाश्रिता शक्तिः विश्वस्यास्य निबन्धनी ।
यन्नेत्रः प्रतिभात्मायं भेदरूपः प्रतीयते ॥ वा. १/११८

अत एव क्वचिदपि भर्तृहरिणा ब्रह्मणोऽभिधानं शब्दब्रह्मपदेन न कृतम् । तन्मते तु यात्मसंविदस्ति सैवात्मचैतन्यं, तच्च शब्दात्मकमेव । यतो ज्ञानं च सर्वविधं शब्दात्मकमेव भवितुमर्हति । तिसृष्वप्यवस्थासु जायमानाः सर्वे प्रत्ययाः निषेधरूपा विधिरूपाश्च ज्ञान एव पर्यवस्यन्ति । ज्ञानञ्चान्तरेण शब्दं न स्फुरति । सर्वेषां प्रत्ययानां निषेधेऽपि ज्ञानस्य निषेधाभावज्ज्ञान-स्यास्याविनाशित्वम् । ज्ञानमेवात्मा । स च शब्दात्मकः । विषयाणां भेदाद् वैषयिकज्ञानेषु वैभिन्नं भवति, किन्त्विदं ज्ञानं विषयाभावादद्वितीयमविनाशि च ।

इदं शब्दरूपज्ञानमेवात्मचैतन्यम् । यथा सर्वेऽनुभवाः शब्दात्मकास्तथैव 'अहमस्मि' इति स्वानुभवरूपं ज्ञानमपि 'अहम्' इति, 'अस्मि' इति पदद्वयेनैव प्रतीयते। अतः सर्वेष्वपि ज्ञानेषु सूक्ष्मशब्दानामनुवेधो भवत्येव । सर्वं ज्ञानमान्तरं बाह्यं च शब्दात्मकमेव सद् भासते। एवञ्च सर्वे अर्था बाह्या आन्तराश्च शब्देनैवावगम्यन्ते । अत एव शब्दोपग्राहिणः । ब्रह्मणो ज्ञानमपि शब्देनैव भवतीति तस्यापि शब्दोपग्राहिता। इत्थञ्च ब्रह्मस्वरूपाणां सर्वेषां ज्ञानानां प्रकृतिः शब्दतत्त्वमेव । आत्यन्तिके विचारे शब्दस्य ब्रह्मणश्च भेदो न लक्ष्यते । अर्थेष्वपि शाब्दिक एव भेदो वर्तते, अत एव सर्वेऽर्थाः शब्दात्मका एव ।

पश्यन्त्यामिमौ शब्दार्थौ लुलित इवैक्यमुपगतौ प्रतीयेते । अत एव भाष्यकारः - कोऽयं शब्दः, कोऽयमर्थः - घट इति शब्दः घट इत्यर्थ, इति । मध्यमायामुभयोः पृथक्प्रतीतिः । परप्रत्ययायने त्वियमेवात्मसंवित् कण्ठताल्वा-दिस्थानानि प्राप्य वैखरीवाग्भवति। अत एव य आत्मा स एव ज्ञानं, यज्ज्ञानं तत् शब्दात्मकम् । इत्थञ्च सर्वेषां ज्ञानानां वाग्रूपता सिध्यति ।

अत एवोक्तं भर्तृहरिणा -

वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती ।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी ॥ वा प. १/१२४

वैयाकरणानां वाग्योगदर्शनेनैवैतत् सर्वमनुगन्तुं शक्यते । ज्ञाने स्वाभाविकी वर्तते वाग्रूपता, यतः सर्वं ज्ञानं सूक्ष्मैः शब्दैरनुविद्धमिव दृश्यते । तेन शब्दानुवेधेनैव ज्ञानमात्मानं प्रकाशयति । तेषां शब्दानामभावे ज्ञानस्य प्रकाशकत्वमपि नाभि-व्यज्यते । यथाग्नेः प्रकाशकत्वस्य च तादात्म्यं, तथैव ज्ञानस्य शब्दस्य च । अथवा यथात्मचैतन्यमेवान्तर्यामिपरमात्मनः स्वरूपं, तथैव वाग्रूपता ज्ञानस्येति । जाग्रत्स्वप्नसुषुप्त्यादीनां तिसृणामप्यवस्थानां ज्ञानं वाग्रूपमेव । इयं वागात्मचैतन्यमेव, न तु वागिन्द्रियम् ।

जाग्रदवस्थायां जायमानं प्रत्यक्षं सविल्पकनिर्विकल्पकभेदेन द्विधा । विशेषधर्मपरिग्रहरहिते निर्विकल्पकज्ञानेऽपि 'इदं' 'तद्' इति सर्वनामशब्दाना-मनुवेधो भवत्येव । तदेव ज्ञानं, घटः, पटः, शुक्लः, नील, इत्यादिविकल्पानुगतो नानाशब्दैरेवाभिव्यज्यते ।

स्वप्नावस्थायां भिन्नजातीयेषु पदार्थेषु विज्ञानात्मैव स्वाप्नपदार्थीभूय प्रतीयते। इदं स्वाप्नं ज्ञानमपि शब्दात्मकमेव । परं तत्र शब्दभावनाबीजानि सूक्ष्मवृत्तित्वमुपगतानि भवन्ति। उत्थाने सति जायमानं स्वप्नस्य स्मरणमपि शब्दात्मकमेव ।

असंचेतितावस्थायां सुषुप्तावपि सुखविषयकं, मोहविषयकं वा ज्ञानमविद्यावृत्त्या भवति, 'सुखमहमस्वाप्सं न किञ्चिदवेदिषम्' इति । अनेन स्मरणेन सुषुप्तौ वर्तमानमात्मचैतन्यमेव शब्दरूपेणाभिव्यज्यते ।

इत्थञ्च जाग्रत्स्वप्नसुषुप्त्यादीनां तिसृणामप्यवस्थानां ज्ञानं वाक्तत्त्वोपरक्तमेव। सर्वत्र वर्तमानां स्वभाविकीमिमां वाग्रूपतां विहाय ज्ञानमपि न प्रकाश्येत । इयं ज्ञानस्य वाग्रूपतैव, यदन्तर्जगतो बाह्यजगतश्च बोधः शब्दानुगममन्तरेण न सम्भवतीति । अस्या

वाग्रूपताया बीजानि ऋग्वेदे सन्ति

वायुवत्प्रवहन्ती वागेव विश्वानि भुवनानि रचयति । सर्वे लोकास्तस्मादेव संभवन्ति। सैव विश्वकर्मा ऋषिः । तत एवाविर्भूय जगत् तस्यामेव तिरोभवति।

अहमेव वाता इव प्र वामि आरभमाणा भुवनानि विश्वा ।

ऋग्वेद वाक्सूक्त १०/१२५/२

वाग् वै ब्रह्म । ऐ. ब्रा. ६/३

वाग् वै विश्वकर्मर्षिः । वाज. १३/५८

वाचा हीदं सर्वमिदम् । श. ब्रा. ८/१/२१९

इत्थञ्च वेदे वाक्पदेन परब्रह्मैवाभिधीयते ।

वाग् वै सम्राट् परमं ब्रह्म, नैनं वाग् जहाति ।

अत्रापि वाक्पदेन परब्रह्मैवाभिधीयते । अस्मात् परब्रह्मरूपशब्दादेव जगद्विवर्तत इति वैयाकरणाः।

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।

विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ वा. १/१

एकस्य तत्त्वादप्रच्युतस्य भेदानुकारेणासत्यविभक्तान्यरूपोपग्राहिता विवर्तः। अथवा अद्वैतस्य वाक्तत्त्वस्य भेदेन प्रतीतिरेव विवर्तः।

शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः ।

छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तत ॥ वा. १/१२०

इत्यत्रापि परिणामपदेन विवर्त एवाभिधीयते । भगवता शंकराचार्येणाप्यस्मिन्नेवार्थे परिणामशब्दो बहु प्रयुक्तः । अतो जगदिदं वाग्रूपस्य शब्दस्यैव प्रतिभासः ।

तथाहि - ब्रह्मणो यः सर्वभूतविषयाकारेणोत्पत्तिनिधनादिभिर्विविधविकल्पैः परिच्छेदः, सोऽविद्याशक्तिवशात् सत्य इव भासते । न तु सत्या एव तथा विकल्प्यमाना

विषयाः, ब्रह्मणः श्रुतेन कूटस्थनित्यत्वेनोत्पत्तिनिधनादि-रूपसत्यविकल्पा-सम्भवात्।

ननु यदि विवर्तदशायां प्रतीयमाना विषया न सत्यास्तदा कुतस्तत्प्रतीतिरिति चेन्न, अनादौ संसारे यद् अभूद्, भवति, भविष्यतीत्यादिरूपं कालभेददर्शनं तदभ्याससञ्जातसंस्काराणां परिपाकवशात् कालोपाधिकस्तादृशः सर्वोऽपि व्यवहारः, न तु गवादितत्त्वनिबन्धनः। गवादीनां विषयाणां ब्रह्मणो विवर्तभूतानां ब्रह्मणोऽव्यतिरेके ब्रह्मणो देशकालकृतविभागाभावेन तेषामपि तदभावात् । ब्रह्मणो देशकालकृतविभागाभावश्च ब्रह्मविद आहुः -

"प्रदेशोऽपि ब्रह्मणः सार्वरूप्यमनतिक्रान्तश्च विकल्पश्च इति।"

देशकालभेदेन व्यवहारानुपातिनो धर्मधर्म्यादिभावेन उत्पत्तिनिधनादिभिश्च विकल्प्यमाना विषया एव, न तु तैर्व्यवह्रियमाणमपि ब्रह्म, यतो विवर्तदशायामपि ब्रह्म अनादिनिधनमेव ।

अत एव ब्रह्मणो दशाद्वयी शास्त्रे प्रसिद्धा । एका विद्यायाऽप्रविभागदशाऽपरा चाविद्यया प्रविभागदशा । तत्र यद्यपि प्रविभागदशायां ब्रह्म विविधविकल्पगोचरम्, तथाहि तस्यां दशायामेकस्यैव ब्रह्मणो धर्मधर्म्यादिरूपेण विकल्पः । 'घटोऽभूत्, भवति, भविष्यति' इत्यादिकालभेदेन, भिन्नजाति-पुरस्कारेण च गोघटादिप्रत्ययः, कयोश्चिद् भेदप्रत्ययः कयोश्चिदभेदप्रत्ययः, क्वचिद् भावप्रत्ययः क्वचिदभावप्रत्ययः तथापि कार्यरूपेण प्रविभागाभावदशायां ब्रह्मतत्त्वं तादृशसर्वविकल्पातीतम् । तत्र प्रतीयमानो भेदश्च परावाचोऽतात्त्विकोऽन्यथाभावः । तथाहि -

भेदोत्ग्राहविवर्तेन लब्धाकारपरिग्रहा
आम्नाता सर्वविद्यासु वागेव प्रकृतिः परा ।
एकत्वमनतिक्रान्ता वाङ्नेत्रा वाङ्निबन्धनाः
पृथक् प्रत्यवभासन्ते वाग्विभागा गवादयः ॥ वाक्यपदीप

स्वोपज्ञवृत्ति १/१२६ उद्धरण

वागेव पराप्रकृतिः, परमोपादानमद्वैततत्त्वञ्च । अस्मिन्नद्वैते वाक्तत्त्व एव जगत् घटपटाकारेण भेदेन प्रतीयते । इत्थञ्च शब्दोऽर्थश्च यत्रैकत्वमाप्नुतः सा ज्ञानरूपा सत्तैव शब्दब्रह्म । अतो वेदान्तिनां ब्रह्मैव वैयाकरणानां शब्दः । तत्रेयं भेदप्रतीतिरेव विवर्तः ।

बह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम् ।
विवृत्तं शब्दमात्राभ्यस्तास्वेव प्रविलीयते ॥ वाक्यपदीय
स्वोपज्ञवृत्ति १/१ उद्धरण

शब्दप्रसूतिरिदं जगत् शब्दमात्राभ्य एव विवर्तमानं तत्रैव लयमेति । अतः शब्दतत्त्वमेव ब्रह्म । तस्य च विवर्तावस्था जगत्, संवर्तावस्था च प्रलय इत्युच्यते ।

वागेवार्थं पश्यति वाग्ब्रवीति वागेवार्थं निहितं सन्तानोति ।
वाच्येव विश्वं बहुरूपं निबद्धं तदेतदेकं प्रविभज्योपभुङ्क्ते ॥ वा. स्वोपज्ञवृत्ति
१/११८ उद्धरण

अन्तःस्थितो द्रष्टापि वागेव । वक्तापि सैव । वागेव स्वस्मिन् स्थितं विश्वं प्रसारयति । विभज्य चैनमुपभुनक्ति । बहुरूपं विश्वं वाच्येव निबद्धम् ।

अद्वैतप्रस्थाने ब्रह्म द्रव्यम् । तच्चार्थपदवाच्यम् । तस्माद् विवर्तमानं जगत् शब्दात्मकमर्थात्मकं च । किन्तु व्याकरणदर्शने यद् ब्रह्म, तद् शब्दपदवाच्यम् । तस्माद् विवर्तमान जगत् शब्दात्मकमर्थात्मकं च । सर्वरूपत्वन्तु सर्वेषां तत्राध्यासात् । सर्वेषां विकल्पानां कल्पितत्वादाश्रयस्यैकत्वाच्चोभयोः प्रस्थानयोर्वस्तुगत्यैकत्वम् । जगदिदं यस्मिन्नध्यस्तं, तद् शब्दात्मकं ब्रह्म एव नामरूपात्मकस्य जगतोऽधिष्ठानम् । जीवात्मापि तस्मादभिन्न एव ।

वागेव विश्वा भुवनानि जज्ञे वाच इत् सर्वममृतं यच्च मर्त्यम् ।
अथदं वाग् बुभुजे वागुवाच पुरुत्रा वाचो न पदं यच्च नाह ॥

पुराणेष्वपीदमेव प्रतिपाद्यते ।

विभज्य बहुधात्मानं सच्छन्दस्यः प्रजापतिः ।

छन्दोमयीभिर्मात्राभिर्बहुधैव विवेश तम् ॥

छन्दोमयः प्रजापतिः छन्दोमयीभिः शब्दवर्णरूपमात्राभिरात्मानं विभज्य जीवो भूत्वा तस्मिन्नेव प्राविशत् । तथा च भर्तृहरिः -

सैषा संसारिणां संज्ञा बहिरन्तश्च वर्तते ।

तन्मात्राप्यतिक्रान्तं चैतन्यं सर्वजातिषु ॥ वा. प. १/१२६

यैषा सर्वप्राणिषु चैतन्यरूपा संज्ञा, यस्यां सत्यां सर्वास्वर्थक्रियासु प्राणिनां प्रवृत्तयः, यदुत्क्रन्तौ च सर्वेषां प्राणिनिकायानां प्रवृत्तिशून्यता सैषा वाग्रूपतैव । अतो योऽयं चैतन्ये वाग्रूपतानुगमस्तेन लोके ससंज्ञो विसंज्ञ इति व्यपदेशः क्रियते । एवं ह्याह

अर्थक्रियासु वाक् सर्वान् समीहयति देहिनः ।

तदुत्क्रान्तौ विसंज्ञोऽयं दृश्यते काष्ठकुड्यवत् ॥

वाक्यपदीय स्वोपज्ञवृत्ति १/१२६ उद्धरण

शिवदृष्टौ सर्वदेहे व्याप्तो रूपविहीनो वागात्मैव द्रष्टा । स एव चित्पदवाच्यः ।

स एवात्मा सर्वदेहव्यापकत्वेन वर्तते ।

अन्तःपश्यदवस्थैव चिद्रूपत्वमरूपकम् ॥

अस्यार्थः - वाग्रूपतानिबद्धं चैतन्यमेव प्राणिनोऽर्थक्रियासु प्रवर्तयति । सर्वा हि प्राणिनामर्थक्रियासु प्रवृत्तयो ज्ञानपूर्विकाः, जानाति इच्छति, यतते चेष्टत इति चेष्टायां क्रमस्वीकारात् । तच्च ज्ञानं वाग्रूपानुविद्धमेव । अत एव वाचैव युक्त नरतिर्यगादयः प्राणिनश्चेष्टन्ते, न तु स्थावरा वृक्षगुल्मलतादयः । यद्यपि वृक्षादिष्वपि वाय्वादिप्रयुक्तः कम्पादिरूपाश्चेष्टाः सन्त्येव, तथाप्यत्र चेष्टापदेन हिताहितप्राप्तिपरिहारानुकूलाः कायक्रिया एव गृह्यन्त इति बोध्यम् ।

गवादिभेदोऽपि परावाक्कर्तृक एव, स एव विवर्तः, सा परावागेव सर्वविद्यासु पराप्रकृतिराम्नाता, उपनिषत्सु हि बह्वयो ब्रह्मविद्या उक्ताः, तासु सर्वासु चेतनं

ब्रह्मैकमेवाद्वितीयं जगतोऽभिन्ननिमित्तोपादानत्वेन श्रुतम् । तच्चैतन्यम् परावाग्रूपमेवं च वाक्चैतन्ययोरभेदः ।

नामैवेदं रूपत्वेन ववृते रूपं चेदं नामभावेऽवतस्थे ।
एके तदेकविभक्तं विभेजुः प्रागेवान्ये भेदरूपं वदन्ति ॥ वाक्यपदीय
स्वोपज्ञवृत्ति / १ / १२ उद्धरण

इदं नामरूपात्मकं जगत् शब्दतत्त्वादभिन्नम् । सूक्ष्मवागात्मनान्तःस्थितं नामैव गवाद्यर्थाकारेण रूपत्वेन विवर्तते । रूपं च नामत्वेन व्यवह्रियते । एवं तन्नामरूपं विभागात्प्रागेकं तत्त्वम् । वैयाकरणाः तद् विभागरहितं तत्त्वमेव जागतिकपदार्थेष्ववस्थितं मन्यन्ते । सर्वास्ववस्थासु परिव्याप्तमपीदमवस्थातीतम्। अवस्थातीतत्वाच्च निर्विकारम् । सर्वेषु विकल्पेषु सत्स्वपि विकल्पातीतम् । सर्वेषां भेदानां निमित्तमपि भेदातीतम् । सर्वाः कार्यशक्तयोऽस्मिन्नेव समाविशन्ति । अविद्याशक्त्यास्मिन्नानात्वं विद्यया चेदं निर्विभागम् । कालभेदो मूर्तिभेदश्चाविद्याकृतावेव । क्रियाजन्यपौर्वापर्यमप्यत्र न भवति । मूर्तपदार्थानामायामत्रयमप्यत्र न भवति ।

न चास्योर्ध्वमधस्तिर्यग् वा मूर्तपरिवर्तप्रत्यङ्गानां
क्वचिदवच्छेदकोऽभ्युपगम्यते । वा. स्वो. १/१२

तथा च वेदेऽपि -

नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् ।
म तस्य प्रतिमा अस्ति यस्य नाम महद् यशः ॥ वाज. सं. ३२/
२०३, मै.स. ६/१७, श्वे.उ. ४/१९ ॥

भिन्नत्वेन ज्ञायमाना सर्वे विकारा ब्रह्मरूपेणोपादानेनाद्वैतभावेनान्विताः । न च शब्दं विना विकाराणां ज्ञानं भवितुमर्हतीति, ब्रह्म एव शब्दतत्त्वम् । ज्ञेयं ज्ञानं चोभे अपि शब्देनैवोपलभ्येते । कोऽप्यर्थोऽर्थन न गृह्यते, शब्देन गृह्यत, इति शब्दब्रह्मेति नाम्नोऽन्वर्थता । निर्विकल्पकप्रत्यक्षेऽपि सूक्ष्मशब्दा एवानुस्यूताः सन्तीति शब्दतत्त्वमेव

ब्रह्म । तदेव परावाग्। ज्ञाने नानाकारास्तु ज्ञेयविषयानुपादाय समुद्भवन्ति, न च ते ज्ञानस्यैक्यं विरुध्यन्ति । परब्रह्मरूपे ज्ञाने सर्वे ज्ञानाकारा अपृथग्भूता, अतो ज्ञेयाकाराद् ज्ञानाकारस्य भेदो न तात्त्विकः, यतः सर्वं ज्ञेयं ज्ञानत्वं नातिक्रमति । इत्थञ्च सर्वे शब्दा अर्थाश्च यत्रैकत्वमाप्नुवन्ति, सा ज्ञानरूपा सत्तैव शब्दब्रह्म ।

ज्ञानस्य ब्रह्मरूपता तु वेदान्तदर्शनेऽपि मता, किन्तु वैयाकरणनये ज्ञानमिदं सूक्ष्मशब्दादभिन्नमिति । इदं ज्ञानस्वरूपं शब्दब्रह्मैव सर्वजगतो बीजम् । तदेव भोक्तृत्वं, भोग्यत्वं, भोगत्वं च प्रतिपद्यते ।

एकस्य सर्वबीजस्य यस्य चेयमनेकधा ।
भोक्तृभोक्तव्यरूपेण भोगरूपेण च स्थितिः ॥ वाक्यपदीय १/४ ॥

यथा स्वप्ने विज्ञानात्मनि पुरुषे बाह्यतत्त्वं विनैव परस्परविलक्षणा अबहिस्तत्त्वा भोक्तृभोक्तव्यरूपा भोगरूपा ग्रन्थयो विवर्तन्ते, तथैवैकस्य हि ब्रह्मण इयमनुभूयमाना भोक्तृभोक्तव्यरुपेण भोगरूपेण चानेकधा स्थितिर्विवर्तरूपा व्यवहारव्यवस्था । अयं रूपविभागोऽसत्यः, ब्रह्मण्यविरुद्धशक्तिभिर्गाह्यश्च । शक्तय इमा अनिर्वचनीयाः, यतो ब्रह्मरूपेण ब्रह्मेतररूपेण वासां सत्त्वेनासत्त्वेन निरुपणमशक्यम् । ब्रह्मैव ग्रन्थितो ग्रन्थिमतिक्रामति । तेनातिक्रमणेन जायमानाविवर्ता एव भोक्तृभोक्तव्यभोगरूपेण प्रतिभासन्तेऽद्वैततत्त्वञ्च तथैव । इत्थञ्च विवर्तरूपप्रपञ्चोपहितः शब्दात्मा स्फोट एव व्यवहारे जीवः । अयमेवात्मचैतन्यम् । योऽयं दृश्यते नामरूपकृतो भेदः, तस्यायमेव साक्षी, अस्मिन् भेदो मिथ्या । प्रयोक्तुरयमात्मान्तःस्थितसूक्ष्मशब्दात्मक एव । अयमेव वेदस्य महावृषभः ।

चत्वारि श्टङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश ॥

भर्तृहरिणापि महावृषभत्वेनायमेव निरूपितः, तेनैव च सायुज्यमिष्टः । -

अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम् ।
प्राहुर्महान्तमषृभं येन सायुज्यमिष्यते ॥ वाक्यपदीय १/३० ॥

महाभाष्यकारोऽपि -

महता देवेन नः साम्यं यथा स्यात् ।

एतदुक्त्वा शब्दब्रह्मणा सह सायुज्यं व्याकरणाध्ययनं प्रयोजनं निरूपयन्ति। इदं सायुज्यं तु वस्तुतोऽन्तर्यमिरूपेण प्राणिन्यवस्थिते न वाक्तत्त्वेनैवेष्यते । इदं शब्दतत्त्वं ब्रह्मैवाक्षराणां निमित्तत्त्वादक्षरमित्युच्यते, कार्यकारणयोरभेदत्वात्, ज्ञानरूपे प्रत्यगात्मन्यन्तरविद्याया सन्निवेशिताः पदवाक्यरूपा वर्णा एव परप्रत्यायनाय प्रयत्नेनाभिव्यज्यन्त इत्यस्य निमित्तता । वर्णानामियमभिव्यक्तिरेव ब्रह्मरूपात्मनोऽभिष्यन्दः ।

सूक्ष्मामर्थेनाप्रविभक्ततत्त्वामेकां वाचनभिष्यन्दमानाम् ।
उतान्ये विदुरन्यामिव च एनां नानारूपामात्मनि सन्निविष्टाम् ॥
वाक्यपदीय १/५ ॥

यथा घटव्यक्तेरुपादानं मृत्तिका तथैव वर्णव्यक्तेरुपादानं ब्रह्म । अतो भर्तृहरिः-

"तत एव हि शब्दाख्यादुपसंहृतक्रमाद् ब्रह्मणः सर्वविकारप्रत्यस्तमये संवर्तनादकृताद् पूर्वं विकारग्रन्थिरूपत्वेनाव्यपदेश्याज्जगदाख्या विकाराः प्रक्रियन्ते"। तथा ह्युक्तम् -

यः सर्वविकल्पानामाभासेऽप्यनवस्थितः ।
तर्कागमानुमानेन बहुधा परिकल्पितः ॥
अन्तर्यामी स भूतानामाराद् दूरे च दृश्यते ।
सोऽत्यन्तमुक्तो मोक्षायं मुमुक्षुभिरुपास्यते ॥ वाक्यपदीय,
स्वोपज्ञवृत्ति १/१

'प्रक्रिया जगतो यतः' इत्यत्र जगत्पदं सकलागमेषु लाक्षणिकं, 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै', इति श्रुतेः । अतो ब्रह्मण उत्पत्तेः प्रागेव वेदाः सन्ति। इदञ्च युक्तिगम्यमप्यस्ति । यतश्चेतनः कोऽपि, ज्ञानपूर्वकमेव करोति ।

यथा कुम्भकारः, दण्डचक्रचीवरादिसामग्रीसम्पादनेन ज्ञानपूर्वकं कुम्भं करोति, तस्य ज्ञाने सूक्ष्मशब्दानामनुवेधो भवति, तथैव ईश्वरोऽपि सर्वज्ञानपूर्वकं सर्वप्रपञ्चं रचयति, तस्य ज्ञानेऽपि सूक्ष्मशब्दानामनुवेधो युक्तः । यतः किमपि ज्ञानं, संकल्पो, विचारो वा सूक्ष्मशब्दं विना न सम्भवति । अतः ईश्वरस्य सृष्टिविज्ञानेऽपि सूक्ष्ममशब्दानामनुवेधः स्वीकर्तव्यः । ते सूक्ष्मशब्दा एव वेदाः । वेदा एवशब्दब्रह्मणः प्रतिबिम्बरूपं सृष्टेः सनातनसंविधानम्। अतश्चास्य शब्दतत्वात्मकस्य ब्रह्मणः प्राप्त्युपायो वेद एव। वेदश्च ब्रह्मणोऽनुकृतिः, यतस्तस्मादेव ममाहमित्यहङ्कारग्रन्थिसमतिक्रमो जायते । तथा च भर्तृहरिः -

प्राप्त्युपायोऽनुकारश्च तस्य वेदो महर्षिभिः ।

एकोऽप्यनेकवर्त्मेव समाम्नातः पृथक् पृथक् ॥ वाक्यपदीय १/८

तथा च - वेदाभ्यासात् परमान्तरं शुक्लमजरं ज्योतिरस्मिन्नेवापारे तमसि वीते विवर्तते ।

वाक्यपदीय, १/५ स्वोपज्ञवृत्ति ।

अत एवोपनिषत्सु द्वेधा ब्रह्मनिरूपणं कृतम् ।

द्वे वाव ब्रह्मणी अभिधेये शब्दश्चाशब्दश्च । अथ शब्देनैवा-शब्दमाविष्क्रियते। मै. उ.

दर्शनेषु ब्रह्मणः प्राप्तिर्दशधा विकल्पिता । एवं दशसु विकल्पेषु या कापि ब्रह्मप्राप्तिर्भवतु, किन्तु तस्याः प्राप्त्युपायो वेदराशिरेव । वाग्रूपे स्थितो वेदः नित्योऽतीन्द्रियः, सूक्ष्मसंहतक्रमः, स्फोटात्मक एकश्च । अभिव्यक्तिनिमित्तात् क्रमलाभे संहितापदक्रमविभागेन चरणसमाख्या च प्रविभक्तमार्गत्वेन नानात्वम्।

इदं ज्ञानस्वरूपं शब्दब्रह्मैव सर्वजगतो बीजम् । स च परापश्यन्ती-मध्यमावैखरीरूपेण चतुर्धा। तत्र प्राणमयी सूक्ष्मा परावाक् स्वरूपेणैव दुर्बोध्या, सैव तत्त्वं जगदुपादानं च । मनोमयी पश्यन्ती वाक् परावाच एव भेदोऽस्ति । अस्यां क्रमसंहारो वर्तते । स्थूलशब्दब्रह्म एव मध्यमा । मध्यमातो वैखरी वागभिव्यज्यते,

यत्र वागिन्द्रियस्य प्रधानता भवति । इयमेव सक्रमो व्यवहारिकः कार्यशब्द इति कथ्यते । तथा च श्रीमद्भागवते -

शब्दब्रह्म सुदुर्बोधं प्राणेन्द्रियमनोमयं ।
अनन्तपारं गम्भीरं दुर्विगाह्यं समुद्रवत् । श्रीमद्भागवतं १/२१/३६॥

अत्र श्रीधरस्वमी -

तच्च सूक्ष्मं स्थूलं चेति द्विविधं । तत्र सूक्ष्मं तावत् स्वरूपतोऽपि दुर्ज्ञेयं ... प्रथमं प्राणमयं पराख्यम् । ततो मनोमयं पश्यन्त्याख्यम् । तत इन्द्रियमयं मध्यमाख्यम्, तस्य वाग्व्यञ्ज्यकत्वेन वागेन्द्रियप्रधानत्वात् । श्रीधरी १/२१/ ३६ ॥

नित्यशब्द एव सर्वासां जागतिकमूर्तीनां निरवधिप्रकृतिः । न हि तस्मादन्यत् जगतः किमप्युपादानम् । स एव सर्वेश्वरः सर्वशक्तिमान् महावृषभः । वाग्योगस्य ज्ञाता पुरुषोऽहङ्कारग्रन्थीन् विभिद्य भोक्तृभोग्यभोगानां त्रिपुटीं च विच्छिद्य निर्विभागे नित्ये शब्दे लयमेति । अयमेव संवर्तः । संवर्तदशायां शब्दतत्त्वमेवावशिष्यते । इयमेव ब्राह्मीस्थितिः, तां च वाग्योगविदेवाधिगच्छति।

इत्थञ्च व्यावहारिकशब्दस्य मूलकारणे शब्दतत्त्वे अपृथग्भूता नानाशक्तयः सन्ति । तस्मात् सूक्ष्ममूलतत्त्वात् नामरूपातीतादेव जीवस्य जगतश्च प्रसारो भवति, स च शब्दात्मक एव । नामरूपात्मकं प्रसारं प्राप्याप्यद्वैततत्त्वं निर्विकारमेव भवति । इत्थञ्च या वाक् सैव चित् । सैवान्तःस्थितः शब्दात्मा । स च 'ज्ञानस्य शब्दत्वापत्तिरिष्यते', 'अथायमान्तरो ज्ञाता सूक्ष्मवागात्मना स्थितः' 'सैषा संसारिणां संज्ञा' इत्यादिभिश्चोपपादितः ।

अस्य शब्दात्मनः प्रतिबिम्बमादायैव व्यावहारिकः शब्दश्चेतनायते । नित्यशब्दात्मैव परिच्छिन्नं भोगक्षेत्रं प्राप्य जीवत्वमश्नुते । स एव भोक्तृत्वं, भोग्यत्वं, भोगत्वं च प्रतिपद्यते। नादशब्दो, तद्बोध्या अर्थाश्चास्यैव विवर्ताः । अत एव शब्दार्थयोरभेदः । इत्थञ्च वैयाकरणैः सर्वेषु जागतिकपदार्थेष्वेकं निर्विभागं तत्त्वं स्वीकृतं, तच्च शब्दात्मकमिति शम् ।

# साङ्खययोगशास्त्रयोश्चैतन्यस्वरूपम्

महामहोपाद्याय

**एन्. रङ्गनाथशर्मा**

इह साङ्ख्यशब्देन कपिलमुन्युपज्ञं साङ्खयशास्त्रं विवक्षितम्, योगशब्देन च पतञ्जलिमुन्युपदिष्टं पातञ्जलं तन्त्रम् । कापिले हि तन्त्रे पञ्चविंशतिस्तत्वानि इति संख्यां पुरस्कृत्य सिद्धान्तो निरूपित इति साङ्खयशब्दस्तत्रनिरूढः । एवं तत्रैव पञ्चशिखाचार्येण षष्टिः पदार्था इति विभज्य 'षष्टितन्त्रम्' इति ख्यातो ग्रन्थः प्रणीतः । अथवा ज्ञानार्थकेन सङ्ख्याशब्देन अयं ज्ञानशास्त्रमित्यर्थे निष्पन्नो निरूढः कापिले तन्त्रे ।

कपिलमुनिप्रणोतो मूलग्रन्थ इदानीं नोपलभ्यते । गुरुशिष्यपरम्परयागतमिदं शास्त्रं सप्तत्या कारिकाभिः संगृहीतमाचार्येणेश्वरकृष्णाभिधेन परमुपलभ्यते । यत् सर्वैरपिप्राचीन पण्डितोत्तमैः प्रमाणत्वेन्न गृहीतं वरीवर्ति । सेयं साङ्ख्यकारिकाभिधा कृतिः श्रीवाचस्पति-मिश्रादिभिः पण्डितधौरेयैर्व्याख्यान-प्रणयनेन बहुधा भूषिता । अधुना उपलभ्यमानं साङ्खयप्रवचनसूत्रं, तद्भाष्यञ्च प्रामाणिकत्वेन न पुरस्क्रियेते तज्ज्ञैः ।

साङ्ख्यकारिकायामुक्तमीश्वरकृष्णेन - एतत् पवित्रमग्र्यं
मुनिरासुरयेऽनुकम्पया प्रददौ ।
आसुरिरपि पञ्चशिखाय तेन च बहुधा कृतं तन्त्रम् ॥
शिष्यपरम्परयागतमीश्वरकृष्णेन चैतदार्याभिः ।
संक्षिप्तमार्यमतिना सम्यग् विज्ञाय सिद्धान्तम् ॥
इति ॥

साङ्ख्यं योगश्चेति शास्त्रद्वयमपि द्वैतदर्शनम् । जीवात्मनां नानात्वस्य, मूलप्रकृत्यादीनां पञ्चविंशति तत्त्वानामुभयतस्वीकारात् । ईश्वरस्वीकारात् योगदर्शने

षड्विशांतिस्तत्त्वानि भवन्तीति विशेषः । सांख्यदर्शनमिदं प्राचीनतमं, महाभारत विष्णु पुराणादिषु बहुधोल्लिखितत्वान् सर्वैरपि बादरायणादिभिर्दर्शनकारैः परामृष्टत्वाच्च।

इहादौ साङ्ख्यदर्शनस्य सारः संक्षेपेण निरूप्यते यदवबोधेन चैतन्यस्य स्वरूपं विस्तरेण शक्यमवगन्तुम् । सांङ्ख्यदर्शने पञ्चविंशतिस्तत्त्वान्यङ्गीकृतानि । अत्र शास्त्रे तत्त्वशब्दः पदार्थवचनः । मूलप्रकृतिः, महत् (बुद्धिः) अहङ्कारः, शब्दस्पर्शरूपरसगन्धा इति पञ्चतन्मात्राणि, आकाश वायुतेजोजलपृथिव्य इति पञ्च महाभूतानि, श्रोत्रत्वक्चक्षुजिह्वा घ्राण - वाक् पाणिपादपायूपस्थ - मनांसीति एकादशेन्द्रियाणि - इति एभ्योऽतिरिक्तः पुरुषस्य (चैतन्यम्) इति पञ्चविंशतिस्तत्त्वानि । एषु च पुरुषातिरिक्तानि मूलप्रकृत्यादीनि चतुर्विंशतिः अचेतनानि - जडानीति बोद्धव्यम् । दिक्कालौ वैशेषिकादिभिरङ्गीकृतौ पदार्थौ नात्राङ्गीकृतौ।

मूलप्रकृतेः मूलम्, प्रकृतिः, प्रधानम्, अव्यक्तम् - इति नामान्तराणि । इयमनादिर्नित्या। महत्तत्त्वादिजननद्वारा समस्तस्य जडप्रपञ्चस्य मूलम् । अतएव-विकारजातानां प्रकृतिः कारणम् । अत एव जडपदार्थेषु प्रधानं तत्त्वम् । इन्द्रियाणामगोचरत्वेन सूक्ष्मत्त्वात् अव्यक्तमिति च गीयते । मूलप्रकृतेर्महत्तत्वं (बुद्धिः) जायते । महत्तत्वादहङ्कारः - इत्येव क्रमेण अपराणि तत्त्वानि जायन्ते । तत्र जनकत्त्वं प्रकृतेर्लक्षणम् । जन्यत्त्वं विकृतेर्लक्षणम् । विकृतिर्नाम विकारः । तत्र मूलप्रकृतिरविकृतिः । अनादित्वेन अजन्यत्वात् । महदाद्याः सप्त पदार्थाः प्रकृतिविकृतयः । स्वपूर्वतत्त्वजन्यत्वात् स्वपरतत्त्व जनकत्वाच्च। आकाशादयः षोडशपदार्थास्तु केवलं विकृतयः, तेभ्यः कस्यचिदपि तत्त्वान्तरस्य अनुत्पत्तेः । यद्यपि पृथिव्यादिपञ्च महाभूतेभ्यो वृक्षादयः प्राणिनां शरीरादयश्च उत्पद्यन्ते, तथापि वृक्षादीनां तत्त्वान्तरत्वंनास्ति, तत्त्वान्तरजनकत्वमेव प्रकृतित्त्वमित्यङ्गीकारात् । पृथिव्यादिधर्माणामिन्दियग्राह्यत्वादीनां वृक्षादिषु समत्त्वात् तेषां तत्त्वान्तरत्त्वं नास्तीति साङ्ख्यानामाशयः । चेतनः पुरुषस्तु न प्रकृतिः, कस्यापि तत्त्वान्तस्य अजनकत्वात् । नापिविकृतिः अनादिनित्यत्वेन अजन्यत्वात् । तस्मादयं पुरुषो न प्रकृति र्न च विकृतिरिति मन्तव्यम् । तदुक्तमाचार्येण ईश्वरकृष्णेन -

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारः न प्रकृतिर्न विकृतिः पुरुषः ॥ इति ।

एवञ्च पञ्चविंशतिः पदार्थव्यूहः । दिक्कालौ च आकाशमेव । प्राणस्तु इन्द्रियाणां वृत्तिः, न पदार्थान्तरम् इतिस्थितिः । राजवार्तिकनाम्नि साङ्ख्यदर्शनग्रन्थे - एषु पञ्चविंशतितत्त्वेष्वपि प्रत्येकं विद्यमानान् एकत्त्व, परार्थत्व, अकर्तृत्व, बहुत्व, सिद्धि - प्रभृतीन् धर्मान् गणयित्वा "इति षष्टिः पदार्थानामष्टभिःसिद्धिभिः सह" इत्यभिहितम् । प्रकृतेऽनुपयोगान्नायं विचारस्तन्यते ।

अत्रेदं बोद्धयम् । "सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः" इति साङ्ख्यसूत्रम् । गुणानां या समावस्था प्रकृतिः सा किलोच्यते इति षड्दर्शनसमुच्चये हरिभद्रसूरिः न्यूनाधिकभावराहित्येन विद्यमानं गुणसामान्यं प्रकृतिरिति फलति । अत्र सत्त्वरजस्तमांसि शक्तिविशेषवन्ति द्रव्याण्येव, न तु वैशेषिकाभिमता गुणाः । संयोग विभागवत्वात् लघुत्व गुरुत्त्वचलत्त्वादिधर्मवत्त्वाच्च । नहि संयोगादयो गुणा द्रव्यमनाश्रित्य तिष्ठन्ति । गुणशब्दस्य रज्जुरित्यर्थान्तरमस्ति । रज्जुरिव पुरुषबन्धनोपयोगित्वात्, परार्थत्वाच्च प्रकृतेः सत्वादिषु गुणशब्दः प्रयुक्तः साङ्ख्य दर्शनकारैरित्यवगम्यते । एवं शब्दादीनि पञ्चतन्मात्राणि महाभूत जनकान्यपि परमाणुसदृशानि सूक्ष्मद्रव्याण्येव । महाभूतेषूपलभ्यमानाः शब्दादयास्तु गुणा इत्यन्यत् ।

तत्र सत्त्वं सुखरुपं प्रकाशकम् । रजो दुःखरूपं प्रवर्तकम् । तमस्तु मोहरूपं ज्ञानस्य अवरोधकम् । सत्कार्यवादः परिणामवादश्च साङ्ख्यानामभिमतौ । प्रकृतिरेव जगद्रूपेण परिणममाना जगतः कर्त्रीति बोद्धयम् । सृष्टिकर्ता परमेश्वरो नाङ्गीक्रियते ।

**पुरुषनानात्वम्**

आत्मन एकत्वे कश्चित् पुरुषः सुखी, कश्चित् दुःखी, कश्चिद्बद्धः कश्चिन्मुक्तः इत्यादि व्यवस्थाया अनुपपत्तेः प्रतिशरीरमात्मा भिन्न एवेति असंख्याताः सन्ति आत्मानः (पुरुषाः) । तदुक्तं सांख्यसूत्रे जन्मादिव्यवस्थातः पुरुषबहुत्वं इति । आत्मा

तु पद्मपत्रवन्निर्लेपोनिःसङ्गो निर्गुणो निष्क्रियश्च । चेतनस्य पुरुषस्य संनिधिमात्रेण जडायां प्रकृतौ प्रवृत्तिरूपाक्रिया जायते, लोहचुम्बक सांनिध्यात् सूच्यामिव । प्रकृतेः प्रवृत्तिश्च पुरुषविमोक्षार्था, तुदुक्तम्-

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ॥ इति ॥

अथचैतन्यस्वरूपं विविच्यते ।

पुरुषः, आत्मा, चेतनः - चेतनम्, चैतन्यम् - इति पर्यायशब्दा एकार्थकाः । प्रायेण साङ्ख्याः पुरुषशब्दं प्रयुञ्जते चैतन्यार्थकम् . चिती संज्ञाने इति धातेर्निष्पन्नोऽयं शब्दो ज्ञानार्थकः । न च घटः पटः इत्यादि ज्ञानमेवात्मेति मन्तव्यम्। तादृशज्ञानस्य वृत्तिज्ञानत्वात्। आत्मातु प्रज्ञान शब्दाभिधेयो घटादिविषयदूरो नित्यो विभुश्च । "प्रज्ञानं ब्रह्म" "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिश्रुतेः । अनुमानमपि प्रकृत्यतिरिक्तस्य चैतन्यस्य सिद्धौ प्रमाणम् । तथाहि - चेतनाऽहं करोमि इति प्रत्ययः सर्वानुभवसिद्धः । प्रकृति परिणामस्य देहस्य जडत्वेन चेतनताधर्मः स्वरूपतस्तत्र नास्तीति परधर्मः कश्चन तत्रारोपित इति वक्तव्यम् । तेन प्रधानादीनां सर्वेषां जडत्वेन तदन्यः कश्चन चेतनताधर्मवान् पदार्थः सिध्यति । स चास्माकमात्मा पुरुषः इति । परिशेषानुमानप्रयोगश्चेत्थम् प्रकृतेरन्योऽस्ति चेतनाधर्मवान् शरीरे । प्रधानादीनां जडत्वेन चेतनानाश्रयत्वात्। यन्नैवं तन्नैवम् इति । गुणगुणिनोरभेदाच्च चेतताधर्मवान्, चेतनः, चैतन्यम् - इत्यादि व्यवहारः । "साक्षी चेता केवलो निर्गुणश्च" इत्यदिश्रुतेः पुरुषस्य साक्षित्वं, चेतनताधर्मवत्वम्, निःसंगरूप केवलत्वम्, निर्गुणत्वञ्च सिध्यन्ति । अयं न प्रकृतिर्नविकृतिरित्युक्तपूर्वम् । न प्रकृतिः न कस्ययित् कारणम् न कस्य-चिज्जनकम्। न विकृतिः = न कस्यचित्कार्यम् न केनापि जन्यम्, अनादित्वात् । एतादृशे चैतन्यस्वरूपे पुरुषे नित्यत्वं,व्यापकत्वं, निखयवत्वम्, अकर्तृत्वं, द्रष्टृत्वं, नानात्वं, त्रिगुणशून्यत्वम् - इत्यादयो विंशतिर्धर्माः शास्त्रकारैर्गणिताः सन्ति । प्रकृतौ तु एतद्विरुद्धाः, त्रिगुणत्वं, अचेतनत्वं, विषयत्त्वमित्यादयो धर्मा इति विवेकः ।

एवञ्च चेतनमचेतनञ्चेति पदार्थद्वयं निष्कर्षे स्थितम् । चेतनस्वरूपः आत्मा तु

प्रतिशरीरं भिन्नो जीव संज्ञितोऽनन्तः । अचेतनस्वरूपा प्रकृतिस्तु मूलप्रकृति संज्ञिका एकापि महदादिरूपेण परिणममाना घटपटाद्यात्मना अनन्ता भवतीति विज्ञेयम् ।

साङ्ख्यशास्त्रे पुरुषस्याकर्तृत्वेऽपि भोक्तृत्वमङ्गीक्रियते । उक्तञ्च साङ्ख्य-कारिकाया-मीश्वरकृष्णेन पुरुषस्य अस्तित्वसाधनावसरे "पुरुषोऽस्ति भोक्तृ-भावात्, कैवल्यार्थं प्रवृत्तेश्च" इति । अयमभिप्रायः। "अहं सुखमनुभवामि, अहं दुःखमनुभवामि" इत्यस्ति प्रत्यात्ममनुभवः। सुखादिकञ्च केनानुभूयते - भुज्यते? इति विचारे, केनापि भोक्ता भवितव्यमेवेति सिध्यति। स च भोक्ता पुरुष एव । न च बुद्धिरेव भोक्त्री भवति । सुखादीनामेव बुध्यात्म-कत्वात् । बुद्धेरेव भोज्यत्वं भोक्तृत्वंच न युज्यते, स्वात्मनि क्रियाविरोधात् । "असङ्गो ह्ययं पुरुषः" इति श्रुतिविरोधात् पुरुषे भोक्तृत्वं न युज्यते, किन्तु द्रष्टुत्वमेव । बुध्यादीनान्तु दृश्यत्वम् - इति केचिदाहुः । वस्तुतस्तु "अहं सुखं भुञ्जे, दुःखं भुञ्जे" इत्यनुभव बलात्भोक्तृत्वमपि पुरुषे बुध्युपाधिकं संभवति । परमार्थतस्तु

"अहं सुखमनुभवामि" इन्यादि प्रतीतिबुद्धिपुरुषयोः भेदाग्रहात्, भेदाग्रहश्च
अनाद्यविद्यायेति बोध्यम् ॥

पुरुषस्य अविकारित्वात् कर्तृत्वं नाभ्युपेयते । क्रिया तु प्रकृतावेव, न पुरुषे। नन्वेवं चेतनोऽहं करोमि, इच्छामि इन्याद्यनुभवसिद्धं ज्ञानेच्छाकृतीनां सामानाधिकरण्यं कथमुपपद्यते? इति चेत् । अत्राहुः । अयं सामानधिकरणप्रत्ययो भ्रान्तिरेव । भ्रान्ते र्निमित्तश्च प्रकृतिपुरुषयोः संयोगः । संयोगश्चात्र उभयोः संनिधानम् किमर्थं पुनर्भिन्नस्वरूपयोः संनिधानमिति चेत्

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥ इति कारिका ।

अयमभिप्रायः - सुखाद्यात्मकस्वस्वरूपस्य पुरुषकर्तृको भोगः प्रकृत्या अपेक्षितः। कैवल्यार्थं = कैवल्यकारणविवेक ज्ञानरुपस्य प्रकृतिपरिणामस्य प्राप्त्यर्थं पुरुषेण प्रकृतिरपेक्षिता । एवमुभयोः परस्परप्रयोजनसिध्यर्थं तयोः संयोगः

पङ्ग्वन्धयोरिव इति । यथा - एकः पङ्गुः पादहीनः गन्तुं न शक्नोति, किन्तु मार्गं द्रष्टुं शक्तः । अपरश्चान्धः गन्तुं शक्नोति किन्तु मार्गं द्रष्टुमशक्तः । केनापि निमित्तेन तौ कदाचिन्मिलितौ देशान्तरं प्राप्तुमिच्छतः । तदा अन्धः पङ्गुं स्वस्कन्धमारोपयति । अन्धः शरीरमारूढः पङ्गुः मार्गं दर्शयति । तेनमार्गेण अन्धो गच्छति । एवं परस्परसहकारेण उभावपि देशान्तरं प्राप्तुं शक्नुतः । कृतार्थयोस्तयोरनन्तरं वियोगो भवति । अत्र पङ्गुसदृशो निष्क्रियः पुरुषः । अन्धोपमा च अचेतना प्रकतिरिति बोध्यम् । प्रकृतिश्च पुरुषस्य मोक्षं संपाद्य निवर्तते । पुरुषोऽपि प्रधानं दृष्ट्वा मोक्षं लभते । एवमुभयोः कृतार्थयोरुभयोर्वियोगः पुरुषस्य कैवल्यमिति । वस्तुतस्तु अनादिरविद्यैव तयोर्मेलने निमित्तमिति सिद्धान्तः । पुरुषं विहाय प्रकृतेर्निवर्तनं मोक्ष इति । एवं चेतनेन प्रधाने वीक्षिते, प्रधाने क्रियोत्पद्यते, ततश्च महदादिक्रमेण जगतः सर्गः पुरुषोपभोगार्थम् पुरुषेण प्रधानस्य उपभोग एव संसारः ।

**अयमत्र निष्कर्षः**

अविद्यया पुरुषबुध्योर्भेदाग्रहणादेकत्वाभिमान एव तयोः सम्बन्धः। अतएव कर्तृत्वरहिते चैतन्ये कर्तृत्वं चेतनतारहितायांबुद्धौ चेतनत्वं प्रतीयत इति अहं करोमि जानामि चेति लोके व्यवहारः । तत्र बुद्धिरहङ्कारो मनश्चेति त्रीणि अन्तःकरणानि अभिधीयन्ते । इदमेवमेवेति निश्चयो बुद्धेर्वृत्तिः । सर्वप्रवृत्तावहमित्य-भिमानोऽहङ्कारस्य वृत्तिः । समीचीना कल्पना संकल्पः । इदं द्रव्यम्, इदं श्वेतम्, इयंक्रिया - इत्येदृशी कल्पना मनोवृत्तिः । ज्ञानकर्मोभयप्रवृत्तिहेतुत्वात् ज्ञानेन्द्रियं कर्मेन्द्रियंचेत्युभयात्मकं मनः ।

**ज्ञानोत्पत्तिक्रमः**

विभिन्नस्वरूपाणि घटपटादीनि वस्तूनि प्रथमं चक्षुरादि ज्ञानेन्द्रियेभ्यः स्वाकारं समर्पयन्ति । इन्द्रियाणि तमाकारं मनसे अर्पयन्ति । मनश्च अहङ्कारद्वारा बुद्धये अर्पयति । स्वच्छा द्रव द्रव्याकारा बुद्धिः अर्पितवस्त्वाकारं प्रतिपद्यते, यथा कुल्यायां प्रवहन्ती जलधारा कुल्याकारं प्रतिपद्यते तथा । वस्त्वाकारप्रतिपत्तिरियं बुद्धेः परिणामः। अयं परिणाम एव वृत्तिज्ञानमित्यवगन्तव्यम् । वृत्तिज्ञानसहितायां बुद्धावात्मनः

प्रतिफलनमेव वस्तु = साक्षात्कारः, स एव अनुभवः । नैयायिकास्तु आत्मा मनसा युज्यते, मन इन्द्रियेण, इन्द्रियमर्थेन, ततस्तु ज्ञानरूपो गुणः आत्मनि उत्पद्यते इति संगिरन्ते । साङ्ख्यास्तु आत्मनो निर्गुणत्वात् ज्ञानं तावत् बुद्धिरूपे महत्तत्वे जायते - इन्यभिप्रयन्तीति भेदः ।

अविवेकेन बुद्धितादान्म्यापन्ने पुरुषे बुद्धिगतं ज्ञानं सुखदुःखादिमत्त्वं कर्तृत्वञ्च यथा प्रतीयेते, तथा बुद्धावपि चेतनतादत्म्यापन्ने चेतनत्ववत्वमपि प्रतीयते इति सारम्। तथाच लोके अहं जानामि, अहं करोमि, अहं सुखी, अहं दुःखी इति व्यवहारः संगच्छते ।

**पुरुषस्य बन्धः**

सर्वो हि जन्तुः प्रतिकूलतया वेदनोयं दुःखं जिहासति । तत्र लौकिकै-भैषज्यादिभिरूपायै जरामरणवियोगरोगादीनामात्यन्तिकी निवृत्तिर्न भवतीति मन्वानः प्रेक्षावान् पुरुषः शाश्वताय दुःखमोक्षाय प्रयतते । रोगनिदानं ज्ञात्वा चिकित्सा कर्तव्येति न्यायेन, दुःखनिमित्ते जिज्ञास्यमाने सर्वदर्शनसंमतोऽधर्म एव दुःखनिदानमित्यवगम्यते। अधर्मश्च दुष्कृतिजन्यः कश्चन संस्कारः ।

ननु कृतिसंस्कारयोः सामानाधिकरण्येन भवितव्यम् । कृतिश्चनामकर्तृत्वम्। कर्तृत्वञ्च कस्य ? सांख्यनये पुरुषस्य अकर्तृत्वात् प्रकृतेश्च जडत्वात् - इति चेत् । उक्तपूर्वमेव समाधानम् । स्वच्छेदर्पणे मुखप्रतिबिम्बवत् स्वच्छायां बुद्धौ चैतन्यस्य प्रतिबिम्बात् बुद्धि चैतन्ययोर्भेदाग्रहणात् उभयोरेकत्वाभिमानेन कृति संस्कारयोर्बुद्धौ संभवात् । वृत्तिज्ञानमिव सुखदुःखेच्छाद्वेषाधर्माधर्मसंस्कारा अपि बुद्धेरेव धर्मा इति मन्तव्यम् । बुद्धिस्तु न चेतना परिणामित्वात् मृत्पिण्डवत् । चैतन्यस्यैव परिणामित्वाभ्युपगमे विकारित्वेन तस्य अनित्यत्व प्रसङ्ग इति ।

**बुद्धेरेव बन्धमोक्षौ**

यद्यपि विभिन्नेषु शास्त्रेषु पुराणेषु च कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते इत्यादिवचनानामुपलम्भात् जीवात्मन एव संसारबन्धः, तस्यैव मोक्ष इति प्रतीयते,

लोके जनानां प्रसिद्धव्यवहारोऽपि तथैवास्ति, तथापि सांख्यशास्त्रकाराः बुद्धेरेवबन्धमोक्षावामनन्ति न तु पुरुषस्य, तस्य पुष्करपलाशवन्निर्लेपत्वात् असङ्गत्वात् धर्माधर्मसंस्कारानाश्रयत्वाच्च । जीवात्मनो बन्धमोक्षविति प्रसिद्धिस्तु अन्यथा संभवति। तथाहि । बुद्धिपरिणाम एव घटादिविषयक्वृत्तिज्ञानमित्युक्तम् । वृत्तिज्ञानविषयभूताः वित्तपुत्रकलत्रादयोविषयाः तत्संयोग वियोगजन्यसुखदुःखादयश्च बुद्धिनिष्ठा अपि बुद्धिपुरुषयोर्भेदाग्रहात् चैतन्यरूपे पुरुषे उपचरिता भवन्ति । आरोपिता भवन्तीति यावत्। अविद्यमानधर्माणामारोप एव पुरुषस्य बन्धः । वस्तुतस्तु सुखदुःखादीनां बुद्धिनिष्ठत्वात् बुद्धेरेव बन्ध इति बोध्यम् ।

अनेकजन्मसंपादितपुण्यबलेन कस्यचिदेव पुरुषधौरेयस्य सद्गुरूपदेशात् विवेकख्यातिरुपजायते। विवेकख्यातिर्नाम सम्यगात्मस्वरूपज्ञानम् । तस्य अहं निष्क्रियः, निःसङ्ग, सुखदुःखादिधर्मरहितः, प्रकृतेरहं भिन्नः, केवलं द्रष्टा प्रकृतेः इति ज्ञानम् । उक्तञ्च कारिकायाम्

दृष्टा मयेत्युपेक्षको दृष्टाहमित्युपरमत्यन्या ।

सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य । इति। इदं तात्पर्यम् = पुरुषस्तावत् उत्पन्नायां विवेकख्यातौ अहो ! सर्वमिदं प्रकृतेरेव चेष्टा । न मे किञ्चित् इति भावेन न पुनर्दर्शनाय प्रवर्तते । प्रकृतिश्च दृष्टाऽहमनेन पुरुषेण इति मत्वा न पुनरात्मानं दर्शयति। शब्दाद्युपभोगं न जनयति । अज्ञानरूपस्य निमित्तस्याभावात् । बुद्धिश्च स्वप्रकृतौ लीयते । पुरुषस्तु चैतन्यस्वरूपस्तिष्ठति। स्वकारणे प्रवृतौ लयएव बुद्धेर्मोक्षः स्वस्वरूपेणावस्थानं वा पुरुषस्य मोक्षः इति॥

**अथ योगशास्त्रसंमतं चैतन्यम्**

तत्रभवता पतञ्जलिमहर्षिणा योगशास्त्रं प्रणीतम् । पादचतुष्टयघटितस्यास्य ग्रन्थस्य आदिमं सुत्रं अथ योगानुशासनम् इति । अनुशासनमित्युक्तेरिदं न जिज्ञासाशास्त्रं किन्तु उपदेशशास्त्रमिति गम्यते । सांख्य शास्त्रस्येव योगशास्त्रस्यापि प्रकृत्यादीनि पञ्चविंशतिस्तत्वानि संमतानि, ईश्वरतत्त्वस्यापि स्वीकारेण आहत्य षड्-विंशतिस्तत्वानीति शेषः । इदमपि द्वैतदर्शनम्। ईश्वरस्याङ्गीकारात् इदं "सेश्वरसांख्यम्"

इत्यभिदीयते विज्ञैः। क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः। अपरामृष्टः = असंश्लिष्टः। संश्लिष्टस्तु संसारीजीवः । मुक्तोऽप्यसौ पूर्वकाले क्लेशादिभिः संश्लेषात् बद्ध इव । तस्मादीश्वरः कदाप्यसंश्लिष्टो नित्यमुक्तः पुरुषविशेषः । स च सर्वज्ञो निरतिशयैश्वर्यवान् । तन्निमित्तश्च अनादिसिद्ध प्राकृतशुद्धसत्त्वात्म-कचित्तसंबन्धात्। स चेश्वरः "पुर्वेषामपि गुरुः कालेनानवच्छेदात्" इति द्रष्टव्यम्। ईश्वरस्याङ्गीकारे प्राधान्येन इमानि कारणान्युदाहरन्ति -

१. परमप्रमाणभूतो वेदः, शास्त्राणि, पुराणानि च परमेश्वरं सर्वज्ञं सर्वशक्तमैककण्ठ्येन अङ्गीकुर्वन्ति ।

२. मनुष्यादिषु ज्ञानधारा परम्परया प्रवहति । नद्या इव तस्याः किञ्चिन्मूलस्रोतसा स्थिरेण भवितव्यम् । तस्या ज्ञानधाराया मूलं परमेश्वरः । अत एवायं पूर्वाचार्याणाम् ब्रह्मादीनामपि गुरुः ।

३. जडायाः प्रकृतेः पुरुषेण संयोजनं केन क्रियते ? प्रलयकाले च पुरुषात् केन वियोज्यते ? कर्तारमन्तरा जडायाः प्रकृतेः स्वतः प्रवृत्तिर्दुरुपपादा । स च कर्ता ईश्वर एव - इत्यादीनि ॥

संसारिणो जीवास्त्वनन्ताः । ते च पूर्वोक्तक्लेशादिभिः संश्लिष्टाः । अत एव संसारेण बद्धाः यथायथं सुखदुःखानि अनुभवन्ति । अविद्याऽस्मिता रागद्वाषाभिनिवेशाः पञ्च क्लेशाः तत्र अनित्ये स्वर्गादौ नित्यत्वप्रत्ययः, अशुचौ कायादौ शुचित्व = बुद्धिः, दुःखे भोजनवनितादौ सुखत्वारोपः, अनात्मनि देहादौ आत्मबुद्धिः - इत्यविद्या - चतुष्प्रकारा । प्रकृतिपरिणामे बुद्धौ प्रकृतिविदूरे चैतन्यस्वरूपे जीवात्मनि च अभेदभ्रमोऽस्मिता । रागद्वेषौ च प्रसिद्धौ। मरणादिभ्यो जायमानस्त्रासः अभिनिवेशः। एतैः पञ्चाभिः क्लेशापादकैः क्लिश्यमानो जीवो बद्धइत्यभिधीयते ।

एतैःक्लेशैः क्लिश्यमानो जीवः कदाचित् पूर्वार्जित = पुण्यबलेन सुदुरूंप्राप्य, तदुपदेशात् मोक्षाय यतते । तदर्थं योगशास्त्र योगानुष्ठानक्रमः, तदङ्गनि यमादीनि, ईश्वरप्रणिधानम् - इत्यादीनि साधनानि साधनपादे विस्तरेण अभिहितानि । तेषु

सम्यगनुष्ठितेषु विवेकख्यातिरुत्पद्यते । ततः क्लेशानां तन्मूलकर्मणाञ्च निवृत्तिर्भवति। पुरुषार्थशून्या गुणाः प्रधाने विलीयन्ते । जीवनाम्ना अभिहितपूर्वं कूटस्थनित्यं चैतन्यं स्वस्वरूपेऽवतिष्ठते । इदमेव मोक्षपदाभिधेयं स्वस्वरूपावस्थानं नामकैवल्यमित्यतिशोभनम् ॥

# मीमांसायां चैतन्यावधारणा

डॉ. सोमनाथ नेने

भारतीय दार्शनिकप्रस्थानेषु विद्यमाना चैतन्यावधारणा आत्मस्वरुप विवेचन प्रक्रियायामेव प्रकाशिता वर्तते । यद्यप्यात्मनः शरीरेन्दियमनोभ्यः पार्थक्यं सर्वेषामप्यास्तिकदार्शनिकप्रस्थानेषु समानरूपेणाभिमतं तथाप्यात्मनि यच्चैतन्य-मनुभूयते तदात्मनः स्वरूपं तद्भिन्नं वेति वर्तते दार्शनिकानां विवादविषयः । दर्शनस्य नास्तिकवर्गे प्रतिष्ठिते आर्हतदर्शने जीवाजीवयोर्द्वयोः पदार्थयोर्मध्ये चेतनद्रव्यत्वेनात्मनः स्वर्गकारादनैकान्तिकमात्मनः स्वरूपं चैतन्यमिति सुतरां वक्तुं शक्यते[1]। आस्तिकदार्शनिकप्रस्थानेषु सांख्यनये यथा पुरुष पदवाच्यस्यात्मनः स्वरूपत्वेन चैतन्यमभिमतंत[2]थैव अद्वैतवेदान्तिनाम्मतेऽपि ब्रह्मणः सच्चिदा-नन्दात्मकत्वाङ्गी-काराच्चैतन्यमात्मनः स्वरूपत्वेनैवाभिमतं वर्तते[3] । विशिष्टादैत-वादिभिरप्यात्मनो य पार्थत्व धर्मभूतज्ञानवत्वाभ्यां सहात्मनो चित्स्वरुपत्व-मप्यङ्गीक्रियते[4] । औलूक्यमता-वलम्बिनस्तर्क रसिका अक्षपादानुयायिनश्च जडत्वमेवात्मनस्स्वरूपं मन्वते । एतयोर्नये चैतन्यस्यात्मरूपत्वन्नैवाभिमतमपितु ज्ञानाभिन्नत्वस्यास्य[5] आत्म-गुणत्वमेवाभिमतमेतेषाम्।

आस्तिकचिन्तनप्रस्थानेषु परिगणितं मीमासाशास्त्रं हि प्राधान्येन विधिबोधितेषु कर्मसु प्ररुढ़प्रवृत्ति - प्रतिपादनार्थमेव प्रवर्तते । विधिवाक्यप्रधानेषु

वैदिकवाक्याविभागेषु सर्वत्र कर्मप्रतिपादकत्वमङ्गीकुर्वद्भिरेभिः वेदप्रतिपादितस्य यागानुष्ठानात्मकस्य धर्मस्य प्रतिपादनमेवानतमश्चपरमलक्ष्यत्वेनोपस्थाप्यते । यथाहुभट्टवर्या : -

'धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम्[६]' । इति ॥ वैदिकवाक्यपतिपादितानां कर्मणां स्वर्गादिभिः फलैस्सह सम्बन्धो यदि न स्यात्तर्हि न जायेत कस्याप्यस्मिन्कर्मानुष्ठाने प्रवृत्तिः वेदार्थ भूतस्य कर्मणः विनाशान्तिस्फलत्वात्कर्मणामनु-ष्ठानानुपपत्या कर्मजन्यत्वेन फलजनकत्वेन च अपूर्वात्मकं तत्त्वमङ्गीकृत्य[७] अस्याश्रयत्वेनात्मानमङ्गीकुर्वतामेतेषां[८] जायते दार्शनिकक्कक्षायां प्रवेशः ।

भाट्ट प्राभाकरमिश्रमतविभूषितायां मीमांसायां मिश्रवर्याणात्म विषयकं चैतन्यविषयकं वा मतं नोपलभ्यते । प्राभाकराणां सिद्धान्ते आत्मस्वरूपं तार्किकमतानुरुपमेव परिलक्ष्यते। एभिरप्यात्मनो विभुत्वं, शरीरेन्द्रियमनोभ्यः पार्थक्यं नित्यत्वं विशेषगुणानाम्बुद्धया-दीनामाश्रयत्वं कर्तृत्वं भोक्तृत्वञ्च न्यायमतानुरूपमेव निरूपितंवर्तते। एभिरप्यात्मनस्सुखा-दिस्वरुपत्वं निरस्य एतेषामाश्रयत्वमेव स्वीक्रियते[९] । अनया दृष्ट्या तार्किकमतेन सहैतेषामात्मस्वरुपविषयकाणां विचाराणां सादृश्यवशाच्चैतन्य विषयेऽपि एतेषां दृष्ट्या न्यायमतावलम्बिन्या एव भाव्यम् । न्यायमते आत्मनो ज्ञानाभिन्नगुणत्वेन चैतन्यं यथाभिमतं तथात्रापि इदमेव स्वरुपं चैतन्यस्यभिमतं विभाति ।

## भाट्टमीमांसकानां चैतन्यावधारणा

भाट्टानां चैतन्यविषयिणी दृष्टिरूभयवाद समन्वयात्मिकेति परिलक्ष्यते । एतेषां विवेचनेषु यथात्मनः चैतन्यं परिलक्ष्यते तथैवाचेतनत्वस्याप्यात्मनः

प्रतिपादनादु-भयोश्चैतन्याचैतन्ययोरत्र प्रकाश्यते समत्न्वयात्मिका दृष्टिः ।

चैतन्यस्यात्म-रूपत्वम्:-

"सुखदःखाद्यवस्थाश्च गच्छन्नपि नरो मम ।
चैतन्यद्रव्यसत्तादिरूपं नैव विमुञ्चति" ।।[१०] इत्यनया

वार्तिकोक्त्या स्पष्टं प्रतीयते यदत्र द्रव्यसत्ताभ्यां सह चैतन्यमप्यात्मनः स्वरुपेणैवाभिमतं भट्टवर्याणाम् । एवमेव तंत्र वार्तिकस्य द्वितीयाध्यायस्य प्रथमे पादेऽपूर्वाधि करणे "अहं प्रत्ययेन हि चैतन्यस्वभावस्यात्मनोऽस्तित्वमात्रमवगम्यत"[११] ।। इत्यत्र "तदपेक्षयैव च चैतन्यात्मकत्वाद्यविभागाच्चोपनिषत्स्वैकात्मव्यवहार[१२] ।" इत्यत्रापि ।

च चैतन्यमात्मनः स्वरुपेणैव प्रतिपादितं वर्तते ।

भट्टदृष्टया तत्त्वानां प्रतिपादनधुरं वहद्भिः पार्थसारथिमिश्रैरपि भूतेन्द्रियविज्ञानानामसंज्ञित्वमचैतन्यम्, अन्यस्तुतेभ्यो नित्यश्चेतन[१३] इत्यत्र न्यायरत्नाकरे तस्मादन्यश्चेतन[१४] इत्यनेन वचनांशेन शास्त्रदीपिकायामपि चैतन्यमात्मनः स्वरूपेणैव प्रतिपादितमित्येव जायते प्रतिपत्तिः ।

### चैतन्यस्यात्मनः स्वरूपत्वं विरूपत्वञ्च

उक्तैस्सन्दर्भैर्यद्यपि चैतन्यमात्मरूपेणाभिमतं वर्तते तथापि नैतच्चैतन्यं सांख्यशास्त्रे प्रतिपादितेन चैतन्येनाभिन्नमपितु विलक्षणमेवेति परिलक्ष्यते । सांख्ये प्रतिपादितस्य चैतन्यस्य बुद्धिपरिणामेन ज्ञानेन सह स्पष्टमेव पार्थक्यमुपलश्यते[१५] परन्तु यथा न्यायवैशेषिकसिद्धान्तयोर्गुणपदार्थेषु पृथक्तया गणनाया

अभावाच्चैतन्यस्य ज्ञानात्मकत्वं मन्यते विद्वद्भिस्तथैव भाट्टतन्त्रेऽपि चैतन्येन सह कर्तृत्व भोक्तृत्वयोरप्युपादानात्सांख्यवदात्मनश्चैतन्यमात्रस्वरूपस्यानङ्गीकाराच्च प्रतिभाति यदत्रात्मनश्चैतन्यं सांख्यविलक्षणं ज्ञानात्मकमेवाभिमतमिति ।

चैतन्यस्य ज्ञानात्मकत्वाङ्गीकार एवोपपद्येते नारायणपण्डितकमलाकर-भट्टयोरात्मविषयकौ सन्दर्भो। मानमेयोदयसंज्ञकस्य ग्रन्थस्य मेयभागस्य रचयितारो नारायणपण्डिता 'आत्मा चैतन्याश्रय'[१६] इत्यत्र चैतन्यमात्माश्रितत्वेन गुणात्मकत्वेनाविष्कुर्वन्ति। "स च देहेन्द्रियज्ञानसुखेभ्यो व्यतिरिच्यते"[१७] इत्यत्र च ज्ञानाद्भिन्नमात्मस्वरुपं प्रतिपादयन्ति । चैतन्यस्य ज्ञानात्मकत्वाङ्गीकार एवात्मगुणत्वेन आत्मना सहास्योपपद्यत आंशिको भेदः। गुणगुणिनोश्च तादात्म्याङ्गीकारात् तादात्म्यस्य च भेदाऽभेदरूपादभेदवद्भेद प्रतिपादकत्वमप्युपपद्यते ।

एवमेव मीमांसाकुतूहले आत्मनिरूपणप्रसङ्गे 'तद्गुणाः संख्या परिमाणसंयोगबुद्धि सुखदुःखेच्छाप्रयत्नधर्माधर्मसंस्काराः।' तेच नित्या लाघवात् समवायवत् । 'स च' नित्यज्ञानसुखवान् 'सत्यं ज्ञानमनन्तं ब्रह्म' नित्यं विज्ञानमानन्दंब्रह्म । 'अत्रायं पुरूषः स्वयं ज्योतिः'। इत्यादिश्रुतेः । इत्यत्र अग्रे च "विज्ञानमानन्दम्" इति मत्वर्थेऽच् प्रत्ययः। तेन ज्ञानवान् न ज्ञानसुखात्मकः ज्ञानवानहमिति भेदप्रतीतेश्च[१८] इत्यत्र चात्मनो नित्यसुखवन्नित्यज्ञानवत्त्वमपि भट्टपादैः प्रकाशितं वर्तते ।

यद्यप्यत्र चैतन्यस्य स्पष्टोल्लेखो नास्ति तथापि नारायणपण्डितविर-चितमानमेयोदयस्य मेय भागे पूर्वोक्ते प्रथमे सन्दर्भे आत्मनश्चैतन्याश्रयत्वमपरे

सन्दर्भे ज्ञानभेदवत्वञ्च निरुपितं वर्तते । आत्मगुणेषु चैतन्यस्य पृथक्तया ऽनुल्लेखा-च्चैतन्यानुपपत्या एवोपपद्यते चैतन्यस्य ज्ञानात्मकत्वम् । एवञ्चास्य ज्ञान-वत्वसन्दर्भस्य नारायणोक्तेन चैतन्याश्रयत्वप्रतिपादकेन सन्दर्भेण सहैकवाक्यता विधानादत्रापि विवेचितस्य ज्ञानाश्रयत्वस्योपपद्यते चैतन्याश्रयत्वम् ।

चैतन्यस्य ज्ञानात्मकत्वाङ्गीकारेऽपि वेदान्तस्याद्वैतप्रस्थानवदत्र भाट्टप्रघट्टे ज्ञानात्मकस्य चैतन्यस्यात्मरूपत्वमभिमतं नास्ति । एभिरत्र ज्ञानात्मकस्य चैतन्यस्याश्रयत्वमेवात्मनः प्रतिपाद्यते । अस्यां स्थितावात्मनश्चैतन्य स्वरूपबोधकानां सन्दर्भाणां जायतेरसङ्गतिरित्युत्पद्यते प्रश्नः ? अस्य प्रश्नस्य समाधानार्थमेव भाट्टमीमांसकैरात्मनो ज्ञानाश्रयत्वं विहाय ज्ञानात्मकश्चैतन्यानुकूलायाः ज्ञानशक्तेराश्रयत्वमङ्गीकृत्य ज्ञानशक्तिस्वभावत्व-मात्मनः प्रतिपाद्य निष्पाद्यते सङ्गतिरेतेषां सन्दर्भाणाम् । "ज्ञानशक्तिस्वभावोऽतो नित्यः सर्वगतः पुमान्[१९] इत्यनेन ब्वार्तिकांशेन भट्टवर्यैर्यथा प्रसाधितमात्मनो ज्ञानशक्ति स्वभावत्वं तथैव -

अविनाशी स्वरूपेण पुरुषो यातु नाशिता ।
मात्राणां साऽधिकाराणां भूतादीनामसंज्ञिता ॥[२०] इत्यस्य वार्तिकस्य व्याख्याप्रसङ्गे विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यतीमं मन्त्रं विवृण्वद्भि: पार्थसारथिमिश्रवर्यैरपि न्यायरत्नाकरे एतदुक्तं भवति - 'विज्ञानघन' इति ज्ञानशक्तिस्वभावस्यात्मनोऽभिधानम् । न ज्ञानेमात्रस्य[२१], इत्यनेनांशेनात्र शास्त्रदीपिकायामपि नहि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यत इति वाक्यं ज्ञानशक्त्य[२२] भिप्रायमित्यङ्गीकुर्व- द्भिरात्मनो ज्ञानशक्तिस्वभावात्मकाभिन्नं

ज्ञानशक्तिवैशिष्ट्यं प्रकाशितम् ।

उक्तदिशा चैतन्यात्मकस्य ज्ञानस्य ज्ञानशक्तिरूपस्य आत्मना सह सम्बन्धविधानाच्छक्तेश्चात्मनि भेदाऽभेदेन तादात्म्येनैव सम्बन्धेन विद्यमानत्वाच्चैतन्यात्मकस्य ज्ञानस्य आत्मना सह भिन्नाऽभिन्ना प्रतीतिरूपपद्यते।

निष्कर्षरूपेण एतदेव वक्तं शक्यते यदत्र भाट्टप्रघट्टे आत्मनः स्वरूपेण चैतन्यमभिमतं नास्ति । नित्यज्ञानशक्तिमत्वेन रूपेणैवात्मनश्चैतन्यमत्र प्रसाधितं विद्यते । अस्मादेव कारणादनुकूलासु स्थितिषु शरीरेन्द्रियविषयेषु सत्स्वात्मन्युत्पन्नं ज्ञानात्मकं चैतन्यमात्मनः स्वभावत्वेन शक्यतेऽङ्गीकर्तुम् । प्रतिकूलावस्थायां यत्र शरीरेन्द्रियविषयाणां नास्ति सद्भावस्तस्यामवस्थायां यथा सुषुप्तौ मुक्तौ वा नाङ्गीक्रियते ज्ञानात्मकस्य चैतन्यस्यास्तित्त्वम् । "भूतादीनामसंज्ञिता" इत्यनेन वार्तिकांशेन भाट्टप्रघट्टस्थापकैः कुमारिलैर्निराकृतं सुषुप्तौ मुक्तात्मनि वा ज्ञानात्मकं चैतन्यम् ।

एवञ्च चैतन्यात्मरूपेण सह ज्ञानात्मकेन तद्भिन्नेन रूपेणाऽपि प्रतिपादनादत्र चैतन्यस्वरुपविषये भाट्टमीमांसकैरङ्गीकृतो विभाति विलक्षणः समन्वयवादः । मन्ये, अस्मादेव कारणाज्जडबोधात्मकमात्मनस्स्वरूपमङ्गीकृतं भाट्टैरिति प्रतिपाद्यते हिरयन्नाराधाकृष्णनूबलदेवोपाध्यायादिभिरित्यलम् ।

**सन्दर्भनिर्देशः**

१. भारतीय दर्शन की रूपरेखा पृ.सं. १५८ डॉ. एम. हिरयन्ना, राजकमल - प्रकाशन, दिल्ली १९८७.

२. तत्र जरामरणकृतं दुःख प्राप्नोति चेतनः पुरूषः ।

सांख्यकारिका, संख्या - ५५

३. न्यायकोशः पृ.सं. २९६ पक्तिः ०८

४. भारतीय-दर्शन - की रूपरेखा पृ. ४०२ - ४०३, एम. हिरयन्ना, राजकमलप्रकाशन, दिल्ली १९८७.

५. अतो ज्ञानादिभिन्नो नित्य आत्मेति सिद्धम् । न्यायसिद्धान्त-मुक्तावली पृ. १६९ किरणावलीव्याख्या, चौखम्बा संस्कृतसंस्थानम् वाराणसी १९८३.

६. श्लोकवार्तिकम्, पृ ०५, तारापब्लिकेशन्स, वाराणसी, १९७८,

७. फलाय विहितं कर्म क्षणिकं चिरभाविने ।
तात्सिद्धिर्नान्यथेत्येवमपूर्वं प्रति गम्यते ॥
तन्त्रवार्तिकम्, द्वितीयो भागः, पृ.सं. ३६, गङ्गानाथझा केन्द्रीय-संस्कृत-विद्यापीठम्, प्रयागः, १९९०.

८. आत्मा ज्ञातव्य इत्येतन्मोक्षार्थं न च चोदितम् ।
कर्मप्रवृत्तिहेतुत्वमात्मज्ञानस्य लक्ष्यते ॥
श्लोकवार्तिकम् पृ. सं. ४७४.

९. बुद्धीन्द्रियशरीरेभ्यो भिन्न आत्मा विभुर्ध्रुवः ।
प्रकरणपञ्चिका पृ. ३१६, काशीहिन्दूविश्वविद्यालयः वाराणसी, १९६१.

१०. श्लोकवार्तिकम्, आत्मवादः, कारिकासंख्या २६,

११+१२. अजितोपेतं तन्त्रवार्तिकम् पृष्ठ संख्या ५३ एवं पृष्ठसंख्या-५८, द्वितीयो भागः, गङ्गानाथ-झा केन्द्रीयसंस्कृतविद्यापीठम्, प्रयागः, १९९०.

१३. श्लोकवार्तिकस्य न्यायरत्नाकरव्याख्या, श्लोकवार्तिकम्, पृष्ठसंख्या ५१४, पङ्क्तिः २७. तारापब्लिकेशन्स, वाराणसी, १९७८.

१४. शास्त्रदीपिका, पृष्ठसंख्या १२. पंक्तिः ०४, कृष्णदास - अकादमी वाराणसी, १९७८.

१५. अध्यवसायो बद्धिधर्मो ज्ञानं विराग ऐश्वर्यम् ।
सांख्यकारिका, - संख्या २३,

१६. "आत्मा चैतन्याश्रयः" मानमेयोदयः, पृष्ठसंख्या १८३.

१७. सच देहेन्द्रिय - मानमेयोदयः पृष्ठसंख्या १८७.
चौखम्बा - विद्याभवनम्, वाराणसी, १९९६.

१८. तद्गुणाः संख्यापरिमाण - मीमांसाकुतूहलम् पृ. ६७.
सम्पूर्णानन्दसंस्कृत विश्वविद्यालयः, १९८७.

१९. श्लोकवार्तिकम्, आत्मवादः श्लोकसंख्या - ७३.

२०. श्लोकवार्तिकम्, आत्मवादः श्लोकसंख्या १४७.

२१. न्यायरत्नाकरव्याख्या - श्लोकवार्तिकम् पृष्ठसंख्या ५१४, पङ्क्तिः १९.
तारापब्लिकेशन्स, वाराणसी, १९७८.

२२. शास्त्रदीपिका, पृष्ठसंख्या १२७, कृष्णदास अकादमी, वाराणसी,
१९८८.

|| श्रीः ||

# श्री शंकरवेदान्ते चैतन्यम्

डॉ (श्रीमती) राधा कृष्णमूर्तिः

योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्ताम्
संजीवयत्यखिलशक्तिधरः स्वधाम्ना ।
अन्यांश्च हस्तचरणश्रवणत्वगादीन्
प्राणान्नमो भगवते पुरुषाय तुभ्यम् ॥
दिक्कालाद्यनवाच्छिन्नानन्तचिन्मात्रमूर्तये
स्वानुभूत्यैकमानाय नमः शान्ताय तेजसे ॥

**विषयप्रवेशनम् : -**

इदंजगत् नानाविध जडचेतनस्थावरजंगमवस्तुभिः आपूरितम् । सर्वेषां वस्तूनां कर्मप्रवृत्तिः अस्त्येव। मनुष्यादिप्राणीनां तु विविधप्रकारक कर्मप्रवृत्तयः स्पष्टं दृश्यन्ते। अस्मिन् विषये कोऽपि संदेहो नास्ति ।प्राणिवर्गः श्रोत्रा श्टणोति, चक्षुषा पश्यति, वाचा वदति, त्वचा स्पर्शति, मनसा च मनुते । प्राणिवर्गेषु विद्यमाना चेतनशक्तिरेव तान् विविधकर्मसु शारीरिक, मानासिक वाचिकादिषु कर्मसु प्रेरयति इति लौकिकेषु प्रसिद्धम् । एतत् समीचीनमपि। किन्तु जडस्थावरपदार्थानामपि कार्यप्रवृत्तिः दृश्यते यथा वृक्षलतादयः यत्स्थलेउद्भवन्ति

यधपि ते तत्रैव तिष्ठन्ति दिने दिने तु वर्धन्ते, तेषां शाखाः मूलानि च चतुर्दिशासु व्याप्नुवन्ति, ऋतुक्रमेण पल्लविताः पुष्पिता भूत्वा फलन्ति च । एवमेव निर्जोवाः आपः प्रवहन्ति, अग्निर्दहति, वायुर्वहति ।

मनुष्यमृगादयः चिदान्विता, पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि मनःबुद्धिः इत्यादिकरणैः युक्ताः तैः सदा शारीरिकमानसिकव्यवहारं कुर्वन्त्येव । किन्तु स्वयं चैतन्यरहिता अपि जडपदार्थानामपि कर्मप्रवृत्तिः कस्मात् उत्पद्यते, किम् तच्चेतनवस्तु यत् अचेतनपदार्थानपि चेतयति, प्रेरयति ? अन्तरिक्षे चन्द्रनक्षत्रादिग्रहाः स्वग्रहपथेषु नियमबद्धाः संचरन्ति, को नु खलु तेषां नियामकः? ईदृशप्रश्नानां समाधानान्वेषणप्रयत्नः दीर्धकालादेव वैज्ञानिकैः, मनोवैज्ञानिकैः, मनीषिभिः सततं कृतम् । समाधानं तु अद्यापि नाधिगतम् । एते गूढप्रश्नाः एव । चेतनप्राणिष्वपि चैतन्यशक्तिः तेषाम् हृदये वर्तते वा या मस्तके, वा मस्तिष्के, करणेषु वा नाडिषु ? वैज्ञानिक रीत्या उत्तरं दातुम् कोऽपि न समर्थः। अधुनातनकाले तु विज्ञानक्षेत्रे दिने दिने उत्तरोत्तराभिवृद्धिः दृश्यते । चन्द्रग्रहे पदार्पणं कृतम् मानवेन । अन्तरिक्ष उपग्रहान् स्थापयित्वा विश्वस्य सूक्ष्मवस्तूनामपि ज्ञानं सर्वसुलभं कृतम् । परन्तु किं नु खलु तत् शुद्ध - चैतन्यवस्तु यस्मात् विश्वस्मिन् सर्वेषां कार्यप्रवृत्तिः संभवति इत्ययं प्रश्नः प्रश्नरुपेणैव अद्यापि वैज्ञानिकयुगे तिष्ठति। अपितु अस्त्यस्य प्रतिवचनं वेदोपनिषत्सु आचार्याणां भाष्येषु, इतरधार्मिक ग्रन्थेषु ।

**चैतन्यनिरूपणम् :**

मनआदीनां इन्द्रियाणां प्रवृत्तिं दृष्ट्वा सामान्यचेतनस्याधिगमः जनानां भवति। अपितु तत्सामान्यचेतनस्यापि कोऽपि अधिष्ठाता वर्तते इतीदं ज्ञानं तेषां न भवति।

प्रत्यक्षप्रमाणाभावात् अज्ञानाच्च सामान्यजनाः सर्वेषां प्रेरक अधिष्ठाता एको वर्तते इत्यास्मिन् विषये विश्वासं न कुर्वन्ति । मनआदीनां अचेतनपदार्थानामपि प्रवृत्तिषु तेषां प्रेरकस्यापि अस्तित्वं आवश्यकमेव । प्रेरकशक्तिं विना प्रवृत्तिःन सम्भवति । रथादीनां अचेतनपदार्थानामपि प्रवृत्तिः चेतनप्राणिभिः अधिष्ठिता दृश्यते । तथैव चेतनावतः अधिष्ठातुः अस्तित्वे एव मनआदि अचेतनानामपि प्रवृत्तिः संभवति । अतः प्राणीनां कर्मप्रवृत्तेः महत्वं मनसीकृत्य चेतनसंपन्नस्य अधिष्ठातुः अस्तित्वं निरुपयितुम् अद्वैतमतप्रवर्तकः जगद्गुरु श्रीशंकराचार्यः एवं उक्तवन्तः - "प्रवृत्तिलिंगाद्विशेषार्थः प्रश्नः उपपन्नः"। वाक्येनानेन सूचितं पदार्थानां प्रवृत्ति एव चिन्मयाद्यिष्टातुः अस्तित्वस्य अनुमापकं लिङ्गं भवति । केनोपनिषदः प्रथममंत्रस्य भाष्ये आचार्येण विचारोऽयं स्पष्टीकृतः। जीवजन्तूनां सर्वाणिइन्द्रियाणि नियमपूर्वकं स्वकार्यं कुर्वन्ति । श्रोतृ श्रृणोति, चक्षुः पश्यति, वाक् वदति, त्वक्स्पृशति, घ्राणं जिघ्रति, मनःमनुते । कर्मेन्द्रियाण्यपि स्वकार्यं कुर्वंन्त्येव । कोऽपि तेषां कस्यचित् प्रेरकस्यास्तित्वं अपि अनुभूय केनोपनिषदः प्रारंभे प्रश्नं करोति : -

केनेषितं पतति प्रेषितं मनः । केन प्राणः प्रथमं प्रैति युक्तः । केनेषितां वाचमिमां वदन्ति । चक्षुः श्रोत्रं क उ देवो युनक्ति ।

शिष्यः पृच्छाति, मन आदि करणजातस्य को देवः, तेषां स्वविषयं प्रति को प्रेरयिता, कथं वा स प्रेरयति इति ।

अस्मिन् संदर्भे भाष्यकृत् शंकराचार्यः आत्मज्योतिः एव सर्वाणि कर्माणि प्रेरयति, अपितु इन्द्रियादीनां प्रवत्तौ तन्निमित्तमात्रं इति स्वमतं समर्थयितुम् प्रथमं तावत् इषितप्रेषित शब्दयोः अर्थो स्पष्टीकुर्वन्ति । शब्दयोः मुख्यार्थौ अत्र न

संभवतः । आत्मा तु मनआदीनि करणानि स्वविषयेभ्यः शिष्यानिव न प्रेरयति। आत्मा तु विविक्तः नित्यचित् - स्वरुपः, अतः नित्यचिकित्सायाः अद्यिष्टातृवत् करणानां प्रवृत्तौ निमित्तमात्रम् । राजानः यदा भोजनं कुर्वन्ति तदा भोजने विषमिश्रणस्य संदेहोऽपि वर्तते । तत्परीक्षणार्थं भोजनसमये चकोरपक्षिणं समक्षं स्थापयन्ति । भोजने विषमिश्रणं स्यात् चकोरपक्षिणः चक्षुषोः वर्णपरिवर्तनं भवति। अतः पक्षिणः सान्निध्यमात्रेण निर्भयेन भोजने राज्ञां प्रवृत्तिः संभवति । पक्षी तु स्वयं किञ्चिदपि न करोति, अपितु स्वसान्निध्यमात्रेण राज्ञः भोजने प्रवर्तयति। तथैव नित्यचित्स्वरुपः सर्वेषां करणानां प्रवृत्तौ निमित्तमात्रो भूत्वा तेषां अधिष्ठाता भवति ।मनः स्वतन्त्रं प्रवृत्तिनिवृत्तिविषये स्वयं पतति इति लौकिकेषु प्रसिद्धम् । मनसः प्रवृत्तौ नित्यचित्स्वरुपस्य कीदृशी भूमिका स्यात् इत्ययं प्रश्नोऽपि उत्पद्यते। एतत्संदेहनिवारणार्थं मनप्रभृतीनां पारतन्त्र्यं युक्तिपूर्वकं दर्शयित्वा मनसः प्रेरकोऽपि चिन्मयात्मा इति सूचितम् । मन आदिषु चलनक्रिया प्राणस्यैव, प्राणनिमित्तत्वादेव । अतः सर्वेन्द्रियप्रवृत्तयः प्राणपूर्वका इत्यपि आचार्यैः प्रकटितम् । प्राणसहितसर्वेन्द्रियाणां को प्रयोक्ता इत्यादीन् संशयान् दूरीकर्तुं केनोपनिषद द्वितीयमंत्रस्य भाष्ये आत्मनः सर्वनियन्तृत्वं तर्करीत्या निरुपितम् आचार्यैः । श्रोत्रादेः श्रोत्रादिलक्षणं ब्रह्मात्मा इति विदित्वा श्रोत्रात्मभावं परित्यज्य धीमन्तः अस्मात् लोकात् प्रेत्य अमृतत्वं आप्नुवन्ति इति निर्दिश्य परमाचार्येषा इदमपि स्पष्टीकृतम् यत् इदम् प्रतिवचनं निर्विशेषस्य आत्मनः निमित्तत्वबोधनायैव उक्तम् । विक्रियादि विशेष रहितस्य आत्मनः एव मन आदीनां प्रवृत्तिषु निमित्तमस्ति ।

श्रोत्रादीनि इन्द्रियाणि स्वविषयव्यञ्जनसामर्थ्येन युक्ता एव । तत्सामर्थ्यमपि चैतन्ये आत्मज्योतिषि नित्ये असंहते सर्वान्तरे सति भवति न असति । अतः

असंहतम् सर्वान्तरं नित्यं आत्मज्योति चैतन्यमेव श्रोत्रादीनि सर्वाणि इन्द्रियाणि स्वंविषयेषु प्रवर्तयति, चैतन्यस्य सान्निध्ये एव इन्द्रियाणां स्वविषयव्यञ्जन सामर्थ्यमस्ति । नान्यथा इति श्रोत्रस्य श्रोत्रम् इत्यादिश्रुतिवाक्यैः प्रमाणीकृतम् शंकरभगवत्पादैः ॥ अन्तःकरणम् तु मनःबुदिश्च । चैतन्यज्योतिषः प्रकाशं विना स्वविषयसंकल्प अध्यवसायादिषु तत् समर्थं न भवति । अतः आत्मचैतन्येनाधिष्टितस्य कारणादेव सर्वकरणानि स्वविषयग्रहणसामर्थ्येन संपन्नानि । श्रोत्रादिकरणकलापस्य प्रवृत्तिः विषयावभासमात्रम् । विषयो-पलब्धृरुपतया इन्द्रियाणां अवभासकत्वम् न विद्यते तेषां अचित्रुपत्वात् चिद्रुपस्य आत्मनः निमित्तत्वात् च । श्रोत्राद्युपलब्धिनिमित्तभूतं नित्योपलाब्धिस्वरुपं निर्विशेषमात्मतत्त्वं नित्यचेतनवस्तु सर्वेषां प्रेरकम् । तदेव शुद्धचैतन्यं यस्य ज्ञानेन अमृतत्वं प्राप्यते । श्रोत्रादि इन्द्रियाणामपि इन्द्रियं इत्यादिवाक्यैः निर्दिष्टः सर्वविशेषरहितः सर्वात्मा चिन्मयज्योतिः इति स्वमतप्रतिपादनान्तरं तस्यैव चिन्मात्रज्योतिषः ब्रह्मत्वमपि श्रुतिप्रमाणैः दर्शयित्वा आचार्योपदेशपरंपरया एव तदधिगन्तव्यम् न तर्कतः प्रवचनमेधाबहुश्रुततपोय-ज्ञादिभ्यश्च इत्यपि श्री शंकराचार्यैः उक्तम् ।

मनस्तु सर्वविषयव्यापकत्वात् सर्वकरणसाधारणम् । कामादिवृत्तिमत् मनः इति उच्यते । कामः, संकल्पो विचिकित्सा श्रद्धाश्रद्धाधृतिरधृतिः ह्रीः धीः इत्येतत् सर्वं मन एव । मनसा चैतन्यज्योतिः न मनुते, चैतन्यस्य नियन्तृत्वात्, अवभासकत्वात् च । अन्तस्थेन चैतन्यज्योतिषा एव अवभासितस्य मनस एव मननसामर्थ्यम् । सर्वविषयं प्रति प्रत्यगेवेति स्वात्मनि न प्रवर्तते अन्तःकरणम् । मनश्च अन्यस्य संकल्पयितृ, अध्यवसायितृ च, नात्मानं संकल्पयति अध्यवस्यति

च । अतः सवृत्तिकं मनः ब्रह्मणा विषयीकृतं अथवा व्याप्तं इति निश्चितम् । तस्मात् येन ब्रह्मणा मनः व्याप्त तदेव आत्मा प्रत्यक्चेतयितृ चैतन्यज्योतिः ब्रह्म इति श्री शंकराचार्यैः स्वमंत दृढीकृतम् ।

**चैतन्यं ब्रह्मलक्षणम् :**

एतस्य उपनिषदःऋषिः ब्रह्मणः लक्षणं प्रकाशयति "प्रज्ञानं ब्रह्म" इति । अयं ऋग्वेदान्तर्गत महावाक्यः । प्रज्ञानं तु चैतन्यमेव । तृतीयाध्यायस्य अयं मन्त्रः -

"कोऽयमात्मेति वयमुपास्महे । कतरः स आत्मा येन वा पश्यति येन वा श्रृणोति येनवा गन्धानाजिघ्रति येन वा वाचं व्याकरोति येन वा स्वादु चास्वादु च विजानाति" यस्योपासनं कृत्वा आचार्यः वामदेवः अमृतः समभवत् इत्येतत् विषयमधिकृत्य ब्रह्मजिज्ञासवः विचारवन्तः अन्योन्यं पृच्छन्ति कोऽयमात्मेति। अस्य पिण्डस्यात्मभूते द्वे ब्रह्मणी इतरेतर प्रातिकूल्येन प्रतिपन्ने । तयोः अन्यतर आत्मा एव उपास्यो भवितुमर्हति । कोनुखलु स आत्मा इति निर्धारिणं आवश्यकमिति मत्वा शंकराचार्यैः तत्संबधीव्याख्यात्मक विवरणं दत्तम् 'प्रज्ञानंब्रह्म' एतत् महावाक्यमपि समर्थितम् । अस्मिन् पिण्डे द्वे वस्तुनि उपलभ्येते। एकं तु अनेकभेदभिन्नं अन्तःकरणं येन उपलभते । अपरं तु तत् यत् उपलभते यत् उपलब्धृ भवति । करणान्तरैः उपलब्धविषयाणां स्मृत्यादिभिः प्रतिसन्धानं करोति अन्तःकरणम् । तत्र तावत् येन उपलभते स आत्मा भवितुं नार्हति । अपरः एव अर्थात् उपलब्धा एव आत्मा भवति ।

अन्तःकरणेन चान्तर्भूतेन मनुष्यःरूपं पश्यति, श्रोत्रभूतेन श्रृणोति, घ्राणभूतेन पश्याति। अतः तदेकं करणं अनेकधाभिन्नं इति स्पष्टम् । कथं तत् संभवति

इत्येतत्प्रश्ने उपस्थिते श्रीशंकराचार्यैः स्वमतं प्रकटितम् । पुरा इदमुक्तं प्रजानां रेतो हृदयः, हृदयस्य रेतो मनः, मनसा सृष्टा आपः वरुणश्च । हृदयात् मनः, मनसः चन्द्रमाः । तदेव एतत् हृदयं मनश्चः । अतः एकमेव अनेकधा यद्भिन्नं भवति तदन्तःकरणम् । एकेन अन्तःकरणेन चक्षुर्भूतेन मनुष्यः रूपं पश्यति, श्रोत्रभूते श्रृणोति, घ्राणभूतेन जिघ्रति, वाग्भूतेन वदति, जिह्वाभूतेन रसयति, स्वेनैव संकल्पविकल्परुपेण मनसा विकल्पयति, हृदयरूपेण अध्यवस्यति । तस्मात् उपलब्धुः समस्तोपलब्ध्यर्थं सर्वकरणविषयव्यापारकं एकं अन्तःकरणमेव । श्रुतिवाक्यैरपि एतत् समर्थितम् । यथा कौषीतकी उपनिषदि "प्रज्ञया वाचं समारुह्य वाचा सर्वाणि नामान्याप्नोति प्रज्ञाचक्षु; समारुह्य चक्षुषा सर्वाणिरूपान्याप्नोति" ॥ बृहदारण्यके च उत्तम्।

"मनसा ह्येव पश्यति, मनसा श्रृणोति, हृदयेन हि रूपाणि जानाति" ।

अतः हृदयमनोवाच्यस्य अन्तःकरणस्य सर्वोपलाब्धिकरत्वम् सिद्धम् । तदात्मकः एवप्राणः । उक्तम् च योवै प्राणः साप्रज्ञा या वैप्रज्ञा स प्राणः । करणसंहतिरुपः प्राणः । प्राणः उपलब्धुः उपलब्धिकरणत्वेन गुणभूतत्वाच्च उपास्यात्मा भवितुम् नार्हति । यस्य उपलब्ध्यर्थं एतस्य हृदयमनोरुपस्य अन्तःकरणस्य वृत्तयः भवन्ति स उपलब्धा एव उपास्यात्मा । अन्तःकरणम् उपाधिमात्रम् । तस्मिन् स्थितं प्रज्ञारुपी एकंब्रह्म हि उपलब्धा । तस्य उपलब्ध्यर्थं बाह्यान्तर्वर्तीविषयैः सम्बन्धिताः अनेकाःवृत्तयः सन्ति । संज्ञानं तु संज्ञप्ति अर्थात् चेतनभावः । आज्ञानं आज्ञप्तिः ईश्वर भावः (प्रभुता) । विज्ञानं कलादीनां परिज्ञानम् । प्रज्ञानं प्रज्ञप्तिः अथवा प्रज्ञता । मेधा तु ग्रन्थधारण सामर्थ्यम् । दृष्टि इन्द्रियद्वारा सर्वविषयोपलब्धिः । धृतिस्तु धारणं अनया अवसन्नानां शरीरेन्द्रियाणां

उत्तम्भनं भवति । मतिः मननम्, मनीषा तु तत्र स्वातंत्र्यम् । चेतसो रुजादि दुःखित्व भावः जूतिः । स्मृतिः स्मरणम्, शुक्लकृष्णादिभावेन रुपादीनां संकल्पनम् । अध्यवसायः क्रतुः । असुः प्राणनादिजीवनक्रियानिमित्ता वृत्तिः कामोऽप्राप्तविषयाणां आकांक्षा । वशः स्त्री संसर्गादीनां अभिलाषा । इत्येवमाद्याः अन्तःकरणवृत्तयः प्रज्ञप्तिमात्रस्य उपलब्धुः उपलब्ध्यर्थत्वात् शुद्धब्रह्मण उपाधिभूतत्वाच्च उपाधिजनितगुणनामधेयानि भवन्ति । किन्तु एता प्रवृत्तयः साक्षात् ब्रह्म न भवन्ति । एतद्विवरणेन स्पष्टं भवति सर्वशरीरस्य; प्राणः प्रज्ञात्मा अपरंब्रह्म एव । प्राणः जलभेदगतसूर्यस्य बिम्बवत् अन्तःकरणोपाधिषु अनुप्रविष्टः उपास्यात्मा भवितुम् नार्हति । तस्मात् सर्वात्मा, सर्वविशेषरहितं चिन्मात्रज्योति हि ब्रह्म इति प्रतिपादितम् ।

इन्द्रात् प्रभृति अचलस्थावरपर्यन्तं अशेषतः सर्वं प्रज्ञानेत्रम् । ऐतरेयउपनिषदः वाक्यमिमं स्पष्टीकृत्य श्रीशंकराचार्यैः स्वमतं प्रकटितम् । प्रज्ञा तु प्रज्ञप्तिः, तत् ब्रह्मैव । प्रज्ञानेत्र पदस्य विग्रहं कृत्वा आचार्यःदर्शयति कथं सर्वं प्रज्ञाननेत्रमिति। नीयते अनेन इति नेत्रम् । यस्य प्रज्ञाननेत्रं तत् प्रज्ञानेत्रम् । प्रज्ञाने ब्रह्मणि उत्पत्तिस्थितिलयकालेषु प्रतिष्टितं प्रज्ञाश्रयमेव प्रज्ञानेत्रम् । सर्वजगतः प्रतिष्ठा प्रज्ञा । सर्वं प्रज्ञानेत्रम्, प्रज्ञाचक्षुः । तस्मात् प्रज्ञानं ब्रह्म । एतत् समस्तौपाधिकविशेष रहितं नित्यं, निरञ्जनं, निर्मलं शांतं एकमद्वयम् ब्रह्म तदेव शुद्धचैतन्यम् । तदेव सर्वेषां प्रेरकः कार्यप्रवर्तकः । तद्विना तृणमपि न चलति ।

**शुद्धबोधः बोधाभासश्चः**

भगवान् श्री शंकराचार्यः ब्रह्मविद्यां संक्षेपतः उपदेष्टुकामः सर्वप्रथमं शुद्धब्रह्म

उपाधिस्थ ब्रह्मणः कथं विशिष्यते ? तथो; को प्रभेदः इत्यादीन् विषयान् आधारपुर्वकम् प्रकाशितवन्तः। आत्मनः उपाधित्रयमस्ति । तेषु प्रथमः स्थूलोपाधिः मांसरक्तास्थिप्रधानः देहः । लिंगदेहः सूक्ष्मोपाधि इति उच्चते स तु वासनाप्रधानः । लिंगशरीरं तु सप्तदशकलात्मकं यथा धीः मनः, प्राणादयः पञ्चवृत्तयः, पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि च । अज्ञानं आत्मनः तृतीयोपाधिः । तदात्मनः कारणोपाधिः । उक्तानां त्रयाणामपि उपाधीनाम् विभासकं;, सत्तास्फूर्तिप्रदानात् प्रकाशकम् तत्रस्थितं शुद्धब्रह्मस्वरुपमेव । सः साक्षात् ईक्षते । अतः स एव साक्षी शुद्ध बोधः, विभासकः शुद्धचैतन्यः । एषैव शुद्यात्मनः स्वरुपः । उपाधिस्थ ब्रह्म तु जीवात्मा संसाराभिमानवाहकः बोधाभासः एव । स पुण्यपापकर्मणां कर्ता, स्वरुपबिंबितः चिदाभासः । किमर्थं उपाधिस्थं ब्रह्म बोधाभास इति कथ्यते इति पृष्टे बुद्धौ सत्वस्य प्रधानतया सा विशुद्धपारदर्शक वस्तु इति मन्यते । एतत्कारणात् बुद्धिः शुद्धचैतन्यस्य स्वयं विभात्यस्य प्रतिबिंबं गृहीत्वा चैतन्यस्य धर्ममपि उपलभंते । स एव चैतन्यप्रतिबिंबितः जीवः बोधाभासः। बोधाभासात् शुद्धबोधस्य यन्त्रपूर्वकं विवेचनं साधनामार्गे अत्यावश्यकमिति आचार्यैः उपदिष्टम्। प्रारब्धकर्मवशात् जीवात्मा इहामुत्र च सुखदुःखभोक्तृत्वादिरुपं संसारं अनवरतं अनुभवति। अतः बोधाभासः जीव तु शुद्धचैतन्यं भवितुं न शक्नोति। एतत्कारणात् शुद्धबोधकूटस्थं जीवात् अतिप्रयत्नेन विविच्यात्। अपि च परमानन्दघने परमार्थसत्ये साक्षिणि सति अविद्याकल्पितं उपाधिजातं साक्ष्यं नास्त्येव, तस्य मिथ्याभासकत्वात्। केवलो साक्षी एक एव विद्यते परमार्थसत्यः। विवेकदृष्ट्या एव शुद्धमात्मानं जानीयात् । स एव शुद्ध चैतन्यः, सर्वभासकः सर्वप्रेरकः प्रेषकश्च्च ।

**अवस्थात्रये चैतन्यम् :**

मनुष्यस्य जागरितस्वप्नसुषुप्ति इति तिस्रः अवस्थाः भवन्ति । एतासु अवस्थासु शुद्धचैतन्यस्य प्रवृत्तिः कीदृशी ? कथं वा स प्रेरयति ? जागृतस्वप्नावस्थयोः जीवात्मनः बोधाभासस्यैव तत्र व्यवहारः। सुषुप्तावस्थायां तु चिदाभासस्य लयं भवति । तदवस्थायां शुद्धबोधः कूटस्थः जाड्यमज्ञानं च प्रकाशचेत् । सुप्तौ भासकबुद्धि सहितं बोधाभासस्यापि लयं भवति । तदा शुद्धकूटस्थचैतन्यं निर्विकारतया तिष्ठति । सुप्तौ मनुजः किञ्चिदपि न जानाति अर्थात् तदवस्थायां शुद्धचैतन्यं अज्ञानमेव प्रकाशयति। जागृतावस्थायामपि यदा यदा बुद्धिः तूष्णीं तिष्ठति यदा तस्य तूष्णींभाव अस्ति तदा सा अविकारीचैतन्येन कूटस्थेन एव भास्यते । तस्मिन् समये अंतःकरणं वृत्तिरहितं भवति । वृत्तिरहितत्वात् शुद्धचैतन्येन तदनुभूयते। सवृत्तिकं अन्तःकरणं चैतन्यद्वयेन अर्थात् शुद्धचैतन्येन चिदाभासेन चापि अवभास्यते । निर्विकारसविकरचैतन्य द्वयेन सवृत्तिकं अन्तःकरणं भास्यते । निर्वृत्तिकं अन्तःकरणम् तु केवलेन निर्विकार चैतन्येनेकेनेव भास्यते। निर्विकार चैतन्यभास्याः धीव्यपाराश्च बुद्धिवृत्तयः चिदाभासेनापि संयुता भूत्वा धीस्थजीवेन सहिताः भास्यन्ते।

**बाह्यपदार्थोपलब्धिः**

बाह्यपदार्थोपलब्धिः कथं भवति इत्यस्य प्रश्नस्य उत्तरं श्रीशंकराचार्यैः श्लोकरूपेण एवं प्रदर्शितम्

वह्नितप्तजलं तापयुक्तं देहस्य तापकम् ।
चिद्भास्या धीः तदाभासयुक्तान्यं भासयति ॥

अन्तःकरणं चैतन्यद्वयेन भासितं भवति । यदा जलं वह्निना तप्तं भवति तदा

तत्तापयुक्तं जलं शरीरतापकञ्च भवति । तथैव यदा बुद्धिः चिदाभास्या अर्थातम् कूटस्थचैतन्येन प्रकाशिता भवति तदा चिदाभासेनापि प्रकाशिता भूत्वा घटादि अन्यं विषयं भासयति । कूटस्थचैतन्येन चिदाभास चैतन्येन च प्रकाशितया बुध्या घटादि विषयाणां ज्ञानं उत्पाद्यते । प्रथमं कूटस्थचैतन्येन प्रकाशिता बुद्धिः तदाभासयुक्तापि भवति । चिदाभासा प्रकाशिता भूत्वा स्वयं अन्यं प्रकाशयति ।

मनुष्यः रूपादिविषयैः सह तेषां गुणदोषानपि पश्यति । बुद्धिः विषयेषु गुणदोषानपि विकल्पयति । बुद्धिगाः क्रियाः मनोव्यापारा एव रुपादौ गुणदोषादीन् विकल्पयन्ति । रुपादिषु विषयेषु गुणदोषादिविकल्पाः भवन्त्येव । इदं समीचीनं इदमसमीचीनं इत्यादिकल्पनं मनोव्यापारैः एव कृतम् । न तु चैतन्यकृतम् । विषयेषु गुणदोषकल्पनं चैतन्यकृतमिति अयं विचारः भ्रमोद्भूतः एव । शुद्धचैतन्यं निर्विकारं । अतः गुणदोषकल्पने विषयैः सह गुणदोषानपि केवलं भासयति । शुद्धचैतन्यं स्वयमप्रकाशरुपं असत्जड़परिच्छिन्नरूपैः अन्तःकरणादिधर्मैः अस्य सविकारिता न संभवति । अन्तःकरणादीनां धर्माः तु असत् केवलाचितिः स्वयं प्रकाशा उपाधिरहिता च । रूपादिविषयाभ्यां तत्रस्थाभ्यां गुणदोषाभ्यां च केवला चितिः विविक्ता भवति । रुपरसादि विषयाणां विकल्पने अथवा पृथक्त्वग्रहणे अंतकरणादि उपाधिवशात् अनुवर्तते (भासकरुपेण) । अतः गुणदोषादि कल्पनं न स्वतः शुद्धचैतन्यस्य तस्य विकाराभावात्, अन्तःकरणादीनां उपाधिवशात् च । श्रुतयः आत्मनःस्वयंप्रकाशत्वं बोधयन्ति खलु : - अत्रायं पुरुषः स्वयंज्योतिर्भवति इत्यादि ।

**बुद्धिवृत्तिषु चैतन्यम्**

जडपरिणामिदृश्येभ्यः बुद्धिवृत्तिभ्यः चिदानन्दधनं अपरिच्छिन्नं साक्षीस्वरूपं

भिन्नमेव दृश्यते । बुद्धिवृत्तयः क्षणेक्षणे परिणामिनो दृश्यन्ते, चितिः (शुद्धचैतन्यं) तु न तथा । कुतः इति पृष्टे आत्मचैतन्यस्य परिणामाभावात् । मुक्ताफलेषु यथा सूत्रं अनुस्यूतं तथैव बुद्धिवृत्तिषु चैतन्यं अनवरतं अनुस्यूतमेव स्थितम् ।

"क्षणे क्षणेऽन्यथाभूता धीविकल्पाश्चितिर्नतु ।
मुक्तासु सूत्रवत् बुद्धि विकल्पेषु चितिः स्थिता" ।

अपि च, मुक्ताभिरावृतं सूत्रं द्वयोः मुक्ताफलयोः मध्येदृश्यते, स्पष्टं प्रकाशते। तथैव विकल्पैः बुद्धिवृत्तिभिः आवृतं कूटस्थ चैतन्यं बुद्धिवृत्योः मध्ये स्पष्टा प्रकाशते। अर्थात् अत्र शुद्धचैतन्यात्मकं कूटस्थस्वरूपं स्पष्टं अनुभूयते। उक्तं च विद्यारण्यश्रीपादैः पञ्चदशी प्रकरण्याम् : -

संधयोऽखिलवृत्तीनामभावाश्चावभासिताः ।
निर्विकारेण येनासौ कूटस्थ इति चोच्यते ॥

अतः बुद्धिवृत्तीनां संधिषु, तेषां अभावे च कूटस्थशुद्धचैतन्यानुभवः भवति। बुद्धिवत्तिरुपे पूर्वविकल्पे नष्टे सति यावत् बुद्धिवृत्तिरुपस्य अन्यस्य विकल्पः न भवति तावत् शुद्धात्मस्वरूपं निर्विकल्पकचैतन्यं विभासते । अत्र निर्विकल्पचैतन्यं शुद्धात्मस्वरूपं तु 'तत्त्वमसि' महावाक्यस्य शुद्धत्वं पदलक्ष्यं तदेव विभासते इति श्रीशंकराचार्यैः सूचितम् । अर्थात् निर्वृत्तिकं अन्तःकरणं शुद्धचैतन्यरूपेण अनुभूयते । पूर्वमपि निदिष्ट जागरेऽपि धियः तूष्णीभावः शुद्धचैतन्येन भास्यते इति । उक्तं च आचार्यैः : -

"नष्टे पूर्वविकल्पे तु यावदन्यस्य नोदयः ।
निर्विकल्प चैतन्यं स्पष्टं तावत् विभासते ॥"

बह्मानुभव प्राप्त्यर्थं अन्तःकरणस्य विकल्पनस्य निरोधनमेव परमोपायः इति दर्शितं आचार्यैः। ब्रह्मानुभवकांक्षिभिः मुमुक्षुभिः एकद्वित्रिक्षणेन अनुक्रमेण अन्तःकरणवृत्तिमात्रस्य निरोधनस्य अभ्यासः कर्तव्यः । अभ्यासेन अन्तःकरणं निवृत्तिकं कृत्वा ज्ञानी शुद्धचैतन्यानुभवं प्राप्नोति। जीवः तु सविकल्प चैतन्यरूपः। सोऽपि अभ्यासवशात् अनुक्रमेण अन्तःकरणं निर्वृत्तिकं कृत्वा ध्यानादि उपायैः निर्विकल्पकं शुद्धबोधस्वरूपं एकं अखण्ड बह्मैव भवति इति जगद्गुरु शंकराचार्यैः दर्शितम् ।

**कार्यप्रतृत्तयः**

इन्द्रियाणां कार्यप्रवृत्तयः कथं भवन्ति इत्येतत् विषयं अधिकृत्य श्री शंकराचार्यैः आत्मबोध प्रकारणे स्पष्टं उक्तम् ।

"आत्मचैतन्यमाश्रित्य देहेन्द्रियमनोधियः ।
स्वकीयार्थेषु वर्तन्ते सूर्यालोकं यथाजनाः ॥"

आत्मा तु कार्यं न करोति । तमाश्रित्य एव सर्वाणि कर्माणि संभवन्ति । आत्मचैतन्यं तु न कर्मणां कर्तृ न कर्मफलानां भोक्तृ। जनानां स्वकीयकार्येषु सूर्यस्य प्रकाशः आवश्यकः। सूर्यालोकः एव जनान् स्वकार्येषु प्रवर्तयति । तथैव आत्मचैतन्यं लोकानां सर्वव्यवहारेषु आवश्यकम् । यदा सूर्यो भाति सर्वे जीवजन्तवः स्वकीयकार्येषु प्रवर्तन्ते, सूर्यस्तु तेषां कर्मणां न कर्ता न च तेषां कर्मफलैः अभिभूतः । तथैव आत्मचैतन्यमपि सर्वव्यवहार प्रेरकम् प्रवर्तकः किन्तु तेषु न बद्धः । चिन्मय आत्मा तु अमलः, अविवेकेन जनाः तस्मिन् देहेन्द्रियगुणान् कर्माणि च अध्यस्यन्ति यथा गगने नीलादिवर्णाः आरोपिताः । अर्कस्य प्रकाश

इव तोयस्य शैत्यमिव अग्नेः उष्णता इव निर्मलता चिदानन्दस्यस्वभावः । तदात्म-चैतन्यमाश्रित्य हि इन्द्रियाणि स्वकीयकार्येषु वर्तन्ते ।

'अहं जानामि' इति बोधः कथं उत्पधते ? अस्य विवरणमपि शंकराचार्यैः-स्पष्टीकृतम् । उक्तं च'

"आत्मनः सच्चिदंशः बुद्धेः वृत्ति इति द्वयम् ।
तौ अविवेकेन संयोज्य जानामि इति प्रवर्तते ॥"

अज्ञानात् अध्यवसायस्य कारणादेव "अहं जानामि" इति प्रवर्तते । अत्र 'अहं' तु अहंकार एव, ज्ञानं (बोधः) तु आत्मनः स्वभावः । चिदात्मा बुद्धौ प्रकाशते । अज्ञानात् एतत् चिदाभासं चिदंशे अध्यवसति । एतत्कारणात् 'अहंजानामि' इति बोधः उत्पद्यते । आत्मा तु चैतन्यः तस्य विक्रिया नास्ति । बुद्धेः तु बोधः नास्ति । शुद्धचैतन्यस्यैव प्रकाशः बुद्धौ भासितः । अज्ञानेन, अविवेकेन तदेव मूलचैतन्यमिति मत्वा जीवः स्वयमेव कर्ता, द्रष्टा इति मुह्यति ।

आत्मा तु स्वयंज्योतिः । जडवस्तुभिः न अवभास्यते । आत्मा एक एव बुद्यादीनि इन्द्रियाणि भासयति यथा दीपः घटादीन् । उक्तं च

यद्भासा भासतेऽर्कादि भास्यैर्यस्तु न भास्यते
येन सर्वमिदं भाति ब्रह्मेत्यवद्यारयेत् ॥

श्री शंकराचार्यैः स्पष्टं सूचितं सूर्यादिग्रहा अपि जडा एव । शुद्ध चैतन्यवस्तु एव ज्योतिष्मतां तेषां भासकः । प्रकाशनं सूर्यादीनां कर्म । तेषां प्रकाशनादिक कर्मप्रवृत्तयः अपि शुद्ध चैतन्येनैव संभवन्ति । शुद्धचैतन्यमेव अन्तर्बहिश्च सर्वत्र व्याप्य अखिलं भासयति । सर्वान् स्वकीयकर्मसु प्रेरयति, प्रवर्तयति सर्वत्रव्याप्तं चिदानन्द स्वरूपं चैतन्यम् ।

स्वयं अन्तर्बहिव्याप्य भासयन् अखिलं जगत्

ब्रह्मप्रकाशते वह्निप्रतप्तायस पिण्डवत् ।

चैतन्यम् एतत् विषयः अति गूढः सामान्यजनानां दुग्राह्यः आध्यत्मिकाभ्यासेनैव अधि गम्यते । जिज्ञासु शिष्याणां सुखबोधनाय अद्वैतसिद्धान्तप्रतिपादनार्थं च चैतन्यं ब्रह्मस्वरुपं इति तथ्यं मथितम् शंकराचार्यैः। वृत्तिरहितांतःकरणे शुद्धचैतन्यस्वरूपं अनुभूयते, अतः वृत्तिरहितं अंतःकरणं कृत्वा आत्मसुखं अखण्डं अनुभूयताम् इत्ययमेव लोकहितैषी जगद्गुरुशंकराचार्याणाम् अमृतसंदेशः ।

# द्वैतवेदान्ते चैतन्यावधारणा

महामहोपाध्याय

**एस्.वि. भीमभट्टः**

ओं नमः सर्वभूतानि विष्टभ्य परितिष्ठते ।

अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥

चतुरशीतिलक्ष जीवयोनि समाकुलं अनन्ताश्चर्यमयमिदं ब्रह्माण्डं भूतभौतिक संख्यातिग पदार्थैः संकीर्णं अनन्तकालादारभ्य दृष्टिगोचरी भवति । तस्यास्य विश्वस्य उत्पत्तिः स्थितिः प्रवृत्तिः पार्यन्तिक परिणामः इत्यादयः विचाराः मानव प्रज्ञया अगम्याः तथाऽपि पूर्वाचार्य दर्शित मार्गानुरोधेन अस्य जीवलोकस्य रहस्यपरिशोधनं द्वैतसिद्धान्तानुरोधेन यावत्कृतं तस्य सामान्यतः विहङ्गावलोकनं अस्मिन् लघुनि लेखने विवरीतुं प्रयत्यते ।

चेतना चेतनभेदेन प्रायः पदार्थः सर्वेऽपि द्विविधः इत्यङ्गीकुर्वन्ति विमर्शकाः तत्र अचेतनः प्रकृते न विचारणीयः तत्प्रसंगाभावात् । चेतनेविचार्यमाणे चार्वाकाः देहातिरिक्तः चेतनः नास्त्येव इति मन्यन्ते । बौद्धाः क्षणिकज्ञानपरंपरां चेतनइत्यङ्गीकुर्वन्ति । आर्हताः देहपरिमाणः सप्तभंगीसंयुक्तः ज्ञानाधारः चेतनइत्यङ्गीकुर्वन्ति । प्रायः अन्ये सर्वेऽपि ज्ञानाधारः विभुः सर्वत्र व्याप्तः चेतनः इति ऊरीकुर्वन्ति ॥

द्वैतदर्शनेतु स्वतन्त्रमस्वतन्त्रंच द्विविधं तत्त्वमिष्यते । स्वतन्त्रो भगवान् विष्णुः इत्युक्त्वा अस्वतन्त्र तत्त्वमध्ये चेतनः जीवाख्यः निवेशितः । तत्र परमात्मा स्वतन्त्र चेतनः । लक्ष्म्यादयः सर्वेऽपि अनित्यकोटि प्रविष्टाः । तत्र लक्ष्मीं एकां हित्वा अन्ये सर्वेऽपि चेतनाः अज्ञान दुःखभयमोहादियुक्ताः ते संसारिणश्च । तत्र परमात्मा सर्वव्याप्तः । गीतायां परमात्मनः कृष्णस्य विश्वरूपं दृष्ट्वा अर्जुनः एवं आश्चर्येण उद्गिरति। "द्यावापृथिधिव्योरिदमन्तरंहि व्याप्तं त्वयैकेन दिशश्च सर्वाः"। इति परमात्मनः

रूपं अनादिमध्यान्तं अनंतवीर्यं इत्येवं स्तौति । स परमात्मा समस्तं जगत् सृजति प्रपालयति लीलया हन्ति अनेकान् जीवान् स्वगतिं प्रयापयति । अस्य परमात्मनः परमचेतनस्य प्रदीप्तात् हुताशात् यथा विष्फुलिंगाः निस्सरन्ति तद्वत् अनेके अवताराः आविर्भवन्ति । तस्य अज्ञान लेशोऽपि नास्ति। सः सर्वज्ञः भ्रान्ति लेशरहितः स्वकीयस्मृति कीर्तन प्रणत्यादिभिः जीवानाम् उद्धारार्थं स्वस्वरूपाभिन्नान् अनन्तान् अवतारान् प्रकटयति ।

नित्योनित्यानां चेतनश्चेतनानां एको बहूनां यो विदधातिकामान् ।
तमात्मस्थं येऽनुपश्यन्ति धीराः तेषां शान्तिः शाश्वतीनेतरेषां ॥

इति कठश्रुतौ परमात्मना साकं जीवात्मनां कीदृशः उपकार्योपकारक भावः इत्ययं विषयः समीचीनतया प्रदर्शितः ।

तत्र परिपूर्णानन्तगुणत्वं परमात्मनः लक्षणम् । अनन्ताः अपि परमात्मनो गुणाः प्रत्येकं निरवधिकाः । सर्वत्र तेनादृष्टं क्वचिदपि किंचिदपि नास्ति । स देवः जगतः उत्पत्ति स्थितिसंहारनियतिज्ञानाज्ञानबन्ध मोक्षान् यथायोग्यं विधत्ते । यः सर्वज्ञः स सर्ववित् यस्य ज्ञान मयं तपः इति श्रुत्यनुसारेण स सर्वज्ञः । भूतभावि-भविष्यत् चेतनाचेतनात्मकवस्तूनि तत्तद्व्यक्तित्वेन प्रकारेण स जानाति । परमात्मनः गुणाः न मापिकाः नौपाधिकाः । सर्वेऽ तत्स्वरुपभूताः । परमात्म भिन्नं सर्ववस्तु तेन सृज्यते । स इदंसर्वमसृजत इतिश्रुतेः । परमात्मनो गुणाः तद्भिन्नाःश्चेत् सृष्टा भवेयुः । तेषां नाशे परमात्मनः स्वरुपहानिरेवस्यात् परमात्मनः गुणात्मकदेहवत्वात् गुणगुणिनोर्भेद एव नास्ति ।

परमात्मनोऽवताराः मनुष्यदेहेषु सर्वेऽपि, जगति च सर्वस्मिन् सर्वेऽपि सन्ति। श्वेतद्वीपवैकुण्ठानन्तासनाख्य नित्यलोकेषु विद्यमानस्य परमात्मनः मूलरुपस्य एषामवताररुपाणां च मात्रयापि भेदः नास्ति । लोकस्थरुपाणां नियम्यनियामकभावादिना भेदोऽपि नास्ति । स्थानभेदेनापि भेदो नास्ति । केवलं लीलया स भेदमज्ञानांमोहाय प्रदर्शयति। सर्वेऽप्ययमंशः कठोपनिषदि निस्संशयमुट्टंकितः

तथाहि ।

यदेवेह तदमुत्र यदमुत्र तदन्विह ।

मृत्योस्स मृत्युमाप्नोति यइह नानेव पश्यति ॥ (कठ द्वितीयाऽध्याये प्रथमवल्लि १०)

भगवन्मूलरूपावताररूपेषु भेदं भेदाभेदं वा यो जानाति स नित्यदुःखात्मकं तम आप्नोति । भगवद्रूपाणामिव भगवदवयव गुणकर्मणामपि भगवता भेदः भेदाभेदो वा नानुसन्धेयः पर्वतेषु ऊर्ध्वभागे शिखरे वृष्टमुदकं अधो विविधतया धावति तथा परमात्मनः धर्मान् अवतारान् गुणान् क्रियाः परमात्मना भिन्नतया यः पश्यति स महान्तमनर्थं तम आख्यं प्राप्नोति तदिदमाहोपनिषत्

यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति ।

एवंधर्मान् पृथक्पश्यंस्तानेवानुविधावति ॥ (कठ.प्र-द्वि-प्र-१४) ननु परमचेतनस्य परमात्मनः अनन्तगुणपरिपूर्णत्वं कथं घटते । यतो विमर्शकघौरेयाः तार्किकाः महेश्वरे ज्ञानेच्छा कृतीः संख्या परिमाण - पृथक्त्व संयोग विभागानष्टावेव गुणान् परिगणयन्ति । तत्रेदमुत्तरम् । तत्र परमात्मा परमुख्यया वृत्त्या सर्वशब्दवाच्यः। तथा च सर्वशब्दप्रवृत्ति - निमित्तभूता गुणाः परमात्मनि मुख्यतः तत्तच्छब्दवाच्याः वरीवृत्यन्ते । स च जडजीवप्रकृतिभ्योऽत्यन्त विलक्षणः । जडं प्रकृत्यादि, ब्रह्मादयो जीवाः प्रकृतिर्महालक्ष्मीः । तेभ्योऽत्यन्त विलक्षणः परमात्मा । तत्र प्रमाणं तु द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरःसर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ॥ इति गीता । ब्रह्मा शिवः सुरेशाद्याः शरीरक्षरणात् क्षराः । लक्ष्मीरक्षरदेहत्वादक्षरातत्परो हरिः । इति श्रुतिश्च । अत्र क्षराक्षरपदाभ्यां चेतनमेव गृह्यते क्षरजडस्याक्षर जडमात्रस्य च ग्रहणे तदुत्तमत्वज्ञानं मोक्षोपयोगि न सिध्यति । तत्रैव योमामेवमसंमूढो जानाति पुरुषोत्तमम् । सर्वविद् भजतिमां सर्वभावेनभारत। इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ एतद्बुदध्वा बुद्धिमान्स्यात् कृतकृत्यश्च भारत ॥ इति वचनेन अत्रोक्तं सर्वं मिथ्या इति संमोह वर्जितः यः एतद्

गुह्यतमं तत्त्वं जानाति, ज्ञात्वा च मनुते ध्यायति च स जिज्ञासुः, योगमारुरुक्षुः बुद्धिमान् अपरोक्षज्ञानी कृतकृत्यः मुक्तश्च भवतीति वचनात् विष्णोः सर्वोत्तमत्वज्ञानं रहस्यतमं मोचकं च इति ज्ञायते। सच परमात्मा जन्माद्यष्टकर्ता। सृष्टिः स्थितिश्च संहारो नियतिर्ज्ञानमावृतिः । बंधमोक्षौ च पुरुषान् यस्मात् स हरिरेकराट् ।। इति प्रमाणानुसारेण सृष्टिस्थितिसंहारनियमन ज्ञानाज्ञानबंधमोक्षाख्य व्यापाराष्टकस्य मुख्यतः कर्ता परमात्मा श्रीहरिरेव । ननु परमात्मनः सृष्ट्याद्यष्टकर्तृत्वं न युक्तं । स हि शरीरवान् वा उताशरीरः। आद्येऽस्मदादिवत् मृति संसार बन्धाद्यापत्तिः तस्यापि ।

शरीराभावे च जगत्सर्जनं न संभवति । एवमाशंकायामुच्यते परमात्मा शरीरवानेव। परंतु ज्ञानानन्दाध्यात्मककल्याणविग्रहवान् । तस्य च विग्रहस्य ज्ञानानन्दात्मकपरमात्मस्वरूपत्वेन विनाशः न संभवति । प्राकृतदेहस्यैव हि विनाशः संभवति। ननु भगवतः भगवदात्मक ज्ञानानन्दादि देहवत्वेपि नयनश्रोत्रहस्तपादाद्यभावे अंधबधिर कुणिपंगुवत् तस्य जगत्कर्तृत्वानुपपत्तिः इति लौकिकाः शंकेरन् अत्र वयं वदामः। सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् इत्यादि प्रमाणैः परमात्मा सकलेन्द्रियपाटववान् इत्येवमंगीक्रियते । अपाणिपादो जवनोगृहीता पश्यत्यचक्षुः स शृणोत्यकर्णः । इत्यादिकंतु प्राकृतेन्द्रियराहित्यपरम्। अप्राकृतेन्द्रियाणितु तस्य संत्येव। तस्मादानन्दचिद्देहं चिदानन्द शिरोमुखम् । चिदानन्द भुजम् ज्ञान सुखैक पदसंगुलिं। आकेशादानखाग्रेभ्यः पूर्णचित्सुखशक्तिकम् इति प्रमाणानुसारेण सर्वत्र सर्वरूपेष्वपि भगवान् ईदृश एव। तत्र दिव्यज्ञानिनः केचिदेव तं सर्वदा प्राकृतलोकेष्वपि एवमेव पश्यन्ति । साधारणजनास्तु मोक्षयोग्याः भक्ति सहित श्रवणमनननिदिध्यासनैः तमपरोक्षीकृत्य लिंगदेहभंगानन्तरमप्राकृतं वैकुण्ठादिलोकेषु तं सर्वदा पश्यन्ति । नानाविधभोगान् भुंजानाः रमन्ते । बह्मरुद्रादिवदयं कदापि न पराधीनः । किन्तु सर्वतन्त्रस्वतन्त्रः । समस्तब्रह्माण्डे विद्यमान जीवानां शरीरेषु स विद्यमानोपि जीवशरीरगतदुःखादिलेपहीनः आनन्दी विराजते विहरति च । तथाहि श्वेताश्वतरश्रुतिः द्वासुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति इति । वस्तुतः द्वैतदर्शने स्वतन्त्रमस्वतन्त्रंच द्विविधं

तत्वमिष्यते । तत्र स्वतन्त्रः भगवान् विष्णुरेक एव । तथाहि गीतायामेकादशेऽर्जुन वचनम् - पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् । न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः लोकत्रयेऽप्यप्रतिमप्रभाव ॥ (गीता ११ - ४३)

एकमेवाद्वितीयं इत्युपनिषदपि परमात्मानं सर्वस्वतन्त्रमुद्घोषयति । परमस्वतन्त्रस्यापि परतन्त्रत्वविज्ञानं परमात्मनः परमा अवज्ञा तस्य अवज्ञायाः फलं परमा दुर्गतिः नरकवासरूपा भवति । हरेरीश्वरः (स्वामी) कदापि क्वापि कश्चिदपि न विद्यते । श्रीमन्नारायणभिन्नस्य जगतः चेतनात्मकस्य स्वातन्त्र्यं नानामानविरुद्धम् । स्वतन्त्रो भगवान् विष्णुरेकएव । मत्तः परतरं नान्यत् किंचिदस्ति धनञ्जय - इति गीतायां भगवान् कृष्ण एव स्वस्वरूपं स्पष्टमाह। नास्ति नारायण समं न भूतं न भविष्यति । एतेन सत्यवाक्येन सर्वार्थान् साधयाम्यहम् । सत्यं सत्यं पुनस्सत्यमुद्धृत्य भुजमुच्यते । वेदशास्त्रात् परं नास्ति न दैवं केशवात् परम् । इत्यादीन्यनेकानि वचनानि परमात्मनः सर्वापेक्षया स्वतन्त्रत्वबोधकानि जाग्रति । अत्रेयं शंका उदीयात् । एकमेवाद्वितीयं परमात्मतत्वम् इति भवद्भिरुच्यते, परंतु रामकृष्णाद्यनेकरुपाणि दरीदृष्यन्ते। एवं महादेवः चतुर्मुखः सुब्रह्मण्यः गणेशः काली, दुर्गा इत्यादयः अनेकदेवता विशेषाः अन्यान्यैः भक्तैर्भिन्नतया अंगीक्रियन्ते । ते एव सर्वोत्तम चेतनस्वरूपा इत्यप्यंगीक्रियन्ते । अस्याः विमतेः किमुत्तरं स्यादिति ? एवमुत्तरं वदामः । परमात्मा श्रीमन्नारायणः । मत्स्यकूर्माद्यनन्तानि रूपाणि सर्वथा स्वाभिन्नानि भिन्नानीव प्रकटयति । प्रदर्शयति च । अज्ञानिनः तानि भिन्नानि इति विमुह्यन्ति । महादेवादिरूपाणि यान्युक्तानि तानि सर्वाण्यपि परमात्मसन्निधान युक्तानि भिन्नानिरूपाणि । (श्रुतिस्मृतिषु अनुक्तानि क्रैस्तवमहदीयांगीकृतानि परमात्मनो अन्यानिरूपाणि सर्वाण्यपि मोहकल्पितानि तेषामुपासनया परमानन्दरूपः पुरुषार्थः सर्वथा न प्राप्यते ।) अन्ते वचनमेकं निर्धारणपूर्वकमुक्त्वा द्वैतदर्शने परमचैतन्य स्वरूपविषयक शास्त्रीय वचनगुम्फनमुपसंहरामः । अदुःखमितरत्सर्वं जीवा एवतु दुःखिनः । तेषां दःखप्रहाणाय श्रुतिरेषा प्रवर्तते । इति वचनानुसारेण निर्दुःख निरतिशायानन्दारूपावस्थिति रूपमोक्ष एव सर्वेषां दर्शनानां परमोद्देश्यरूपः । तत्प्राप्तये तादृशं नित्यानन्द रूपं निखिलशक्तिमत् स्वाश्रितानपि यत् तत्त्वं स्वस्वरूपं प्रापयितुं क्षमं तादृशं किंचित्

परमचैतन्यमंगीकर्तव्यम् । तदेव श्रीमन्नारायणः । स निर्दोषः सर्वप्रभुः । अतोऽशेषगुणोन्नद्धं निर्दोषं यावदेव हि । तावदेवेश्वरो नाम तत्र भेदोऽपि न क्वचित् ।। इदं द्वैतदर्शने परमचैतन्य विषये सिद्धान्तितं वचः ।। इदानीं द्वैतदर्शनरीत्या जीवचैतन्यविचारः अपि यावच्छक्ति संक्षेपतः प्रस्तूयते । स्वतन्त्रमस्वतन्त्रं च द्विविधं तत्त्वमिष्यते । स्वतन्त्रो भगवान्। जीवाः सर्वेऽपि तद्वशाः । अज्ञानभयमोहादियुक्ताः संसारिणो जीवाः । सर्वेऽपि जीवाः अहंशब्दवाच्यस्वस्वरूपात् तदितर सर्व-जीवजडापेक्षया भिन्नः इत्येवं साक्षिस्वरूप नित्याबाध्य स्वात्मानुसंधानवन्तो विजानन्ति ।

जाग्रत्स्वप्नसुषुप्त्याख्यासु त्रिष्वप्यवस्थासु जीवस्य अहमित्याकारक साक्ष्यात्मक ज्ञानेन सह जाग्रत्स्वप्नमूर्च्छावस्थासु वृत्तिरूपं ज्ञानमप्यस्ति । तत्र मूर्च्छावस्थाविषयं विशेषतः न विचारयामः, इदानीमप्रस्तुतत्वात् ।

सर्वेऽपि जीवचेतनाः अणुपरिमाणवन्तः । वालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवः स विज्ञेयः सचानंत्याय कल्पते । इति श्वेताश्वतरोपनिषदुक्तरीत्या जीवः परमाणुस्वरुपः । ते च जीवाः असंख्याकाः । अनागता अतीताश्च यावन्तः सहिताः क्षणाः । अतीतानागताश्चैव यावन्तः परमाणवः । ततोऽप्यनन्तगुणिता जीवानां राशयः पृथक् । परमाणु प्रदेशेऽपि ह्यनन्ता जीवराशयः ।। अनेन प्रमाणेन परमात्मा यथानन्तरूपः तद्वत् जीवा अपि असंख्याकाः । न केवलं जीवाः । सर्वेऽपि मिलित्वा अनन्ताः, किन्तु-गणशोऽप्यनन्ताः। ब्रह्मपदयोव्याः ऋजवोनाम जीवा अनन्ताः । एवं गरुड रुद्रादि पदयोग्या अपि जीवा अनन्ताः । एवं सर्व पदयोग्या अपि जीवाः गणशोऽप्यनन्ताः सन्ति । एते च जीवाः मुक्तियोग्याः नित्यसंसारिणः तमोयोग्याश्चेति त्रिविधाः । तत्र मुक्तियोग्याः देव ऋषिपितृचक्रवर्ति मनुष्योत्तमभेदेन पंचविधाः । अस्मिन् दर्शने सात्विकजीवा एव मुक्तियोग्याः । चतुर्मुखब्रह्माणमारभ्य तृणजीवपर्यन्तं मुक्तियोग्याः सन्ति । तत्र मुक्तियोग्यजीवानां तमोयोग्यजीवानां च स्वभावदिकं गीतायां विशेषतः षोडशेऽध्यायेऽन्यत्रापि, एवं श्रुति स्मृतीतिहासादिष्वपि निष्कृष्टतया संप्रदर्शितम् । लेशतः किंचित् दर्शयामः अभयं सत्वसंशुद्धिः ज्ञानयोगव्यवस्थितिः ।

दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ अहिंसा सत्यमक्रोधः त्यागः शान्तिरपैशुनम् । दया भूतेष्वलोलुत्वं मार्दवं ह्रीरचापलं ॥ तेजः क्षमाधृतिः शौचमद्रोहो नातिमानिता । भवन्ति संपदं दैवीमभिजातस्य भारत॥ दैवी संपद्विमोक्षाय । अनेन श्लोकसमुदायेन सात्विका एव मोक्षभागिनः इति निर्धारितं भवति । नित्यं सुखदुःखमिश्राः नित्यसंसारिणः । ते च नित्यसंसारिचेतनाः मध्यम मानवाः एवासंख्याताः सर्वदा स्वर्गभूनिरयचारिणः एतादृशाश्चेतनाः सन्तीत्यत्र प्रमाणम् । त्रैविद्ध्याः मां सोमपाः पूतपापाः यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते । ते पुण्यमासाद्य सुरेन्द्रलोकं अश्नन्ति दिव्यान् दिवि देवभोगान्॥ ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति । एवं त्रयीधर्ममनुप्रपन्नाः गतागतं काम कामा लभन्ते ॥ (गीता आ ९ - श्लो २०-२२) चोष्कूयते विश इन्द्रो मनुष्यान् (श्रुतिः) इन्द्रः परमैश्वर्यशाली परमात्मा विशः मध्यम मनुष्यजीवान् चोष्कूयते पुनः पुनः भृशं वा संसारे परिवर्तयति। ये यथावत् परमात्मानमज्ञात्वा तं द्विषन्ति स जीवाभिन्नः तस्मिन् विद्यमानाः गुणाः सर्वेऽपि मिथ्या सर्वेधर्माः व्यावहारिकाः परमार्थतः सनिर्धर्मकः स एव ब्रह्मनामकः परमचेतनः निर्विकल्पकज्ञानमात्रस्वरूपः समस्तं जगत् मिथ्या समस्त विकल्प रहित केवल ज्ञानरूपस्य स्वरूपापत्तिरेव मोक्षः इतियेऽभ्युपयन्ति ते चेतनाः तमो योग्याः । ते चतुर्विधाः दैत्याः राक्षसाः पिशाचाः मनुष्याधमाश्चेति । असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरं । ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी। मामात्म परदेहेषु प्रद्विषन्तोऽभ्यसूयकाः एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः । प्रभवन्त्युग्रकर्मणः क्षयाय जगतोऽहिताः । तानहं द्विषतः क्रूरान् संसारेषु नराधमान् क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु । आसुरीं योनिमापन्नाः मूढ़ा जन्मनि जन्मनि। मामप्राप्यैव कौन्तेय ततो यान्त्यधमांगतिम् ॥ आभिर्गीतावाग्भिः मिथ्याज्ञानिनः जीवाः नित्यनरकमाप्नुवन्तीति निश्चप्रचं ज्ञायते । किंच सात्विकी, राजसी, तामसी चेति श्रद्धा त्रिविधा । तत्र तामस्याश्रद्धया तामसीगतिर्भवति । श्रद्धा च जीवचैतन्यरूपा । योयच्छ्रद्धः स एव सः । (गीता) एवं सर्वेऽपि जीवचेतनाः मुक्तौ संसारे च परस्परं परमात्मना चभिन्नाः । संसारे मुक्तौ च तारतम्योपेताः ॥

एवं द्वैतदर्शने चैतन्यस्वरूपमित्यस्मिन् विषये यथामति यथावकाशं विवेचनं कृतम् । अत्र विशेषप्रमाणानि तद्विमर्शश्च न कृतः । स्वस्वरूपाविर्भाव एव मोक्ष इति द्वैतदर्शनस्य परमः सिद्धान्तः । स्वरूपं च प्रतिचेतनंभिन्नं भिन्नम् । तदनुसारेणैव सर्वे प्रमाणप्रमेयादयाः *दर्शनेऽस्मिन् विचारिताः निर्णीताश्च ।*

निश्शेषदोषरहित कल्याणाखिल सद्गुण ।
भूतिस्वयंभु शर्वादिवंद्यं त्वां नौमिमेप्रियम् ॥

एतेन श्रीमध्वभगवत्पादस्य पद्यवाचनेन लेखमिममुपसंहरामि ।

# श्रीरामानुजदर्शने चैतन्यम्

प्रो. अरेय्यर्. श्रीराम शर्मा

'परमवैदिकसिद्धान्तः' इति प्राक् प्रसिद्धं विशिष्टाद्वैतदर्शनं तु ततः रामानुजदर्शनम् इति लोके व्यवहृतम् । वेदान्तसिद्धान्तेषु द्वैतं आनन्दतीर्थाचार्यस्य, अद्वैतं तु शंकराचार्यस्य, विशिष्टाद्वैतं तु रामानुजाचार्यस्य महिम्ना लोके प्रचारं प्राप्तम् ॥

तत्र चेतनवर्गैः अचेतनवर्गैश्च विशिष्टं परंब्रह्म एकमेव तत्वं इति विशिष्टाद्वैतार्थः। चैतन्यवान् चेतनः । चैतन्यरहितः अचेतनः । चैतन्यं कदापि निराश्रयं न भवति ।

तत्र च चेतनवर्गेषु सामान्यस्य चेतनतत्त्वस्य स्वरूपादिकं इदानीं आकरग्रंथानुसारेण निरुप्यते। आश्रयं विना आश्रयिणः स्वतंत्रतया निरूपयितुं अशक्यत्वात् । आत्मा चेतनः ईश्वरस्तु परमःचेतनः । तत्र

देहेन्द्रियमनः प्राणधीभ्योऽन्योऽनन्यसाधनः ।
नित्योव्यापी प्रतिक्षेत्रं आत्मा भिन्नः स्वतस्सुखी ॥

इति भगवद्यामुनमुनेः आत्मवादसंग्रहश्लोकः ।

इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञमिति तद्विदः

इति भगवद्गीतोत्त्कदिशा देहादिभ्योऽन्यः ज्ञानी क्षेत्रज्ञः जीवात्मा चेतनः इति तु स्पष्टमेव। व्यापी सूक्ष्मत्वात् सर्वत्र प्रवेष्टुं शीलमस्येति अणुरित्यर्थः । अनन्यसाधनः स्वयं प्रकाशः ज्ञानस्वरूपः ज्ञानगुणकः ज्ञानपरिणमरुप आनन्दगुणकश्च इत्यर्थः।

क्षरस्सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ।

इति गीतोक्तदिशा अक्षरः इत्यपि जीवात्मा व्यवह्रियते ।

यस्मात् क्षरमतीतोऽहं अक्षरादपिचोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥

इति गीतोक्तदिशा परब्रह्मतत्वात् चेतनः भिन्नः अवरश्च । तदुक्तम् : -

अपरेयमितस्त्वन्यां प्रकृतिं विद्धिमे पराम् ।
जीवभूतां महाबाहो ! ययेदं धार्यते जगत् ॥

इति ।

अत्र शरीरादिरूपेण परिणतायाः अपरायाः प्रकृतेः धारकतया चेतनः आत्मा इत्युच्यते। अत एव च परा भगवतः प्रकृतिः चेतनः इति ॥

पुरुषः इति चेतनः जीवात्मा उच्यते परमपुरुषः इति पुरुषोत्तमः इतिच परमात्मा जीवात्मभिन्नतया उच्यते यथा : -

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः

इति भगवद्गीतावचनम् ।

एवं परमात्मनः परतन्त्रः एव जीवात्मा चेतनः परमात्मनः शरीरं इति परमवैदिकसिद्धान्तः यथा बृहदारण्यके : -

"यस्यात्माशरीरं; य आत्मानमन्तरो यमयति; सत आत्मा अन्तर्याम्यमृतः" इति परमात्मनः जीवात्मान्तर्यामित्वं निरूपितम् :

अथ तत्वत्रयग्रन्थानुसारेण जीवात्म स्वरूपादिकं संगृह्यते । : -

आत्मा देहेन्द्रियमनः प्राणबुद्धिपदार्थेभ्यो विलक्षणत्वात् भिन्नः, अजडः, आनन्दरूपः, नित्यः, अणुपरिमाणः अव्यक्तः, अचिन्त्यः, अवयवैः आनारब्धत्वात् निरवयवः, निर्विकारः, ज्ञानाश्रयः, सर्वेश्वरस्य परमात्मनः श्रीमते नारायणस्य नियाम्यः धार्यः शेषश्च ॥

अयं मम देहः, इमानि मम इन्द्रियाणि, इदं मम मनः, अयं मम प्राणः, इयं मम बुद्धिः इति इदमादिशब्दबोध्येभ्यः देहादिभ्यः अहमित्येव सर्वदा बोध्यः जीवात्मा चेतनः भिन्नः । अयं मम अयंतव अयं तस्य इति व्यवहारात् प्रतिशरीरं एकैकः चेतनः वर्तते इति अन्यचेतनेभ्यः स्वस्य भिन्नत्वात् चेतनानां एवमेव नानात्वं सिद्धम् ।

यद्यपि उक्तानां तर्कयुक्तीनां कदाचित् प्रबलयुकत्यन्तर प्रतिहतेः अनुमानात्, एवं रीत्या देहादिविलक्षणत्वं श्रुतिस्मृतिसूत्रपुराणागमदिशा सप्रमाणादेव वेदान्तिभिः अङ्गीकर्तव्यः। अत एवं तर्काप्रतिष्ठानात् इति भगवता व्यासेन सूत्रितम्। एवं अग्रेऽपि शास्त्रप्रमाणादेव सर्वसिद्धिः वक्तव्या।

यथा :-

"भोक्ता भोग्यं प्रेरितारं च मत्वा" "पृथगात्मानं प्रेरितार च मत्वा, जुष्टस्ततस्तेनामृतत्वमेति"

"क्षरं प्रधानं, अमृताक्षरं हरः, क्षरात्मानावीशतेदेव एकः"

"प्रधानक्षेत्रज्ञपतिर्गुणेशः" इति श्वेताश्वतरोपनिषदि तत्वत्रयभेदः मोक्षार्थज्ञान विषयतया निरूपितः।

प्रकृतितत्वं चतुर्विंशति भेद भिन्न वेदान्तिभिः उपनिषत्प्रमाणानुसारेण अङ्गीक्रियते। तथाच:-

पञ्चविंशोयं पुरुषः, पञ्चविंश आत्मा भवति, इति उपनिषत्सु।
भूतानि च कवर्गेण, चवर्गेणेन्द्रियाणि च।
टवर्गेण, तवर्गेण ज्ञानगन्धादयस्तथा॥
मनः पकारेणैवोक्तं, फकारेणत्वहंकृतिः।
बकारेण - भकारेण महान् - प्रकृतिरुच्यते॥
आत्मा तु स मकारेण पञ्चविंशः प्रकीर्तितः। इति। पाद्मोत्तर पुराणे २२६ अध्याये
यः परः प्रकृतेः प्रोक्तः पुरुषः पञ्चविंशकः।

स एव सर्वभूतात्मा नर इत्यभिधीयते॥ इति महाभारते आरण्य पर्वणि १७५ अध्याये।

आत्मा शुद्धोऽक्षरः शान्तो निर्गुणः प्रकृतेः परः।
प्रवृध्द्युपचयौ न स्तः एकस्याखिलजन्तुषु॥ इति॥

विष्णुपुराणे द्वितीयांशे त्रयोदशाध्याये। तथा तत्रैव : -

पिण्डः पृथग्यतः पुंसः शिरःपाण्यादिलक्षणः ।

ततोऽहमिति कुत्रैतां संज्ञां राजन् । करोम्यहम् ॥

किंत्वमेतच्छिरः, किन्नु शिरस्तव, तथोदरम् ।

किमु पादादिकं त्वं वै, तवैतत्किं महीपते ! ।

समस्तावयवेभ्यस्त्वं पृथग्भूतव्यवस्थितः ।

कोऽहमित्येव निपुणो भूत्वा चिन्तय पार्थिव !

पञ्चभूतात्मके देहे देही मोहतमोवृतः ।

अहं ममैतदित्युच्चैः कुरुते कुमतिर्मतिम् ॥

आकाशवार्य्वाग्नजलपृथिवीभ्यः पृथक्स्थिते ।

आत्मन्यात्ममयं भावं कः करोति कळेबरे ॥ इति ।

एवं शास्त्रप्रमाणसिद्धं दुर्ज्ञेयम्, अनुमानादि प्रमाणसिद्धंकदाचित् सापन्हतम् इति आत्मनः देहदेहि लक्षणत्वं सिद्धम् ।

आत्मपदार्थस्य देहादि वैलक्षण्ये तु मुख्यो निमित्तं चैतन्यमेव । उक्तंच संग्टह्य नैय्यायिकैः -

शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः ।

तथात्वं चेदिन्द्रियाणां उत्पद्यते कथं स्मृतिः ॥

मनोऽपि न तथा ज्ञानादि अनध्यक्षं तदा भवेत् ।

धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः ।

प्रवृत्याद्यनुमेयोऽयं रथगत्येव सारथिः ।

अहंकारस्याश्रयोऽयं मनोमात्रस्य गोचरः ॥

विभुर्बुध्यादि गुणवान् ॥ इति ॥

चेतनस्य धर्मः चैतन्यम् । चित=सञ्चेतने इत्यस्मात् चौरादिकात् चेतयते इति चेतनः इति पदं सिध्यति । चेतयिता जीवः चैतन्यकार्यसम्पादकः इति भावः ।

चिती=संज्ञाने इति भौवादिकात् धातोः चेततीति ज्ञानं एव चैतन्य पदार्थतया ज्ञायते ॥

चैतन्यमेव चेतनः इति क्षणिकविज्ञानात्मवादिनां बौद्धानां, नित्यविज्ञानात्मवदिनां अद्वैतवेदान्तिनां च पक्षः । चैतन्यं न आत्मा चैतन्याश्रयः आत्मा इति नैय्याकादीनां पक्षः । आत्मा तु चेतनः ज्ञानस्वरूपः ज्ञानगुणकश्च इति विशिष्टाद्वैतवेदान्तिनां पक्षः । एवं -

"विज्ञानधनः" "आत्मा ज्ञानमयः" "तच्च ज्ञानमयं व्यापि स्वसंवेद्यं अनूपमम्" "ज्ञानस्वरूपं अत्यन्तनिर्मलं परमार्थतः" इत्यादिभिः प्रमाणैः आत्मनः ज्ञानघनरूपवत्त्वं प्रसिद्धम् । एवं "ज्ञोत एव" "जानात्येवायं पुरुषः" "ब्रह्मविदाप्नोति परम्" "ब्रह्मवेद ब्रह्मेव भवति" इत्यादिभिः ज्ञातृत्वरूपं ज्ञानाश्रयत्वं च प्रसिद्धम् ॥

एवञ्च धर्मिभूतं ज्ञानं धर्मभूतज्ञानस्याश्रयतयातिष्ठतीति धर्मिभूतज्ञानस्य गुणः धर्मभूतज्ञानं चैतन्यं इति स्पष्टीकृतम् ।

यथा चेतनवर्गः जीवात्मसमूहः ज्ञानद्रव्यं तथा तद्धर्मभूतं ज्ञानमपि द्रव्यमेव । यथा - प्रभावत्पदार्थानां इव प्रभाया अपि द्रव्यत्वं इति विशिष्टाद्वैतसिद्धान्ते अङ्गीकृतम् ।

धर्मिभूतज्ञानं तु संकोचविकासयोः अयोग्यं, स्वव्यतिरिक्तार्थानां अप्रकाशकं, स्वस्मै स्वयं प्रकाशमानं, अणु च इति ज्ञेयम् । धर्मभूतंज्ञानं तु संकोचविकासयोः योग्यं, स्वव्यतिरिक्तार्थानां प्रकाशकं, स्वयंप्रकाशमानत्वेऽपि स्वस्मै अप्रकाशमानं, स्वाश्रयं प्रत्येव प्रकाशमानं, विभु च इति ज्ञेयम् ॥

केषांचित् ज्ञानं सर्वदा विभु; केषांचित्तु सर्वदा अविभु, केषांचित्तु कदाचित् विभु कदाचित् अविभु । एवं विभुत्वं आत्यन्तिकम् ।

इदं ज्ञानं नित्यमपि इन्द्रियद्वारा प्रसरणाप्रसराणाभ्यां उत्पत्तिं नाशं च व्यवहारे भजति ।

एकमेव ज्ञानं प्रसरणोपाधिभेदात् नानारूपं भवति । ज्ञानं चेतनस्य धर्मभूतमपि द्रव्यमेव गुणक्रियाश्रयत्वात् । अजडत्वाच्च अजडद्रव्यं अजडत्वंनाम स्वयं-

प्रकाशत्वम् । धर्मत्वंनाम विशेषणत्वम् । गुणत्वं च विशेषणत्वमेव । तथा च दण्डी कुण्डली वासस्वी देवदत्तः इत्यादिषु प्रयोगेषु दण्डस्य कुण्डलस्य वाससश्च द्रव्यत्वेपि देवदत्तद्रव्यं प्रति विशेषणत्वात् तद्धर्मत्वं तद्गुणत्वं च सिद्धम् । अत्रगुणत्वं नैय्यायिकादि परिगणित द्रव्यत्वासमानाधिकरण गुणत्वरुपजात्याश्रयत्वं इति न मन्तव्यम्; किन्तु गुणत्वं विशेषणत्वम् विशेष्योत्कर्ष निमित्तत्वं इति मन्तव्यम् ॥

ज्ञानस्य अजत्वात् स्वयंप्रकाशत्वे सुषुप्तिमूर्छादिषु कथं प्रतीतिः न इति प्रश्ने, प्रसरणाभावात् इति उत्तरम् । तमोगणाभिभूतत्वात् सुषुप्त्यादिषु ज्ञानस्य प्रसारणं नास्ति । तिरोहितमणिप्रकाशादिवत् ।

ज्ञानंतु स्वरूपतः स्वाश्रयस्यजीवात्मनः अनुकूलतया वेदनीयत्वात् सुखरूप-मेव । सुखमेवह्यानन्दः । एवं ज्ञानस्य परिणामविशेष एव आनन्दः इति भावः ज्ञानंयदा इदं मम ज्ञानं एवंप्रकारं इति जीवात्मनः, प्रकाशते तदा ज्ञानांशस्य अनुकूलत्वमेव । ज्ञाने यः विषयांशः संगतः स तु अनुकूले वा भवति प्रतिकूले वा भवति । जीवात्मनः पुण्यपापकर्मानुसारेण विषयाणां प्रतिकूलत्वादिकं नियतम्। ज्ञानस्य सुखमात्र-परिणामित्वात् । विसशक्तादीनां विषयाणां प्रतिकूलत्वं जीवकर्मायत्तम् । वस्तुतः सर्ववस्तुनः अनुकूल्यमेवस्वरूपम् ।

महर्षि मैत्रेयं पृच्छकं प्रतिवदता भगवता पराशरेण एतत् स्पष्टीकृतम् यथा विष्णुपुराणे।

वस्त्वेकमेव दुःखाय सुखायेर्ष्यागमाय च ।
कोपाय च यतस्तस्मात् वस्तु वस्त्वात्मकं विदुः
तदेव प्रीतिये भूत्वा पुनर्दुःखाय जायते ।
तस्माद् दुःखात्मकं नास्ति न च किंचित्सुखात्मकम् ।

इति ।

विषशस्त्रादीनां प्रतिकूलत्ववत् चन्दन कुसुमादीनां अनुकूलत्वं देहात्मभ्रम-मूलकम् जीवकर्मानुगुणं भवति । शुद्धं ज्ञानं आत्मविषयकं परमात्म विषयकं च ज्ञानं

तथा सर्वविषय प्रकाशन दशायां सर्वमपि ज्ञानं आनन्दरूपमेव । तथा च इदं ममप्रतिकूलं वस्तु इदं ममानुकूलं वस्तु इति विवेकात्मकं ज्ञानं मम जातं खलु; अन्यथा अहं अविवेकात् दुःखभाक् अभविष्यम् इति विषयस्य प्रतिकूलत्वे समापतितेऽपि प्रतिकूलविषयज्ञानस्य जीवात्मानुकूलत्वात् अनुकूलतयाज्ञानं सर्वमेव आनन्दरूपं इत्युक्तम् ।

आश्रयादन्यतो वृत्तेः आश्रयेण समन्वयात् ।
द्रव्यत्वं च गुणत्वं च ज्ञानस्यैवोपपद्यते ।

इति यामानुचार्यस्य श्रीसूक्तिः ।

सर्वं ज्ञानं स्वत एव प्रमाणं स्वयं प्रकाशं च । अवस्थावत्त्वं द्रव्यसामान्य-लक्षणम्, संकोचविकासावस्थावत्त्वात् ज्ञानमपि द्रव्यमेव ।

चैतन्यस्यैव ज्ञानं, मतिः, प्रज्ञा, संवित्, धिषणा, धीः, मनीषा, शेमुषी, मेधा, बुद्धिः, स्मृतिः, प्रतिभा इत्यादि शब्दाः वाचकाः । प्रवृत्तिनिमित्तभेदात् वाचकानां नानात्वम् । एवं कामः, संकल्पः विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिः ह्रीः धीः भीः इत्येतत्सर्वं मन एव इति श्रुत्यनुसारात् तत्र संसारि जीवाश्रयस्य ज्ञानस्य प्रकाशे प्रसारेच मनस्सहकारित्व नियमात् मन एव इति उपचारात् उक्तम् ।

सुखादिजनकतया ज्ञानातिरेके सुखादीनां प्रमाणाभावात् ज्ञानमिति प्रसिद्धा बुद्धिरेव उपाधिभेदात् सुख दुःखेच्छा द्वेषप्रयत्नरूपा । 'इच्छामि' 'द्वेष्मि' इति व्यवहारस्य स्मरामीत्यादिवत् ज्ञानविशेषेणैव उपपत्तेः ॥

एवं प्रत्यक्षं अनुमानं आगमः स्मृतिः संशयः विपर्ययः भ्रमः विवेकः व्यवसायः मोहः रागः द्वेषः मदः मात्सर्यं अधैर्यं चापल्यं दम्थः लोभः दर्पः स्तम्भः द्रोहः अभिनिवेशः निर्वेदः आनन्दः सुमतिः दुर्मतिः सुप्रीतिः तुष्टिः उन्नतिः शान्तिः विरक्तिः रतिः मैत्री करुणा मुदिता उपेक्षा मुमुक्षा तितिक्षा लज्जा विचारणा जिगीषा क्षमा चिकीर्षा जुगुप्सा भावना कुहना असूया जिघांसा तृष्णा दुराशा वासना चर्चा श्रद्धा भक्तिः प्रपत्तिः इत्येवमादयश्च जीवगुणाः अनन्ताः धर्मभूतज्ञानस्य चैतन्यस्य अवस्थाविशेषा एव ।

आत्मपदार्थस्य चेतनत्ववत् परामात्मपदार्थस्यापि चेतनत्वात् परमात्म गुणानां ज्ञानं शक्तिः बलं ऐश्वर्यं वीर्यं तेजः सौशील्यं वात्सल्यं मार्दवमार्जवं सौहार्दं धैर्यं साम्यं कारुण्यं माधुर्यं गांभीर्यं औदार्यं स्थैर्यं पराक्रमः इत्यादयोऽपि अनन्ताः कल्याण-गुणगणाः ज्ञानशक्त्योः विततिविशेषाः ।

भक्तियोगोनाम यम - नियम - आसन - प्राणायाम - प्रत्याहार - धारण - ध्यान - समाधिरुपैः अष्टभिः अंशैःविशिष्टः तैलधारावदविच्छिन्न स्नेहपूर्वकस्मृति सन्तानरूपः । सच विवेक-विमोक - अभ्यास - क्रिया - कल्पाण - अनवसाद - अनुद्धर्जरूपेण साधन सप्तकेन जन्यः ।

विवेकः = जात्याश्रयनिमित्तादिभिरष्टैः अन्नैःकायशुद्धिः । विमोकः = कामेषु अनभिष्वङ्गः । अभ्यासः = पुनः पुनः ध्यानालम्बनस्य संशीलनम् । क्रिया = शक्यनुसारण पञ्चमहायज्ञाद्यनुष्ठानम् । कल्याणानि = सत्यम्, आर्जवं, दया, दानं, अहिंसा, ब्रह्मचर्यादीनि । अनवसादः = दैन्याभावः । अनुद्धर्षः = तुष्ट्यभावः, अतिसन्तोषश्च योगविरोधी इत्यर्थः ॥

एवं साधनसप्तकानुगृहीता भक्तिः दर्शनसमानाकारा अन्तिमप्रत्ययावधिकाच भवति । सच अन्तिम प्रत्ययः ऐतच्छरीरावसाने शरीरान्तरावसाने वा भवति । वेदनं ध्यानं उपासनं - सेवा - इत्यादिशब्दवाच्या भक्तिः परभक्ति - परज्ञान - परमभक्ति रूपक्रमवती प्रपत्त्यङ्गकाच । साद्विविधा साधनभक्तिफलभक्ति भेदात् । उक्तसाधनजन्यासाधन भक्तिः । ईश्वरादिकृपामात्रजन्यातु फलभक्तिः । प्रपत्तेः फलतया नित्यानुभाव्यतयावर्तमाना फलभक्तिरेव परांकुशनाथ - यामुन - यतिवरादिभिः सम्प्रदाये प्रवर्तिता । स्तुति नमस्कारादिषु च भक्तिशब्दप्रयोगः औपचारिकः ।

ध्यानशब्दवाच्या भक्तिः उपनिषत्प्रतिपादित विद्या भेदात् बहुविधा । सद्विद्या - दहरविद्या - भूमविद्या - शांडिल्यविद्या पुरुषविद्या - वैश्वानरविद्या - परविद्या - न्यासविद्या - इत्यादिः भेदः । तत्र न्यासविद्यैव प्रपत्तिः ।

अनन्यसाध्ये स्वाभिष्टे महाविश्वासपूर्वकम्

तदेको पायतायाश्च प्रपुत्तिःशरणागतिः ॥ इति ॥

भरतमुनिना सामान्यलक्षणं प्रपत्तेरुक्तम् ।

आनुकूल्यस्य संकल्पः प्रतिकूल्यस्य वर्जनम् ।

रक्षिष्यतीति विश्वासः गोमृत्व वरणं तथा ॥

आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिः ॥

इति षडष्टवती प्रपत्तिः यथो योगं अनुष्ठेया ।

एतद्देहावसान एव मोक्षप्रदातृसकृत् कर्तव्या ज्ञानविशेषरूपा गुरुमुखात् रहस्य शास्त्रेषु सम्प्रदायतया वेदितव्या ।

अणुत्वेसति ज्ञानाश्रयत्वं, स्वव्यधिकरण संकल्पजन्य कृतिमत्त्वं च जीवात्मनः लक्षणम्। विभुत्वे सति चेतनत्वं परमात्मानः लक्षणम् । जीव स्वरुप - स्थिति - प्रतृत्तिभेदानां परमात्म संकल्पाधीनत्वात् परमात्मशरीरभूतस्य स्वस्य जीवात्मनः स्वान्य स्वान्तर्यामि परमात्मसंकल्पाधीन कृतिमत्वात् परमात्मानं प्रति प्रारतंत्र्यमेव स्वरूपसामान्यम्। ज्ञानाश्रयत्वं तु स्वरुप विशेषः । अणुत्वं च स्वरूपधर्मः ॥

एषोऽणुरात्मा चेतसा वेदितव्यः

बुद्धेर्गुणेनात्मगुणेन चैव हि -

आराग्रमात्रो ह्यवरोऽपि दृष्टः

अत्र बुद्धेः विभुत्वयोग्यत्वेऽपि कर्मणा संकुचितत्वात् मलरुद्धमणिप्रभावत् आश्रयतुल्यपरिमाणोपपत्तिः । आत्मनः एकशरीरस्थत्वेऽपि धर्मभूतज्ञानस्य मणि प्रभान्यायेन अनेकशरीरेषु प्रसरणोपपत्तिः । निरात्मकेषु शरीरेषु धर्मभूतज्ञानव्याप्त्यैव सुख दुःखाद्यनुभवोपपत्तिः। सुषुप्त्याद्यवस्थास्वपि शरीरधारणार्थं निरात्मक शरीरेष्विव धर्मभूतज्ञानसंयोगाभ्युपगमात् विषयतारुप विजातीय संयोगस्यैव तदानीम् अस्वीकारात् शरीरिधारणोपपत्तिः ।

धर्मभूतज्ञान संकोचविकासद्योरेव शरीरशोषणाशोषणा प्रयोजकत्वं ॥ अस्य सोम्य। महतो वृक्षस्य यदेकां शाखां जीवो जहाति अथ सा शुष्यति इति श्रुति

सिद्धम् । शाखादौ भोगावच्छेदकता प्रयोजकादृष्टनाशाधीन - धर्मभूतज्ञान विभागानुकूलव्यापारस्यैव जहात्यर्थत्वात् इदं उपपन्नम् ।

सौभरिप्रभृतीनां कायव्यूहेषु एक एव कायः जीवात्मवान् अन्ये धर्मभूतज्ञान संयोगविशेषवन्तः। परकाये प्रवेशं विनापि योगिप्रभृतीनां एवं प्रवृत्तिः उपपद्यते। परमात्मनस्तु स्वरूपव्याप्त्या संकल्पव्याप्त्या च उभयथाऽपि कायव्यूहः उपपद्यते। यथा षोडश सहस्रगोपस्त्रीणां उपयोगाय कायव्यूहःस श्रीकृष्णस्य ।

अथ : -

'विज्ञातारमरे ! केन विजानीयात्' - 'जानात्येवायम् पुरुषः' इत्यादि श्रुत्या ज्ञानाश्रयत्वस्य सिद्धिः । 'विज्ञानं यज्ञं तनुते' 'यो विज्ञानेविष्ठान्' इत्यादिना ज्ञानाश्रयपरत्वे पौनरु क्त्यापत्त्या ज्ञानस्वरूपत्वपरत्वावश्यकतया ज्ञानस्वरूपत्व-सिद्धिः ।। एवं ज्ञानस्वरूपस्य धर्मिणः जीवात्मनः ज्ञातृत्वमपि स्वरूपमिति श्रुतिसिद्धार्थात् ज्ञानं नाम चैतन्यं आत्म पदार्थस्य स्वरूपगुणः इति सिद्धम्।

वेदान्तशास्त्रे परमसायुज्यमोक्षारभ्य परमपुरुषार्थस्यैव उद्देश्यत्वात् जीवस्य चैतन्योपज्ञानपरिणामेषु भक्तिः प्रपत्तिरिति परिणामद्वयं शास्त्रीयं सांप्रदायिकं च उपायतया विधेयं अङ्गीकृतम् । अत्र उद्देश्य विधेय तदाश्रयता परमात्माधीनत्वात् परमात्मानुग्रह एव मोक्षोपायः । अनुग्रहस्य ज्ञानरुपत्वात् तदाश्रयस्य परमात्मन एव जीवमोक्षकार्ये सिद्धोपायत्वं च अङ्गीकृतम् ।।

तथाचोक्तं वादिकेसरिणा सौम्यनुमातृमुनिना तत्त्वदीपग्रन्थे : -

अयं जीवात्मा स्वयम् नित्य-निर्मल - ज्ञानाद्वैकस्वरूपः, स्वाभाविक - ज्ञातृत्व-कर्तृत्व - भोक्तृत्व -, स्वरुपधर्मः, भगवदायत्त - स्वरुप-स्थिति - प्रवृत्तिकतया तच्छरीरत्वेन तदनन्यार्हरोषत्वादिरुप स्वासाधारणाकारः, सर्व प्रकार तत्पारतंत्र्य प्रयुक्त-तद्दास्यैकरसः, तदनुजनित-निरवधिकातिशय - नित्यानन्दयोगयोग्योऽपि; गुण त्रयात्मिकया क्षणक्षणस्वभावया तमः प्रकृति + अनृत + अविद्याद्यपरनामधेयया अनाकलितमूल - सम्बन्धया मिलतैल दारुवन्हिवत् दुर्विवेचं अभिव्याप्तया

दुरत्ययभगवन्मायया तिरोहित स्वप्रकाशः, अनाद्यज्ञानान्धतया अन्यथाज्ञान - विपरीतज्ञानयुक्तः तत्कृतरागद्वेषादि दूषितः, तदुचितानि विधिनिषेध विषयाणि कर्माणि कुर्वाणः, तदनुगुणवासनावासितः, तद्बलसंवर्धित विशृङ्खल विपरीतरुचिः, तदुपचित पुण्य पापरूपाणादिकर्मसन्तानकृत - ब्रह्मादि स्तम्बपर्यन्त - सुरनरतिर्यक् - स्थावरात्मक - चतुर्विध शरीरप्रवेशविवशः, तत्तद्देहात्माभिमान जनित - अवर्जनीय तापत्रयाभिभूतः गर्भ - जन्म - बाल्य - यौवन - वार्धक - मरण - नरकादि - समस्तावस्थासु निरन्तर-वितत - विविध - निरवधिक - दुःखपरिपूर्णो वर्तते ॥

एवं परस्पर-कार्यकारणभूताविद्या - कर्म - वासना - रुचिप्रकृतिसम्बन्धरुप संसारचक्रमापन्न अनवधिक दुःखजालव्याकुलं आत्मानं अवलोक्य; परमकारुणिको भगवान् अपरिमितसौहार्दस्वभावत्वात् अव्याजरूपां कृपांतनोति ॥ इति ॥

तेषामेवानुकम्पार्थं अहं अज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥
तेषाम् सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन माम् उपयान्ति ते ॥

इति च भगवता जगद्गुरुणा श्रीकृष्णेन परमात्मनैव गीतम् ।

एवं करुणारूपं परमात्मचैतन्यं परमशक्तिरुपं जीवचैतन्यं च विशिष्टाद्वैतनाम्ना संकेतिते परमवैदिक सिद्धान्तनाम्नि वेदान्तशास्त्रे धर्मार्थकाममोक्षाख्य पुरुषार्थ चतुष्टयस्यापि साधकं इति शम् ।

# काव्यशास्त्रीयचिन्तनेचैतन्यम्

प्रो. मिश्रो ऽभिराजराजेन्द्रः

अथाती चैतन्यजिज्ञासा । किमिदं चैतन्मं नाम ? चित् धातोर्ल्युटि प्रत्यये कृते चेतनविशेषणपदं सिध्यति । पुंसि प्रयुक्तोऽयमेव शब्दो जीवात्मवाचकः परमात्मवाचको मनोवाचको वा सन्दृश्यते । चेतनाशब्दोऽपि बुद्धिविवेक प्राणबोध संज्ञाधारणाजीवनादिसन्दर्भेषु भूयोभूयस्सम्प्रयुक्तश्चित् धातोर्युचि प्रत्यये कृते टाबन्तो निष्पद्यते। एवमेव मनःपर्यायभूतश्चेतश्शब्दोऽपि चिध्दातोरसुनि प्रत्यये विहिते सिध्यति। चेतनशब्दादेव ष्यञि प्रत्यये कृते निष्पद्यते चैतन्यं यत्रवलु भारतीयदर्शनवाङ्मये परमात्मवाचकम् ।

द्वादशशाखं भारतीयदर्शनमित्यपि सुविदितचरं सर्वेषाम् । तत्र पुर्वमीमांसोत्तरमीमां-सासांख्ययोग न्यायवैशेषिकपदवाच्यानि षडास्तिकपदवीमारूढानि वेदप्रामाण्यवन्ति । एवमेव लौकायतिकार्हतसौगतपदवाच्वानि त्रीणि नास्तिकानि वेदप्रामाण्यमनङ्गीकरणत्वात्। सौगतदर्शनं तावन्माध्यमिक - विज्ञानवादिवैभाषिकसौत्रान्तिकाख्यचतुश्शारवतया चार्वाकजैनदर्शनाभ्यां सहकृतः षट्शाखतामुपगच्छति । तदेवं द्वादशत्वं भारतीयदर्शनस्य । सर्वेष्वप्येषु दर्शनेषु चैतन्यप्रसङ्गः पदे - पदे सन्दृश्यते । नाऽत्रावसरस्तेषाम् समुपबृंहणस्य, तथापि साकल्येन वक्तुमेवं शक्यते यच्चैतन्यमेव भारतीयदार्शनिकचिन्तनस्य मेरुदण्डः ।

प्रकृतमनुसरामस्तावत् । दर्शनप्रकृतिकश्चैतन्यशब्दोऽसौ कथं काव्यशास्त्रीयचिन्तनेऽन्तः प्रविष्टः ? प्रश्नोऽयं विवृतिसापेक्षः । अस्यैव प्रश्नस्य समाधानमवाप्यते भर्तृहरिप्रणीते वाक्यपपदीये । वाक्यपदीयकारो भगवान् भर्तृहरिः शब्दब्रह्मावधारणां स्फुटीकुर्वन् कथयति -

त्र्प्रनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।

विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥

अनया कारिकया व्याख्यातं भवति भर्तृहरिमतम् । दर्शने यत् स्वरुपं परब्रह्म, व्याकरणदर्शनेऽत्र तत्स्वरूपमेव शब्दब्रह्म । शब्दतत्त्वमक्षराख्यमिदं ब्रह्माऽप्यनादिनिधनम् । यथा वेदान्तनिरुपितं ब्रह्म चतुर्विधसृष्टिभावेन विवर्तते सगुणीभूय तथैव शब्दब्रह्मेदं वाङ्मयेऽर्थ भावेन विवर्तते । अस्मादेव शब्दब्रह्मणो जगतः प्रक्रिया प्रारभते । वाङ्मयी सृष्टिः शब्दब्रह्मण एव प्रवर्तते ।

येयं पिण्डजाण्डजस्वेदजोद्भिज्जमयी सृष्टिः परितोऽवलोक्यते, क्षणभङ्गुराऽसौ । सर्वेऽपि प्राणिनः परिमितवर्षायुष्यजीविनः । शतवर्षीयं मानवजीवनम् । विंशतिवर्षीयं वृषभादिपशूनां जीवनम् । घुणयूकालिक्षादयस्तु कतिपयदिवसमात्रजीविनः । नितरां जलसिक्तान्यपि ब्रीहियवगोधूमादीनि त्रिभिश्चतुर्भिर्वा मासैः स्वयमेव कृषिक्षेत्रे परिशुष्यन्त्येव । एवं हि, नाऽत्रजगति किमपि वस्तु स्थिरजीवितं स्थिरायतिकं वा । किञ्च निखिलोऽपि संसारः पाञ्चभौतिकः समायाते युगान्तकाले विनश्यति करकाकल्पः ।

एवं हि क्षणभङ्गुरा भौतिकी सृष्टिः । एवम्भूतेऽपि, तस्याः सृष्टेर्यद्वाङ्मयं रूपं तदक्षतं तिष्ठति । अमृतं न केनापि मानवेन दृष्टं निपीतं वा । तथापि तस्यास्तित्वमस्माभिः सर्वैरङ्गीक्रियते । कामं लोकेऽमृतस्य भूतरूपं नोपलभ्येत परन्तु तस्य वाङ्मयं रूपन्तु वर्तत एव । तदक्षतं तिष्ठति । अमृतस्वादोऽप्यना-स्वादितत्वात्तस्य कामं मानवैर्ज्ञायेत नाम, परन्तु पानकादिजगल्लभ्यपे-यास्वादाऽतिशायित्वं तस्य तु सर्वैरेव स्वीक्रियते । केचित्साधकास्तु समाधिजन्यानन्देन, केचिद्रतिसौख्येन, केचिच्च काव्यानन्देन तममृतस्वादं तुलयितुं बद्धपरिकराः परिलक्ष्यन्ते । एवं हि अननुभूतोऽप्यमृतास्वादोऽनुभूत इवाभाति ।

अस्मादक्षरब्रह्मण एव प्रारभते काव्यशास्त्रीयं चिन्तनम् । क्व व्याकरणं शब्दव्याकृतिसम्बद्धशास्त्रं क्व च ललितोचितरससन्निवेशमधुरं काव्यं तस्य शास्त्रं वेति सम्भवति विचिकित्सा केषाञ्चिदतत्त्वविदाम् । परन्तु सन्दर्भेऽस्मिन्

तादृङ्मनोभिस्सन्दिहानैर्ध्वनि-कारस्याचार्यानन्दवर्धनस्य स्थापनेयं स्मृतिपथमानेयायत् प्रथमे हि विद्वांसो वय्याकरणा-व्याकरणमूलत्वात्सर्व-विद्यानाम् इति (ध्वन्यालोके प्रथमोद्योते वृत्तिगतं वाक्यम्) ध्वनिकारमन्तव्यमिदं नाऽप्रामाणिकं यतो हि अभिधादि शब्दशक्तयः, कोमलादिवृत्तयः स्फोटादि सिद्धान्ताः सर्वेऽपि व्याकरणविवेच्यतां निर्वहन्ति ।

एकतस्तु ध्वनिकारो व्याकरणमूलत्वं निर्दिशति सर्वविद्यानामपरतस्तु काव्यमीमांसाकारो राजशेखरः स्फुटं भणति चतुर्दशविद्यास्थानं विवृण्वानः सकलविद्यास्थानैकायतनं पञ्चदशं काव्यं विद्यास्थानम् इति यायावरीय इति । अनेन एतदुक्तं भवति यद् व्याकरणमिव काव्यमपि सर्वविद्योपकारकम् । अतएव व्याकरणकाव्ययोः समानं महत्त्वं प्रतिभाति विषयैकत्वञ्च । एवं सत्युभेऽपि मिथः समुपकारके परिपूरके चेत्यपि वक्तुं शक्यते ।

तदेव शब्द ब्रह्म व्याकरणशास्त्रस्य काव्यशास्त्रेऽपि रसरूपतया प्रतिष्ठितं वर्तते यत्रवलु चैतन्याधिष्ठानम् । तदेवाधिकृत्य कथयति वाक्यपदीयकारः -

इदमाद्यं पदस्थानं सिंद्धिसोपानपर्वणाम् ।
इयं सा मोक्षमार्गाणामजिह्मा राजपद्धतिः ॥
तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः ।
तस्य प्रवृत्तितत्त्वज्ञस्तद् ब्रह्मामृतमश्नुते ॥

काव्यान्तस्तत्त्वसमीक्षायां तदेव ब्रह्मामृतं रसत्वेन प्रतिष्ठितं यद्बृहद्व्यारव्यानं निबन्धेऽस्मिन् करिष्यते ।

सहृदयहृदयाह्लादि शब्दार्थमयत्वमेवकाव्यत्वलक्षणमित्यानन्दवर्धनो ध्वन्यालोकेऽभिव्यनक्ति । शब्दार्थयोर्नित्यसम्बन्धः । अनयोरेकतरः कश्चिदपि एकलः स्थातुंन प्रभवति । यथा वीचिर्जलं विना जलं वा वीचिंविना स्थातुं न प्रभवति तथैव शब्दार्थावपि समन्वितावविनाभावसम्बन्धेन । उभयोः शाश्वतिकं साहचर्यं मनसिकृत्वैवालाङ्कारिकैः काव्यं परिभाषितं शब्दार्थौ काव्यमिति ।

यद्यपि शब्दार्थौ उभयोरपि शब्दानुशासनकाव्यानुशासनयोः समानरूपेण विवेच्यविषयभूतौ । तथापि तत्र विवेकोऽयमङ्गीकरणीयो यत् व्याकरणे शब्दस्यैव प्राधान्यम् । व्याक्रियन्ते शब्दा अनेनेति व्याकरणम् । शब्दशुद्धिरेव व्याकरणस्य प्रधानं लक्ष्यम् । परन्तु काव्ये काव्यशस्त्रे वा ऽ र्थस्यैव प्राधान्यम् । शब्दप्रधानानि वेदशास्त्रादीनि । परन्त्वर्थप्रधानं काव्यम् । यावत्काव्यप्रयुक्तानां शब्दानां साधारणानामपि वाच्यार्थो लक्ष्यार्थो व्यङ्ग्यार्थो वा नाऽवगम्यते तावन्न का ऽपि सार्थकता श्रुतिगोचरीभूतानां शब्दानाम् । अतएवाऽमिप्राय एव मुख्यतया काव्यम् । तस्मादेव व्याकरणे सातिशयं श्रद्धानोऽपि पण्डितराजो जगन्नाथो न केवलं शब्दमेवापितु रमणीयार्थर्पतिपादकमेव शब्दं काव्यं मनुते ।

वस्तुतः पदं वाक्यम् अर्थश्चेति त्रितयमपि शास्त्र त्रयप्रवर्तकत्वेनोपतिष्ठते । तत्र पदं (अनिषपन्नावस्थायां तदेव प्रातिपदिकं शब्दो वाऽपि) पदार्थश्चेति द्वयं व्याकरणशास्त्रस्य विषयभूतम् । वाक्यमाकाङ्क्षासन्निधियोग्यतानिर्व्यूढं वाक्यार्थश्चेति द्वयं मीमांसाशास्त्रस्य विषयभूतम् । काव्यार्थश्च वाच्यलक्ष्यव्यङ्ग्यस्वरुपः काव्यशास्त्रस्य विवेच्यविषयभूतः । अर्थमात्रस्य काव्यत्वमनेनैव सिध्यति यदानन्दवर्धनः सिद्धेऽपि रसस्य काव्यात्मत्वे प्रतीयमानार्थमेव काव्यजीवितभूतं मन्यते । अनेन विशदीभवति तथ्यमिदं यद् ध्वन्यालोककारः अर्थस्वरूपस्य काव्यस्यात्मानमपि कमपि विशिष्टकोटि-कमर्थमेवाङ्गीकरोति न पुनरलङ्कारं रीतिं रसं वा !

वस्तुतः समग्रमेव विश्वं शब्दमात्रस्य परिणामः । विश्वं नाम किम् ? मनुष्यः पक्षी पशुः घटः पटः कूपस्तडागोऽम्बुद इति लक्षकोट्ययुतनियुतार्बुदमिताः शब्दा एव विश्वं परिचाययन्ति । एभिश्शब्दैरेव विविधवस्तूनां बोधो भवति । अयं घट इत्युच्चारिते सति यज्ज्ञानमवाप्यते तज्ज्ञानं घटरूपवस्तुना सार्धं तादात्म्यमुपैति । एवं सत्येव घटोऽयमित्युच्चारणेन घटरूपस्य पदार्थस्य बोधो जायते । तदित्थं पदार्थ - पदार्थबोधकशब्दयोश्च भवत्येव तादात्म्यम् । यद्येवं ना भविष्यत्तर्हि घटोऽयमित्युच्चारिते पटस्यापि ज्ञानं सम्भवेत् । परन्तु व्यवहारे नैतत्परिलक्ष्यते । अनेन

एतदुक्तं भवति यत्पदार्थः पदार्थज्ञानश्चेत्युभयमपि शब्दस्यैव परिणामो मिथस्तादात्म्यभावात् । किञ्च, यथा घटो घटज्ञानं वा शब्दस्य परिणामस्तथैव समग्रेयं सृष्टिः शब्दमात्रपरिणामभूता । तदेवोच्यते भर्तृहरिणा -

न सो ऽ स्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥
शब्दस्य परिणामोऽयंमित्याम्नायविदो विदुः ।
छन्दोभ्य एव प्रथममिदं विश्वं व्यवर्तत ॥

सौगता विज्ञानवादिनो ऽ पि स्थूलस्वरुपं जगतो ऽ नङ्गीकुर्वाणा तस्य विज्ञानमात्रं स्वीकुर्वन्ति । पाश्चात्यदार्शनिको बर्कलेनामा ऽ पि प्रत्ययमात्रं सत्यं मनुते । तदयं निर्गलितार्थो यत्समग्रो ऽ पि संसारः शब्दादेव प्रादुर्भवति, शब्देष्वेव प्रविलीयते । तथा च भगवान् भर्तृहरिः

ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम् ।
विवृतं सर्वमात्राभ्यस्तास्वेव प्रविलीयते ॥

भर्तृहरेरयमेव सिद्धान्तः संस्कृतकाव्यशास्त्रस्य मेरुदण्डभूतः । शब्दार्थशरीरस्य काव्यस्य, पुरुषशरीरस्य कटककुण्डलादिवत्, अनुप्रासादयो ऽ लङ्काराः । अवयवसंस्थानादिवद् वैदर्भीप्रभृतयो रीतयः । आत्महना रोगा इव श्रुतिकटुत्वादि दोषाः । शौर्यपराक्रमादिगुणा इव माधुर्यादयो गुणाः । निखिलसंहननाऽनुप्राणकात्मेव काव्यात्मभूतो रसः । स एव काव्यात्माऽलङ्कारो रीतिध्वनिवक्रोक्तिरौचित्यो वेति केचित् ।

तत्र रसस्य काव्यात्मत्वे न कस्यचिदप्याचार्यस्य विमतिः । ये रसवादिन आचार्याः कोहलनन्दिकेश्वरभरतादयस्ते तु रसं ब्रह्मानन्दसहोदरकल्पं महच्चैतन्याधिष्ठानभूतं काव्यात्मभूतं मन्यन्त एव । परन्तु ये काव्यात्मत्वाङ्गीकरणे सम्प्रदायान्तरवादिनस्ते ऽ पि रसस्यापरिहार्यत्वं काव्ये स्वीकुर्वन्त्येव । तथा च प्रतीहारेन्दुराजः काव्यालङ्कार-सारसंग्रहस्योद्भटप्रणीतस्यलघुवृत्तौ तन्मतमुद्धरति-

रसाद्यधिष्ठितं काव्यं जीवद्रूपतया यतः ।

कथ्यते तद्रसादीनां काव्यात्मत्वं व्यवस्थितम् ॥

उद्भटस्तावदलङ्कारपक्षधरस्तथापि रसस्य काव्यजीवातुभूततामसौ स्वीकरोत्येव । रसवदलङ्कारमाध्यमेन सर्वे ऽ प्यलङ्कारसम्प्रदायपक्षपातिन आचार्या रसस्य सत्तां स्व्यकुर्वन्। आचार्यभामहोऽकथयत् -

रसवद्दर्शितस्पष्टश्टङ्गारादिरसं यथा ।

काव्यादर्शकारो दण्डयपि प्रतिपादितवान् -

इह त्वष्टरसायत्ता रसवत्ता स्मृता गिराम् ।

मधुरं रसवद् वाचि वस्तुन्यपि रसस्थितिः ॥

व्यक्तिविवेककारो महिमभट्टस्तु सकलमपि ध्वनिप्रपञ्चं अनुमाने ऽ न्तर्भावयितुं बद्धपरिकरः परिलक्ष्यते । अभिधामात्रसमर्थकः सन्नप्यसौ रसमाहात्म्याङ्गीकारप्रसङ्गे न मनागप्यौदासीन्यं भणते । तद्यथा,

काव्यस्मात्मनि संज्ञिनि रसादिसमेनकस्यचिद्विमतिः

वस्तुतः काव्यात्मत्वसम्बद्धानां समेषां तत्त्वानां रस एवान्तः - पातिता समवलोक्यते। अलङ्कारध्वनेस्तु रसपर्यवसितत्वं स्वयमानन्दवर्धनोऽङ्गी करोति। उपकर्त्रों रसादीनामिति ब्रुवाणो विश्वनाथो रीतिमपि काव्यात्मभूतां रसनिष्पत्ति-सहायिनीमेव मनुते । ध्वनेस्तु प्रकृष्टतमरूपं रसध्वनिरेव । कुन्तकाभिमता प्रसिद्धाभिधानव्यतिरेकिणी विचित्रैवाभिधा वक्रोक्तिरपि रसचर्वणात्मकैवेति स्वयमाचार्यकुन्तको भणति । तद्यथा -

शब्दार्थौ सहितौ वक्रकविव्यापार शालिनि ।

बन्धे व्यवस्थिते काव्यं तद्विदाह्लादकारिणी ॥

कुन्तको महिमभट्टश्चोभावेव वैचित्र्यमात्रसिद्धिं वक्रोक्तिं प्रयोजनभूतां मन्येते। तच्चवैचित्र्यं केवलमाह्लादाय, केवलमानन्दाय रसप्रतीत्यर्थं वा । तदेवं वक्रोक्तेरपि

रसनिष्ठता प्रमाणिता तिष्ठति । तद्यथा -

लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धये ।
काव्यस्यायमलङ्कारः कोऽप्यपूर्वो विधीयते ॥ इति कुन्तकः ॥
प्रसिद्धं मार्गमुत्सृज्य यत्र वैचित्र्यसिद्धये ।
अन्यथैवोच्यते सोऽर्थः सा वक्रोक्तिरुदाहृता ॥ इति महिमभट्टः ।

अथाऽन्ते क्षेमेन्द्राभिमतम् औचित्यतत्त्वम् । तत्रापि अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम् । प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परेति कथयद्भिरानन्दवर्धनाचार्यैरौचित्यस्यापि रसान्तर्भावितत्वं समुदघोषितम् । ध्वनिकारमन्तव्यं विशदीकुर्वन् महामाहेश्वरोऽभिनवगुप्तपादो लोचनटीकाया-मुपन्यस्यति उचितशब्देन रसविषयमौचित्यं भवतीति दर्शयन् रसध्वनिजीवितत्वं सूचयति । तदभावे हि किमपेक्षया इदमौचित्यं नाम सर्वत्रोद्घोष्यते इति भावः (ध्वन्यालोकलोचनम् १.१)

एवं हि रसस्तु रस एव, सर्वाचार्यसमर्थितः काव्यात्मभूतः पदार्थः कश्चित्। अपरे काव्यात्मपदवीमारूढा अलङ्कार रीति - ध्वनि - वक्रोक्त्यौचित्यादयोऽपि रसगर्भ एव पर्यवसिता इति सप्रमाणं प्रदर्शितम् ।

स एव रसः काव्यस्यात्मा । आत्मत्वमण्डितत्वादेव रसस्य चैतन्या-धिष्ठानताऽपि स्पष्टीभवति । कथमिति चेत्सम्प्रति साङ्गोपाङ्गं सविस्तरञ्च निरूप्यते । सन्त्यनेके प्रश्ना अत्र । को ऽ यं रसो नाम ? किंस्वरूपो ऽ यं रसः ? कथञ्च रसस्यास्य काव्यात्मता ? कथं वा रसस्य ब्रह्मानन्दसहोदरत्वम् ? चैतन्येन वा सार्धं रसस्य कीदृक् सम्बन्धः ? इमे सर्वेऽपि प्रश्ना अलङ्कारशास्त्रे समाधानधिया निरूपिताः सन्ति ।

वस्तुतः रसशब्दोऽयं नेदम्प्रथमतया काव्यशास्त्रे प्रयुक्तोदृश्यते । ब्रह्मस्वरूपनिरूपणप्रसङ्गे श्रुतावेवास्य शब्दस्य प्रयोगो वर्तते । तद्यथा तैत्तिरीयोपनिषदि (३.६) प्रतिपादितम् -

रसो वै सः । रसं ह्येवायम् लब्ध्वाऽनन्दी भवति ।
एवम् हि रसस्वरूपं परब्रह्म । आनन्दस्वरुपम् वाऽदः ।

यतो हि रसास्वादनक्षणे रसिको विगलितवेद्यान्तरस्तिष्ठति तत एव रसस्वरुपं परबह्मेत्युक्तम् । ब्रह्माद्वैतसुखमनुभवन् साधकोऽपि निर्विकल्पकसमाधौ तमेव रसास्वादनस्थितिं भजते । रस्यते आस्वाद्यते इति रसः । इयं रसन-प्रक्रियाऽत्यन्तमेव विलक्षणा भवति । अस्यां रसनप्रक्रियायां चर्वणापरसंज्ञायां तदाकाराकारित चित्तवृत्तिर्जायते । ज्ञातृज्ञेयज्ञानानां त्रयाणां पार्थक्यमेव तत्र विनश्यति । अन्येषु अनुभवेषु ज्ञानसन्दर्भेषु वा नेयं स्थितिः । सर्वोऽप्यनुभवः सविकल्पक एव भवति । अहं घटं वेद्मीत्यनुभवेऽहं ज्ञाता, घटो ज्ञेयं, घटं वेद्मीति ज्ञानम् । परन्तु एतत् त्रितयमपि घटज्ञानप्रक्रियाया पृथक्त्वेन तिष्ठति । परन्तु, अहं ब्रह्मास्मीत्यनुभवे तत् त्रितयमपि पृथक्त्वरहितं सत् ब्रह्मरूपतामेवोपैति । सर्वथा तथैव रसचर्वणा दशायामपि चैतन्यस्य सत्त्वोद्रेकवशात् सर्वमपि पार्थक्यं विनश्यति, कश्चिदखण्डावबोधश्च समुज्जृम्भते । यथा पानकरसः एलालवङ्ग मरिचशर्करादिसाधितः विविधास्वादसहकृतः सन्नपि पीयमानो विलक्षणमेव कमपि स्वादमेलालवङ्गा-दिस्वादव्यतिरिक्तं समुपायनीकुरुते तथैव रसोऽपि, निजावयवास्वादव्यतिरिक्तं कमपि विलक्षणं स्वादमाहात्म्यं वा जनयति!

तत्किं रसोऽप्ययं संघटकैयुक्तम् ? ओमिति ब्रूमः । नाट्यशास्त्रकारो भरताचार्यस्समाधत्ते प्रश्नमिमम् -

नहि रसादृते कश्चिदर्थः प्रवर्तते । तत्र
विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः ।

इदमेव रसप्रतिष्ठापनाविषयकं भरतस्य रससूत्रम् । भरतो भणति यदस्माकं हृदये तिष्ठन्ति चित्तवृत्तयः । इमा यद्यप्याशुविनाशिन्यस्तथापि वासनारूपत्वात् सुक्ष्मरूपतया च सततविद्यमानत्वात् स्थायिभावमुपमान्तीमाः । आचार्यो ऽ नान्तदाक्षः साहित्यदर्पणकृत्तनयो ऽ मिधत्ते -

वासनाऽनादिकालीना याऽसौ हृदि सचेतसाम् ।
स्वसामग्रीं समासाद्य व्यक्ता सैतिरसात्मताम् ॥

आचार्यमम्मटस्तु स्थायिभावानिमान् अविच्छिन्नप्रवाहपदवाच्यान् मन्यते। ननु स्वसामग्रीं समासाद्येत्युक्तम् । तत्काऽसौ सामग्री ? तदेव व्यारव्यायते नाट्यशास्त्रकारेण रससूत्रमाध्यमेन । असौ स्थायिभावो रति हासशोकादिनवसंख्यः स्वसामग्रीं विभावानुभावव्यभिचारिभावाख्यां समासाद्य व्यक्तीभूय रसात्मतामेति। एवं हि सततविद्यमानत्वमविच्छिन्नत्वञ्चेति वैशिष्ट्यद्वयं स्थायिभावस्य । स्थायिभावा इमे न जातु विरुद्धभावैरभिभूयन्ते ऽ पितु विरुद्धभावानेवात्मरूपतां नयन्ति । क्षारं जलं सागरस्य नदीनां जलराशिभिर्यथा मदत्वमानेतुमशक्यं परन्तु क्षारजलेन सागरस्य स्वयमपि क्षारीभवितुं शक्यम् । सैव स्थितिः स्थायि-भावानाम् । यथा ऽ ह दशरूपककारः,

विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः ।
आत्मभावं नयत्यन्यात् स स्थायी लवणाकरः ॥

स्रक्सूत्रवृत्त्या स्थायिभावा इमे ऽ न्येषां भावानामनुगामुका भवन्ति । आचार्यप्रवरो भोजदेवः स्थायिगुणान् साकल्येन पुरस्कुरुते -

स्रक्सूत्रवृत्त्या भावानामन्येषामनुगामुकाः ।
न तिरोधीयते स्थायी तैरसौ पुष्यते परम् ॥
चिरं चित्तेऽवतिष्ठन्ते सम्वध्यन्ते ऽ नुबन्धिभिः ।
रसत्वं ये प्रपद्यन्ते प्रसिद्धाः स्थायिनो ऽ त्र ते ॥

एवं हि स्थायिभावो ऽ क्षीणवासनाजन्यश्चैतन्यांश एव । अयमेव स्थायिभावो विभावानुभावव्यभिचारि संयोगाद्रसीभूय निष्पद्यत । तत्र

ज्ञायमानतया तत्र विभावो भावपोषकृत् ।
आलम्बनोद्दीपनत्वप्रभेदेन स च द्विधा ॥
अनुभावो विकारस्तु भावसंसूचनात्मकः ।
विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः ।
स्थायिन्युन्मग्ननिर्मग्ना कत्त्लोला इव वारिधौ ॥

विभावानुभावव्यमिचारिभावेभ्यो व्यतिरिक्ताः सात्त्विकभावा अपि भवन्ति

केचन । ऋप्रवहितं मनस्सत्त्वमित्युच्यते । तत्प्रयोजनं हेतुरस्येति सात्त्विकभावः । रामादीनामनुकार्याणां सुखदुःखाभ्यां सहृदयानां हृदयानि भावयन्त्वेते सात्त्विका भावाः । एते निसर्गत एव भवन्ति दुर्वाराः । यदुक्तमाचार्यैः,

पृथग्भावा भवन्त्यन्येऽ भावत्वेऽपि सात्त्विकाः ।
सत्त्वादेव समुत्पत्तेस्तच्च तद्भावभावनम् ॥

तदयं नाम रसस्यपरिवारः । स्थायिनो रत्यादेविर्भावाः कारणभूताः, अनुभावाः कार्यभूताः, व्यभिचारिभावाश्च सहकरिभूता । एभिरेव संघटके र्विभावाद्यैः पुष्टः स्थायिभावो रसरुपेण निष्पन्नी भवति । यथाऽन्धकारावृतो घटो दीपप्रकाशे व्यक्तो भवति न तथा रसो ऽ पूर्वसिद्धत्वात् । वस्तुतो रुपान्तरपरिणतो भवति रसो दध्यादिन्यायेन । यथा दुग्धंमम्लसाहाय्येन दधिरुपेण परिणमति तथैव स्थायिभावो ऽ पि रसरुपेण परिणमति ।

चैतन्याधिष्ठानभूतस्य रसस्य प्रतीतिर्भवतीति कथनमपि वस्तुत उपचारमात्रम्। अन्यथा स्वयमेव रसो विभावादीनां सिद्धावस्था भवति, नपुनस्साध्यावस्था, यथा परिपक्वमेव तण्डुलजातमोदनं भवति तथापि ओदनंपचतीति व्यवहारे कथ्यते, तथैव रसस्य प्रतीतिर्भवतीत्यपि व्यवहारो ऽ वधेयः । तथा चा ऽ नान्तदासः - न खल्वोदनः पूर्वसिद्धो व्यज्यते किन्तु पक्वस्सन् ओदनो भवतीति । तथा ऽ यमपि व्यक्तस्सन् रसो भवतीत्यर्थः ।

किंस्वरूपो ऽ यं रस इत्याचष्टे साहित्यदर्पणकारः

सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः ।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः ॥
लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमातृभिः ।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः ॥

तदेवं काव्यात्मभूतो रसः सत्त्वोद्रेकात् अरवण्डः स्वप्रकाशः ऋानन्दचिन्मयो वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः लोकोत्तरचमत्कारप्राणश्च भवति । सत्त्वोद्रेकस्य

को ऽ भिप्रायः ? रजस्तमोभ्यामस्पृष्टं मनः सत्त्वमिहोच्यते । अतएव रजस्तमसी अभिभूय तादृग्गुणविशिष्टस्य चित्तस्याविर्भाव एव सत्त्वोद्रेकइत्युच्यते। अरवण्डपदेन पानकरसन्यायेन रसस्याखण्डावबोध; कश्चिद् गृह्यते । रसास्वादे न तावदङ्गभूतानां विभावादीनां पृथक् स्वादः कश्चनानुभूंयते । उताहो समग्रस्यापि रसस्य विलक्षण एव कश्चिदखण्डाऽनुभवो ऽ वाप्यते। चिन्मय इत्यत्र स्वरूपो विस्मया ऽ परपर्यायः, स एव प्राणो यस्य सः । अनेन चित्तविस्तृति-क्षमत्वं सिध्यति रसस्य । अस्मिन् सन्दर्भे समुद्धरति साहित्यदर्पणकारो गोष्ठीगरिष्ठ-विपण्डितमुख्यस्य स्ववृद्धप्रपितामहस्य श्रीमन्नारायणपादस्य मतम्-

रसे सारश्चमत्कारः सर्वत्रा ऽ प्यनुभूयते ।
तच्चमत्कारसारत्वे सर्वत्राऽप्यद्भुतो रसः ॥

एवं हि विभावानुभावसञ्चारिसहकृतो रस आस्वाद्यते । त्रास्वादनं नाम रजस्तमोभ्यां विनिर्मुक्तस्य चित्तस्य सत्त्वप्रवणस्योद्रिक्तिः । यावद्रजस्तमो ऽ भिभूतं सत्त्वं क्वतावदानन्दा ऽ नुभवः ? क्वतावच्चित्तविस्तारः ? क्व तावद्-वेद्यान्तर-स्पर्शशून्यता? क्व तावत्स्वप्रकाशत्वं चिन्मयत्वं वा ? वस्तुतः सत्त्वोद्रेके जात एव मनोमुकुरो रसिकानां विशदो जायते । मनोमुकुरे विशदीभूत एव साधारणीकरणमहिम्ना ऽ साधारणमपि दुःखं सुखं वाऽन्येषां स्वकीयमिव प्रतीयते। एतत्सर्वमपि चैतन्यमात्रस्य समुज्जृम्भणम् । विशदीभूतचैतन्य एव जनस्यहृदयपदवाव्य इति महामाहेश्वर आचार्योऽ भिनवगुप्तपादः

एषां काव्यानुशीलनाभ्यासवशाद् विशदीभूते मनोमुकुरे वर्णनीयतन्मयी-भवनयोग्यता ते हृदयसंवादभाजस्सहृदयाः (लोचनम्)

त्रात्मानन्दसमुद्भव एव रसास्वाद इत्याचार्याः । वस्तुतस्तु आस्वाद एव रसो नाऽन्यत्किं चित् । यथा पूर्वमुक्तम्मया यत् रसस्यास्वादाऽनतिरिक्तत्वं यत् रसस्यस्वादोऽवाप्यते रसश्चर्व्यत इत्येवमादिका अभिव्यक्तयस्तु काल्पनिक्य एव। य आत्मानन्दानुभवरूपास्वादरस एव रसः । अत एव रसस्यास्वादा अनतिरिक्तत्वं सर्वथा

सिद्धम् । यथोद्धृतं साहित्यदर्पणकारेण - रस्यमानतामात्रसारत्वा-त्प्रकाशशरीरादनन्य एव हि रसः ।

मनस्तावत् त्रिगुणात्मकम् । यदा तस्मिन् सत्त्वांशस्य प्रकाशो जायते रजस्तमस्यभिभूय तदैव प्रभवति सुखोत्पत्तिः, आनन्दातिरेको वा । परन्त्वयमेव सत्त्वांशो रजस्तमोभ्यामभिभूतस्सन् वैषयिकं सुखं जनयति । प्रकाशानन्दमयत्वादेव रस त्र्प्रानन्दात्मिका संविद सृजति यस्मिञ्जायते वेद्यान्तरस्पर्शशून्यता । ब्रह्मास्वादसहोदरोऽयं रसो न पुनस्साक्षात् ब्रह्मास्वाद एव । कस्मात् ? यतो हि ब्रह्मानुभूतिर्भवति निर्विकल्पा निरवधिश्च । रसानुभूतिस्तावद् विभावादि जीवितावधिस्सविकल्पा च भवतीति विशेषः। किञ्च, प्राक्तनजन्मानुगतवासनानां परिपाकावस्थैव भवति रसावस्थाऽतएव न परमार्थतः क्षीयन्ते वासना अस्यामवस्थायामपि । ता अक्षतास्तिष्ठन्ति यथाकथञ्चित् परन्तु ब्रह्मीभावे वासना इमाः सर्वथा लयमुपयान्ति । रसास्वादस्य सविकल्पताया इदमेव तावद्रहस्यम् । स्वाकारवदभिन्नोऽप्ययंरसः । यथा विज्ञानवादिनस्सौगतदार्शनिका ज्ञानस्वरूपं तदभिन्नं बाह्यजगच्च यद्यप्येकमेव मन्यन्ते तथापि बाह्यजगद् ज्ञेयसंज्ञयाऽ वबोध्यते तथैव रसास्वादयोरभिन्नत्वेऽपि रस आस्वाद्यत इत्युपचारतः कथ्यते । अन्यथा यो रसस्स एवाकाराऽभिन्नो भवतीति वा । एवं हि यथा शिरोमात्रस्वरुपस्य राहोः प्रसङ्गे राहोः शिर इत्यौपचारिक प्रयोगो विधीयते तथैवाऽस्वादमात्ररुपस्य रसस्यापि प्रसङ्गे रसस्यास्वादो रसस्य प्रतीतिरित्येवं समुच्यते ।

भवतु नाम । रसः कथमास्वाद्यते ? तस्मिन् आस्वादे खलु चैतन्यस्य का भूमिकेति सम्प्रति निरुप्यते । इदन्तु सुविदितचरं समेषां विपश्चि च्चुञ्चूनां यन्मीमांसको लोल्लटो रसस्योत्पत्तिं नैयायिकश्शङ्कुको रसस्यानुमितिं, सांख्यमतानुगो भट्टनायकस्तद्भुक्तिं, महामाहेश्वरोऽभिनवगुप्तश्च रसस्याभिव्यक्तिं स्वीकुर्वन्ति । तन्निखिलोऽपि सन्दर्भः परिहीयतेऽत्र काव्यशास्त्रीयग्रन्थोप-निबद्धत्वात् चैतन्यमात्रव्याचिरव्यासुत्वाच्च ।

स्वाकारादभिन्नो रस इत्युपर्युक्तम् । परन्तु प्रतिपन्नेऽसत्यस्मिन् स्वाकारवादे इदमपि

स्पष्टं जायते यत् रस्यमानतामात्रसारत्वात् रसो ऽ यं ना ऽ परं किञ्चिदपितु संविन्मात्रम्, ज्ञानमात्रम् । परन्तु ज्ञानन्तु सदैव स्वविषयाद् भिन्नं दृश्यते यथा घटज्ञानं घटात् । रसो यदि ज्ञानमात्रं तर्हि स एव रसो ज्ञानविषयतामपि कथमुपपद्यत? यथा ऽ हमहेश्वरस्तर्कालङ्कारः

स्वाकारवादे हि विषयो ज्ञानाभिन्नो ज्ञानस्याकार एवेति ।

सम्प्रत्युच्यते । हेतुस्तावद् द्विविधः कारको ज्ञापकश्चेति ।

असिद्धं वस्तु यो निष्पादयति स हेतुः कारको यथा दण्डचक्रादयो घटस्य । घटस्तु पूर्वतो ऽ सिद्धो ऽ विद्यमानो वा । तं घटं घटयन्ति दण्डचक्रादयः । पूर्वतः सिद्धमपि पदार्थं यो ज्ञापयति स खलूच्यते ज्ञापकहेतुर्व्यञ्जकहेतुर्वा, यथा दीपो घटस्य । घटस्तु पूर्वत एव कक्षे विद्यमानः । दीपस्तावदन्धकारवृतं तं पूर्वस्थितं घटं केवलं ज्ञापयति । अत्रापि व्यञ्जकस्य दीपस्य व्यंग्यस्य घटस्य च पार्थक्यं सर्वथा स्पष्टम् । परन्तु यदि रसः संविन्मात्रमङ्गीक्रियते तदाक्व तिष्ठति तस्य व्यङ्ग्यता? क्व सम्भवति तस्य व्यञ्जनाविषयत्वम्?

अस्याः समस्यायाः समाधानं प्रस्तुवता साहित्यदर्पणकृता समुच्यते यद्रसो ऽ यं कृतिज्ञप्तिविलक्षणः कश्चिदन्य एव स्वदनव्यापरः नायं व्यापारः कथमपि लौकिकः । स्वसंवेदनमात्रविषयत्वात् न वर्तते रसे ऽ स्मिन् विषयान्तरसम्पर्कः सम्भवति स यथा लौकिकज्ञाने । योगजप्रत्यक्षसन्निभो ना ऽ यं रसः साधननिरपेक्षो ऽ पि, विभावादिसाधनापेक्षित्वात् । एवं हि सर्वतोदृष्ट्या ऽ पि रसो ऽ यमलौकिक एव प्रतिभाति ।

स चा ऽ लौकिको रसः पुर इव परिस्फुरन्, हृदयमिव प्रविशन् सर्वाङ्गीणमिवाऽलिङ्गन्, अन्यत्सर्वमिव तिरोदधत् ब्रह्मास्वादमिवानुभावयन्तभिव्यज्यते । वाग्देवतावतारो मम्मटो ऽ प्यलौकिकचमत्कारकारिणं मनुते रसमिमम् । चमत्कारस्तु चित्तविस्तारः । चमत्कारस्तु विस्मयावहत्वम् । अस्मादेव चमत्कारमाहात्म्यात् करुणादावपि रसे सुखमेव जायते । अत्र सहृदयानामनुभव एव प्रमाणम् । तद्यथा साहित्यदर्पणकारः

करुणादावपि रसे जायते यत्परं सुखम् ।
सचेतसामनुभवः प्रमाणं तत्र केवलम् ॥
किञ्च तेषु यदा दुःखं न कोऽपि स्यात्तदुन्मुखः ।
तथा रामायणादीनां भविता दुःखहेतुता ॥

ह्लादैकमयी काव्यसृष्टिरिति मम्मटाचार्योऽपि । रसो भवत्येवाऽनन्दपर्यवसायी । शोकः श्लोकत्वमागतः (ध्वन्या. १.५) इति कारिकांशं विवृण्वन्नभिनवगुप्तपादोऽपि कथयति – न तु मुनेः शोक इति मन्तव्यम् । एवं हि सति तद्दुःखेन सोऽपि दुःखित इति कृत्वा रसस्यात्मतेति निरवकाशं भवेत् । नतु दुःखसन्तप्तस्यैषा दशेति (लोचनम्)

कस्मात्पुना रसानुभवोऽयमानन्दमात्रपर्यवसायीत्यपि विचारणीयः । दशरथमृत्युसन्दर्भं रावणापहृतसीताविलापसन्दर्भं जटायुप्राणव्यथासन्दर्भञ्चाधीत्य कथं न वयं दुःखिता भवामः । कथं वा तत्तत्सन्दर्भपरिशीलानान्ते त्र्प्रानन्दाश्रुपातमेदुराः सन्तोऽपि हार्दिकं कमपि विलक्षणपरितोषमात्रमनुभवामः? किं तद्दुःखं न दुःखम् । कस्मात्पुनस्तद् दुःख प्रच्छन्नसुखतामपयाति ।

उच्यते । तत्र कारणत्रयमुवरीवर्ति । कवेरानन्दमात्रनिसर्गस्तत्र प्रथमं कारणम् । रसचर्वणाया त्र्प्रानन्दमात्रपर्यवसायित्वं द्वितीयं कारणम् । साधारणी-करणञ्च तृतीयं कारणम् । त्र्प्रनेन कारणत्रयेणैव काव्यवर्णिताः शोकक्रोधनिर्वेद-भयादिभावा त्र्प्रानन्दसपत्नभूता अपि सुखरुपेणैवाऽनुभूयन्ते ।

तत्राऽद्यं कारणं कवेरात्मारामस्थितिः । प्रायेण सर्वेऽपि सांसारिका जना बुभुक्षित एव जायन्ते, जीवन्ति म्रियन्ते च । नेयं बुभुक्षा खाद्यपदार्थस्य ! बुभुक्षेयं तेषां रतेः शोकस्य स्थायिभावान्तराणां वा । तस्मादेव कारणादापतित एव रतिप्रसंगे ते रतिभावमास्वाद्याऽकण्ठं श्रृङ्गारमग्नाः सन्दृश्यन्ते । समायात एव मृत्युप्रसंगे तां मृत्युव्यथामाकण्ठं भुक्त्वा ते सोरस्ताडं सनभो विदारिचीत्कारं विलपन्ति । तांस्तान् भावांस्ते क्षुधार्ताः संसारिणो परमार्थत आत्मसात्कुर्वन्ति । परन्तु त्र्प्रात्मारामतया जीवन् कविराकण्ठपरितृप्त एव जायते, म्रियते च । न तस्य मनागपि रतेः, शोकस्य,

भयस्योत्साहस्य वा चिरवादिषा । तस्मान्नाऽसौ भावैरेभिरभिभूयते । शोकमुपवर्णयन्नपि न भवत्यसौ शोकसन्तप्तः । रतिं प्रस्तुवन्नप्यसौ न भवति रतिभान् । भयं प्रतिपादयन्नप्यसौ न मनागपि भयभीतः परिलक्ष्यते । वस्तुतो जन्मजन्मान्तरानुगतपरितोष निर्भरस्सन् कविः कमपि भावमनिगीर्य सद्यस्तं वमति । तद्वमनमेव समुच्यते काव्यमित्यहो वैलक्षण्यं कविकर्मणः ! यदाह हृदयदर्पणकारो भट्टनायकः

यावत्पूर्णो न चैतेन तावन्नैववमत्यमुम् इति । त्र्प्रथेदानीं द्वितीयं कारणं निरुप्यते यदस्ति रसस्यानन्दमात्रपर्यवसायित्वम् । वस्तुतो रसोद्रेके सति रजस्तमो ऽभिभावपुरस्सरं मनस्सत्त्वोपहितं जायते । तच्च सत्त्वं निसर्गत एव लघु प्रकाशकश्च भवति । अतएव सत्त्वे प्रसह्य समुदिते सति सर्वो ऽप्यनुभवस्सुखात्मक एव जायते चित्तस्य विस्तृतिवशात् । तथा चाह साहित्यदर्पणकारः -

ये खलु वनवासादयो लोके दुःखकारणानि इत्युच्यन्ते त एव हि काव्यनाट्यसमर्पिता अलौकिकविभावनव्यापारवत्तया कारणशब्दवाच्यतां विहाय लौकिकविभावशब्दवाच्यतां भजन्ते । तेभ्यश्च सुरते दन्तक्षतादिभ्य इव सुखमेव जायते । अतश्च लौकिकशोकहर्षादि-कारणेभ्यो लौकिकशोकहर्षादयो जायन्ते इति लोक एव प्रतिनियमः । काव्ये पुनः सर्वेभ्योऽपि विभावादिभ्यः सुखमेव जायते इति नियमान्न कश्चिद् दोषः । इति ।

आचार्यभट्टनायको ऽपि भगवती सरस्वतीं दिव्यमानन्दरसमेव प्रस्नुवानामङ्गी-कुर्वन्निगदति - वाग्धेनुर्दुग्ध एकं हि रसं यल्लाभतृष्णया ।

तेन नास्य समः स स्याद् दुह्यते योगिभिर्हि यः ॥

एवं हि सारस्वतसृष्टौ चैतन्यस्य नित्यानन्दस्वरूपत्वं प्रतिष्ठितं दृश्यते । न तत्रा ऽनन्दादृते कश्चिदन्यास्वादः ।

तृतीयमपि कारणं साधारणीकरणमिति । काव्यचेतनाया नित्यरसता साधारणीकरणादेव निश्चेतुं प्रत्यभिज्ञातुञ्च शक्या । तत्किमिदं साधारणीकरणं नाम ? तदुच्यते । असाधारणं साधारणं क्रियते ऽनेनेति साधारणीकरणम् (साधारण + कृञ्

+ अभूततद्भावे च्विः करणे ल्युट् प्रत्ययः) सिद्धान्तो ऽ यं काव्यशास्त्रीयचिन्तने सर्वप्रथममाचार्येण भट्टनायकेन प्रत्यपादि । स खलु शक्तित्रयं स्वीकरोति - अभिधां भावकत्वं भोजकत्वञ्च । अभिधया काव्यार्थे स्फुटे सति, भावकत्वशक्त्या सर्वे ऽ पि विभावादयो ऽ साधारणाः तत्तदात्मसंस्पर्शशून्या विधीयन्ते । रामस्य सीताया वा (असाधारणं, वैयक्तिकं त्र्प्रात्मसम्पर्कसंवलितं वा) दुःख भावकत्वशक्त्या साधारणीक्रियते । ततश्च तदेव साधारणीकृतं दुःखं (सुखं वा) सहृदयस्स्वदते ।

रामस्य (अ - साधारणं) दुःखं दर्शकस्य (साधारणं) दुःखं कथम्भवतीत्यपि यत्नतो ऽ वधेयम् । वस्तुतश्चित्तवृत्तिसाम्यवशाद्रामस्य असाधारणं सदपि दुःखं दर्शकस्यापि साधारणीकृतं दुःखमुद्बोधयति । एवं हि (नाट्ये) दर्शकः (काव्ये) श्रोता वा रामस्यैव दुःखं सम्प्रत्यात्मीयीकृत्या ऽ नुभवति । विभावादीनामलौकिकतया दुःखस्यापि तस्यानन्दरसनिर्भरं स्वादमात्मसात्करोति । लोके तु परकीयश्शोकोऽयमलौकिकः आत्म-संस्पर्शशून्यतया ऽऽ नन्दरूपेण परिणमति, परकीयस्सन्तप्यात्मीय इवाभाति।

वस्तुतो वासनैव प्राक्तनीदानीन्तनी च रसास्वादहेतुः । प्राक्तनी वासना कथं रसास्वादहेतुः ? तदुच्यते । अस्मिञ्जन्मनि रागिणस्सन्तोऽपि केचन प्राक्तनवासनाऽ-भाववशात् रसास्वादशून्या एव परिलक्ष्यते । इदानीन्तनी वासना कथं रसास्वादहेतुः । तदप्युच्यते । प्राक्तनवासनावन्तोऽपि श्रोत्रियजरन्मीमांसका इदानीन्तन-वासनाऽभाववशात् रसबोधेऽक्षमादृश्यन्ते । तस्मादभिधत्ते त्र्प्राचार्यधर्मदत्तः,

सवासनानां सभ्यानां रसस्यास्वादनं भवेत् ।
निर्वासनास्तु रङ्गान्तः काष्ठकुड्याश्मसन्निभाः ।

किञ्च, भग्नावरणचितिरेव रसास्वादस्य पृष्ठभूमिः । यावच्चेतनाया आवरणानि ईर्ष्याद्वेषमोहलोभादीनि न भिद्यन्ते न तावद्रसबोधो रसास्वादो वा सम्भवति । त्र्प्रथाऽवरणे भग्ने सति,

निशाकरकरस्पर्शात् चन्द्रकान्ते यथा द्रवः ।

एवं कारणवैशिष्ट्यात् काव्ये साधारणीकृतिः ॥

कारणभूता विभावानुभावसञ्चारिण आवरणे भग्नप्राय एवं रसास्वाद-विषयिणी स्वभूमिकां सम्पादयन्ति । विभावो रत्यादिभावान् विशेषेणा स्वादाङ्कुर-योग्यतामासादयति। यथाह महेश्वरतर्कालङ्कारः

व्यञ्जनया रत्याद्युपस्थापनमेव तद्योग्यता ।

विभावनव्यापाराऽनन्तरं समायात्यनुभावः । अनुभाव आस्वादाङ्कुर-योग्यतामुपगतं रत्यादिभावं रसरूपतया ऽ नुभावयति सहृदयम् । ततश्चान्ते (व्यभिचारिभावः) सञ्चारिभावस्य भूमिकाऽऽलक्ष्यते । रसस्थितिमुपगतान् रत्यादिभावान् सम्यकुतया सञ्चारयति सञ्चारी भावः।

कस्य चैतन्यमनुभवति सहृदयः ? अनुकार्याणां रामादीनामाहोस्विदात्मन एव? अयमपि प्रश्नो रसचर्वणाप्रसङ्गेऽतितरां माहात्म्यं भजते। आत्मन एव चैतन्यमास्वदते सामाजिक इति भट्टनायकाऽभिनवगुप्तौ । यथा कोऽपिशिशुर्म्मृत्तिका-निर्मितगजाश्वादिक्रीडनकानां भावान् तथैव दर्शकोऽपि स्वकीयमेव रत्यादिभावमनुभवति न पुना रामाद्यभिनयं सम्पादयतां नटानां भावं कमपि । यतो हि नटास्ते रामाद्यभिनयं कुर्वाणा अपि भवन्त्यवास्तविकाः । न ते सत्यमेव रामार्जुनप्रभृतयो महापुरुषाः । अतएव रसचर्वणायामात्मचेतनैव सर्वस्वभूता । आत्मचेतनैव विभावादिभिरुद्बोध्यते, सैव वास्वाद्यते । यथाह दशरूपककारः -

क्रीडतां मृण्मयैर्यद्वत् बालानां द्विरदादिभिः ।<br>
स्वोत्साहः स्वदते तद्वच्छ्रोतृणाभर्णुनादिमिः ॥

रसीभूतमिदं चैतन्यं सर्वथा विलक्षणमेव । नेदं चैतन्यं कार्यं, न ज्ञाप्यं, न वर्तमानं, न भविष्यत्कालीनं, न नित्यं न निर्विकल्पकं, न सविकल्पकं, न परोक्षं, न चा ऽ प्यपरोक्षम् । किन्तर्हि? सर्वथा ऽ लौकिकं सहृदयमात्रसंवेद्यम् आत्मानन्दसमुद्भव-स्वरूपञ्च । काव्यशास्त्रीयचिन्तने रसपर्यायभूतस्य चैतन्यस्येदमेव वैलक्षण्यं प्रतिष्ठितं दृश्यते ।

ध्वनिप्रतिष्ठापनाचार्य त्रानन्दवर्धनः प्रतीयमानार्थमेव काव्यात्मभूतं मेने। यद्यपि तदभिमतः काव्यात्मभूतः प्रतीयमानार्थो रसे एव पर्यवस्यति । तथापि नाऽसौ रसं काव्यात्मभूतमङ्गीचकार । तदत्राऽपि भवितव्यमेव केनचिन्निगूढेन कारणेन । अस्मदुपाध्यायाः पूज्यचरणाश्चण्डिकाप्रसादशुक्लमहाभागा मां कक्षायां निर्दिष्टवन्तो यदर्थभूतस्य काव्य-स्यात्माऽपि को ऽ प्यर्थविशेष एव भवितुं युज्यत इतिकृत्वाऽऽनन्दवर्धनाचार्यो रसालङ्काररीतीर्विहाय सहृदयश्लाघ्यं प्रतीयमानार्थमेव काव्यजीवातुभूतं मेने । शरीरा ऽ त्मनोर्मध्ये ऽ पि सजातीयता काऽप्यपेक्ष्यतएवेति ।

रसस्तु स्वप्ने ऽ पि न स्वशब्दवाच्यः। रसस्तु केवलं प्रतीतिविषयः, केवल-मनुभवसंवेद्यः । अलङ्कारस्तु शरीरस्थानीयं तत्त्वम् रीतिरपि पदसंघटनारूपा काव्यशरीरमेव लक्षयति । न तावच्छरीरस्थानीयमेव तत्त्वं किञ्चित् (काव्य) शरीरस्यात्मा भवितुं शक्नोति। अस्मादेव कारणाद् ध्वनिकारः काव्यात्मान्वेषणे बद्धपरिकरो जातः प्रतीयमानमर्थञ्च काव्यात्मत्वेन प्रतिष्ठापितवान् । अस्मिन् सन्दर्भे भणत्यभिनवगुप्तपादः-

शब्दार्थशरीरं काव्यमिति यदुक्तं तत्र शरीरग्रहणादेव केनचिदात्मना तदनुप्राणकेन भाव्यमेव। तत्र शब्दस्तावच्छरीरभाग एव संनिविशते - सर्वजनसंवेद्यधर्मत्वात् , स्थूलकृशादिवत्। अर्थः पुनः सकलजन संवेद्योन भवति। न ह्यर्थमात्रेण काव्यव्यपदेशः, लौकिकवैदिकवाक्येषु तदभावात्। तदाह - सहृदयश्लाघ्य इति । स एक एवार्थो द्विशाखतया विवेकिभिर्विभाग-बुद्ध्याऽभियुज्यते । तथाहि - तुल्ये ऽ र्थरुपत्वे किमिति कस्मैचित् सहृदयः श्लाघ्यते। तद् भवितव्यं केनचिद् विशेषेण। यो विशेषः स प्रतीयमानभागो विवेकिभिर्विशेषहेतुत्वादात्मेतिव्यवस्थाप्यते । - लोचनम् ।

अनेन एतदुक्तं भवति यत् काव्यार्थ सन्दर्भे ध्वनिकारस्तदनुयायिनश्चा ऽ भिनवमम्मटरुय्यक विश्वनाथजगन्ताथप्रभृतय त्राचार्या सोपानत्रयं स्वीकुर्वन्ति। तद्यथा.

१. प्रतीयमानस्यार्थस्य काव्यात्मत्वम् ।

२. काव्यात्मभूतस्य प्रतीयमानार्थस्या ऽ वगमेन साधारणीकरणमहिम्ना

सत्त्वोद्रेकः।

अयमेव सत्त्वोद्रेकश्चित्तविस्तारश्चैतन्यादिर्भावश्चापि कथ्यते ।

३. चैतन्याविर्भावमहिम्ना च रत्यादीनां भावानां रसरुपतया ऽऽ स्वादनम्।

काव्यार्थस्तावदनुशील्यते । तदनुशीलनेन चैतन्यं तावद्रजस्तमो ऽ भिभववशात् सत्त्वोद्रेकाच्च विस्तृतिमुपयाति । अन्ते च तदेव भग्नावरणचैतन्यं रसरुपतामुपगतं सहृदयैरास्वाद्यते । एवं हि, चैतन्यस्यैव परिणामो (Manifestation) रस इति नात्र कापिसंशीतिः । भट्टनायको ऽ पि तं रसमेव विशिनाष्टि -

काव्ये रसयिता सर्वो न बोद्धा न नियोगभाक् ।

भवतु नाम । उपर्युक्तं सोपानत्रयं कथं चरितार्थतामुपयाति काव्यानुशीलन-प्रसङ्गे इति लोचनकार प्रामाण्येन निबन्धान्ते प्रस्तूयते । आचार्यो ऽ भिनव : स्वसाहित्यगुरोर्भट्टेन्दुराजस्य पद्यमुदाहरति -

यद्विश्रम्य विलोकितेषु बहुशो निःस्थेमनी त्लोचने
यद्गात्राणि दरिद्रति प्रतिदिनं लूनाब्जिनीनालवत्।
दूर्वाकाण्डविडम्बकश्च निबिडो यत्पाण्डिमा गण्डयो -
र्दृष्टे यूनि सयौवनासु वनितास्वेषैव वेषस्थितिः ॥

पद्यमिदं पठित्वा कथं चैतन्यमाविर्भवति, कथञ्चान्ते रसरूपतया ऽऽ स्वाद्यते इति विशदीकरोति स्वयमाचार्य : -

इत्यत्रानुभावविभावा ऽ वबोधनोत्तरमेव तन्मयीभवनयुक्त्यां तद्विभावानुभावोचित-चित्तवृत्तिवासना ऽ नुरञ्जितस्वसंविदानन्दचर्वणगोचरो ऽ र्थो रसात्मा स्फुरत्येवा ऽ भिलाषचिन्तौत्सुक्यनिद्राधृतिग्लान्यालस्यश्रम-स्मृति-वितर्कादिशब्दा ऽ भावे ऽ पि । लोचनम्।

# व्यक्तितत्त्वविमर्शः

प्रो. राधावल्लभः त्रिपाठि

आङ्ग्लभाषायां 'पर्सनालिटी' ति व्यपदिष्टस्य पदार्थस्य कृते संस्कृतभाषायां न वर्तते समीचीनः कश्चनशब्दः। 'पर्सनालिटी' ति पदार्थस्तावदस्मच्चिन्तन-परम्परायां शास्त्रधारायां वा विजातीय एवेत्याममन्ति आधुनिकाः सुधियः समीक्षकाः। 'व्यक्तित्व' मिति कश्चनशब्द आधुनिकभारतीयभाषासु हिन्द्यादिषु पर्सनालिटीतिपदार्थस्य कृते नवीनो विनिर्मितः प्रयुज्यमानश्च दृश्यते श्रूयते वा। तत्र व्यक्तिर्नाम 'पर्सन' - पदार्थं व्यनक्ति। तद्भावः व्यक्तित्वम्। इदं च व्यक्तित्वं नाम यथाऽस्मच्छास्त्रपरम्परायामनुपलभ्यमानं तथैव तद्व्यञ्जकः शब्दोऽपि व्याकरणविच्युतः।

ननु अस्य तावत् च्युतसंस्कारदूषितस्य शशविषाणायमाणस्य व्यक्तित्वस्य पर्सनालिटीति तत्त्वस्य वा सत्त्वे किं मानमिति चेदुच्यते - इह तावत् प्रत्येकं जन्तुः अन्यस्मात् पृथक् परिचीयते। यद्वशादयं गौः अन्यस्मात् गौः भिन्नः अयं मनुष्य इतरेभ्यो सर्वेभ्यो वा भिन्न इति भिन्नाधानप्रत्ययोत्पत्तिस्तदेव व्यक्तित्वं पर्सनालिटीति वा तत्त्वम्। तद्द्वारेणेव एकस्य नरस्य अन्यस्मात् एकस्या स्त्रिय अन्याभिर्वा स्त्रीभिर्विशेषो विज्ञायते। ननु आकृतिविशेषादेव विशेषो ज्ञायत एवेति किमतिरिक्तस्य व्यक्तित्वस्य स्वीकारेण, तत्स्वीकृतौ च गौरवदोष एवेति चेन्न; यमजयोर्बालकयोराकृतिसाम्येऽपि तयोर्भेदस्य तत्तद्व्यक्तित्ववशादेव पृथक्बोधात्। अथ - यथा रामैश्यामौ यमजौ बालकौ, तयोरेकतरस्य बालकस्य अन्यस्माद्

बालकात् सत्यामपि सर्वथा संवादिन्यामाकृत्यां चेष्टायाः व्यवहारस्य च भूयान् भेदो भवति, अतश्च तत्तद्बालकस्य चेष्टाव्यवहारादिकं दर्शं दर्शं विज्ञातुं शक्यते - रामोऽयं न श्यामः, तत्किं व्यक्तित्वस्वीकारेणेति यद्युच्येत, तदपि न विचारसहम्। यतो हि सत्यप्याकृतिसाम्ये यद्वशाद् भवति चेष्टायाः व्यवहारस्य शीलस्य च भेदस्तदेव व्यक्तित्वमिति तत्त्वम्। अस्मिंश्च व्यक्तित्वे वेदान्तप्रोक्तं सूक्ष्मशरीरम्[1] सांख्यनिरूपितं लिङ्गशरीरं पाञ्चभौतिककलेवरश्च युगपत् समाविष्टे। वेदान्ते ज्ञानेन्द्रियसहिता बुद्धिर्विज्ञानमयकोशो जीवो वा प्रोच्यते। तथैव कर्मेन्द्रियसहितं मनो मनोमयकोशः। व्यक्तित्वे तु विज्ञानमय - मनोमय - प्राणमयान्नमयानां समवेतत्वम्। केषाञ्चिद् व्यक्तित्वमानन्दमयाधिरोहि भवति, अपरेषां प्राणमयविश्रान्तमितरेषां चान्नमयनिपतितम्। सांख्यदर्शने लिङ्गशरीरं तावद् धर्म,- ज्ञान - विरागैश्वर्यैरथवा अधर्माज्ञानरागानैश्वर्यैर्भावैरधिवासितं मतम्। एतैश्च भावैरधिवासितमिदं लिङ्गं संसरति नानायोनिषु समवाप्नोति विविधान् स्थूलदेहान्।[2] इत्थं च स्थूलदेहाच्छादितं लिङ्गशरीरमेव व्यक्तित्वं नरस्य। इदं च लिङ्गं तत्त्वत एकमपि भोदकाले कर्मभेदात् भेदं गच्छति, नानारूपंच भवति। अत एव कर्मविशेषैर्व्यक्तिभेदं स्वीकरोति सांख्यसूत्रकारः।[3]

अयं तावदत्र विशेषः। सांख्ये वेदान्ते च सूक्ष्मशारीरं स्थूलशरीरात् पृथक्भूतापि सञ्चरति। व्यक्तित्वं नाम कस्यचिन्नरस्य देहावच्छिन्नशील - स्वभाव - संस्कार - चरित्र - मनोबुद्ध्यहङ्कारचित्तानां समवायः, समेषां तत्त्वानां तत्र अविभाज्यसाहित्यं, न ततः किमप्येकं तत्त्वं पृथक्कर्तुं शक्यम्।

आलङ्कारिकास्तावत् सहृदयस्वरूपनिरूपणे तदीयं व्यक्तित्वमेव सहृदयताहेतुत्वे सङ्केतयन्ति। जातमात्र एव जन्तुः काभिश्चित् संविद्भिः परीतो

भवति। त एव स्थायिभावा भवन्ति अनुभूयन्ते च काव्यनाट्यादिश्रवणावलोकनकाले। न च सर्वैरपितु ये सहृदयास्तैरेवानुभूयन्ते, ते च व्यक्तित्वविशेषसम्पन्ना अत एवानुभवक्षमाः। 'येषां काव्यानुशीलनवशाद्विशदीभूते मनोमुकुरे वर्णनीयतन्मयीभवनयोग्यता त एवसहृदयसंवादभाज' इति निगदता आचार्येणात्र सहृदयाख्यया व्यक्तेः स्वरूपं निरूपितम्। तस्माच्च ज्ञातुं शक्यते तस्याः व्यक्तेः व्यक्तित्वपरिष्कारप्रक्रियाऽपि।

ननु सत्यम्, दुर्जनतोषन्यायेन स्वीकुर्मस्तावत् व्यक्तित्वं नाम किमपि तत्त्वम्। तथापि हंहो महापुरुष यदि नामेतत् तथा महिमशालि तत्त्वम्, तर्हि, किमर्थं नास्य स्वरूपं प्रतिपादितं कपिल-कणाद-गोतमादिभिः ? अत्रोच्यते - इह तावत् किं नाम कारणं तथाकथित - व्यक्तित्व - पदार्थस्यानुपबधेरस्माकं शास्त्रपरम्परायामिति विचारणीयम्। इयं तु परम्परा "यो वै भूमा तत् सुखम्, नाल्पे सुखमस्ति" श्रुतौ बद्धादरा वर्तते। यत्र आनन्त्ये धीर्विभ्रम्यति तत्र को नामावकाशः स्यात् अल्पस्य कथित - व्यक्तित्व - पदार्थस्य कृते ? यथैवास्माकममरकोशे तथैवास्माकं विचारकोशेऽपि पदं न प्रापुः व्यक्तिर्व्यक्तित्वं व्यक्तिवादश्चेति शब्दाः तत्पदार्थाश्च।

परन्त्विदमत्र चिन्तनीयम् । मा नाम स्यात् आदर आधुनिकव्यक्तित्व-व्यक्तिवादादीनां कृते परम्परायां, तथापि या पर्सनालिटीति कथिता सा सद्वा असद्वा? यदि सत्, तर्हि तद्विचारः करणीयः कामं भूमाविरोधि अल्पं वस्तु सा स्यात्। यदि असत् तर्हि तदसत्त्वे प्रमाणमुपस्थापनीयम्। इदमत्र विमृशामः। व्यवहारदृशा तु पर्सनालिटीति पदार्थस्य सत्ताया अपलापः कर्तुं न शक्यते। प्रत्यक्षमेव सर्वत्रानुभूयमानत्वात्, अस्य जनस्य पर्सनालिटी प्रभावशालिनी, अपरस्य चास्य न तथेति व्यवहारप्रसिद्धेः। प्रत्येकं मनुष्यः काचन व्यक्तिः। तस्य

तत्त्वं स्वरूपमेव व्यक्तितत्त्वं व्यष्टिमत्त्वं व्यक्तित्वं वा। जातिव्यक्तित्याकृतयः पदार्था इति महर्षिर्गौतम आह। जातिमत्यां व्यक्तौ च स सङ्केतं मेने। जातिमती व्यक्तिरेव पर्सनालिटीति वक्तुं शक्यते। तत्रव्यक्तेः भौतिकं रूपं कर्मेन्द्रिय-ज्ञानेन्द्रियसहितं, आधिदैविकं च तदीयं तत्वं तथैव च तदीयमाध्यात्मिकमपि गुढं स्वरूपं सर्वमन्तर्भूतम्। अत एव अल्पमेवेदं किमपि तुच्छं तत्त्वमत एवोपेक्षणीयमित्यपि विचाकिताभिदानम्।

कालिदासेन तु -

आकारसदृशप्रज्ञः प्रज्ञयासदृशागमः ।
आगमेन सदृशारम्भ आरम्भसदृशोदयः ॥

इत्यादि निगदता रघुवंशे दिलीपस्य राज्ञो व्यक्तित्वमेव सम्यक् प्रत्यपादि । आकृति-प्रज्ञा - ऽऽगमारम्भोदयानां समन्वितं रूपमेव व्यक्तितत्त्वं, व्यक्तिमत्त्वं व्यक्तित्वं वेति अस्माकमपि विवक्षितत्वात् ।

वेदाश्चैनं रूपं, तत्त्वं स्वरूपं च प्रतिपादयन्ति । यथोक्तमथर्वाङ्गिरसे -

पुण्डरीकं नवद्वारं त्रिभिर्गुणेभिरावृतम् ।
तस्मिन् यद् यक्षमातन्वत् तद् वै ब्रह्मविदो विदुः ॥ (अथर्व. १०.९.४३)

कठोपनिषदि च -

आत्मानं रथिनं विद्धि, शरीरं रथमेव तु ।
बुद्धिंतु सारथिं विद्धि मनः प्रग्रहमेव च ।
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् ।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥

(कठो. १.३.३-४)

इति यत् आत्मेन्द्रियमनोयुक्तत्वं भोक्तृत्वं प्रतिपादितं तदेव व्यक्तित्वम् । अत्र तावत् आत्मा, मनः, बुद्धिः, शरीरमिंद्रियाणि चेति पञ्च पदार्था वर्णिताः । ऐतेषां समन्वितं रूपमेव पर्सनालिटीति व्यक्तित्वं वेति वक्तुं शक्यते । परन्तु ये साम्प्रतिका मनोवैज्ञानिकाः व्यक्तित्वस्य पर्सनालिटीति पदार्थस्य वा विमर्शं विदधति, तेतु न मनो-बुद्धि-विलक्षणस्य आत्मनः सत्तां स्वीकुर्वन्ति । अतस्तेषां मतेन आत्मविरहितं मनोबुद्ध्याद्यवच्छिन्नं शरीरमेव व्यक्तित्वम् ।

अन्यच्च यावन्त्यो व्यक्तयस्तावन्त्येव तासां परमार्थतया व्यक्तित्वानीति आधुनिका मन्यन्ते । अत्र तावत् आत्मात्वेक एव । अतस्तदधिष्ठितानां मनोबुद्धिसहितदेहानां यत् पृथक् पृथक् व्यक्तिमत्त्वं न तत्र परमार्थतो भेदः । सांख्ये तावत् पुरुषबहुत्वं स्वीकृतम् । जगति यावन्तो मनुष्याः, पशवः प्राणिनो वा तावन्तः सन्ति पुरुषाः । यदि सन्ति नाना पुरुषास्तर्हि कथं तेषाम् पृथक् पृथक् ज्ञानं स्यात् । यथा प्रकृतिर्नानाश्रयत्वेन नानात्वं भजते, तथैव पुरुषोऽपि नाना देहेषु उपाधिभेदान्नानात्वमापद्यते । आकाशस्येव घटादिभिरुपाधिभिरिह नानात्वम्। यथोक्तं सांख्यसूत्रे - उपाधिभेदेऽप्येकस्य नाना योग आकाशस्येव घटादिभिः । (सांख्यसूत्रे १.१५०) इत्थं देहावच्छिन्नः पुरुषो व्यक्तिं गतः, व्यक्तिमत्त्वमाप्नोति, पुरुषविशेषश्च जायते । इत्थं च घटावच्छिन्न आकाशो घटे स्थानादेकस्मादन्यत्र नीयमाने अन्यत्र गच्छन्निव प्रतिभाति, एवमेव पुरुषोऽपि देहावच्छिन्नः देहे गच्छति गच्छन्निव प्रतीयते । (गतिश्रुतिरप्युपाधियोगादाकाशवत् - तत्रैव, १ १५१) उक्तं च ब्रह्मबिन्दूपनिषदि-

घटसंहतमाकाशं नीयमाने घटे यथा ।

घटो नीयेत नाकाशं तद्वज्जीवो नभोपमः ॥ (ब्रह्मबि. १३)

सांख्यदृशा तु चिच्छायापत्तिविरहितं व्यक्तित्वमिदं सर्वथा अचेतनं स्यात्। पुरुषस्यगतचैतन्यस्य सङ्क्रान्त्यैव अचेतनमपि चेतनवददिदं भवति । अतः सांख्यदृशा चिच्छायापन्नस्य मनोबुद्ध्यवच्छिन्नस्य कस्यचिद् देहस्यैव व्यक्तिरिति संज्ञा स्तात्, तस्य भावश्च व्यक्तित्वमिति ग्राह्यम् । योगवार्तिककारस्तु पुरुष-प्रकृत्योर्मध्ये बिम्बप्रतिबम्बभावस्यनाद्यनन्तां शृङ्खलां स्वीकुरुते । तथाहि - पुरुषस्य चैतन्यसङ्क्रान्तिः प्रकृतौ, तेन मनोबुद्ध्यादीनां अचेतनानामपि सचेतनताप्रतिभासः, तत्प्रतिभासस्य च पुनः सङ्क्रान्तिः पुरुषे, तस्माच्च पुरुषस्यापि मनसि सुखिते, दुःखिते अहं सुखी वा दुःखी वेति प्रतीतिः, पुरुषगतप्रतीतीनां च पुनः सङ्क्रान्तिर्मनोबुध्यादिषु, तेन च तेषां मनोबुद्ध्यादीनां पुनः सचेतनतापत्तिः, पुनरस्याः सचेतनतापत्तेः प्रतिसङ्क्रान्तिः पुरुषे इति बिम्बप्रतिबिम्बभावानां परस्परं पुरुष-प्रकृतिगतानाम् आवृत्तिरसकृद् भवति परस्परस्य सम्मुखं स्थापितयोर्मुकुरयोरिव । इत्थं चात्र योगवार्तिकमतेन पुरुषप्रकृतिगतानाम् बिम्बप्रतिबिम्बभावानामावृत्तिशृङ्खलाजनितं चैतन्यमेव व्यक्तित्वमिति सुकरं वक्तुम् । ननु चेतनपुरुषस्यैव प्रतिबिम्बात् मनोबुद्ध्यादीनां सचेतनत्वमिव भवति, तेन च संसारः सृष्टिर्वा भवत्येव, तत् कथं पुरुषे पुनः एतेषां प्रतिबिम्बस्य पुनः सङ्क्रान्तिरिति चेन्न । योगवार्तिककारस्तु इमामेव शङ्कामुत्थाप्य समाधत्ते -

ननु सविषयवृत्तेःस्फुरणं चेतनसंयोगादेव भवतु यथा सजलघटादिप्रकाशः सूर्यसम्बन्धात्, अतः किमर्थं चैतन्ये वृत्तिप्रतिबिम्बं वृत्तौ वा वक्ष्यमाण-चैतन्यप्रतिबिम्बं कल्प्यते, सुख्यहं जानामीति बुद्धिपुरुषयोरेकताभ्रमस्तु परस्परप्रतिबिम्बं विनाऽपि दूरस्थवनस्पत्योरिव दोषवशादेव सम्भवति, तत्कथं बुद्धिपुरुषयोर्वृत्तिसारूप्यसिद्धिरिति । अत्रोच्यते - चेतने तावत्

बुद्धिप्रतिबिम्बमवश्यं स्वीकार्यं, अन्यथा कूटस्थनित्यविभु-चैतन्यस्य सर्वसम्बन्धादेव सर्वं वस्तु सर्वैर्ज्ञायेत, न हि सूर्यसम्बन्धे सति घटाद्यप्रकाशो दृष्ट इति ।

आधुनिके मनोविज्ञाने तावत् ब्रेन व्यपदिष्टस्य मस्तिष्कस्य माइण्ड-संज्ञकस्य मनसश्च विशेष ऊरीकृतः । मस्तिष्कं नाम यन्त्रम् । तस्य यंत्रस्य नियामकं चालकं वा मनः । कठोपनिषदुक्ता उपमा अत्र परिवर्त्य प्रयोगमापादयितुं शक्यते । तद्यथा - मस्तिष्कं रथः, मनश्च सारथिरिति । अत्र मनो नाम चेतनं वस्तु, तच्च चालयति शरीरमिति मन्यते । सांख्यदृशा तावत् मनो-बुद्ध्यहङ्कारादयः जडायाः प्रकृतेःप्रादुर्भूताः, न ते स्वयं सचेतनाः । पुरुषस्य चिच्छायापत्तेः बुद्धिर्महत् - तत्त्वं वा सचेतनमिव भवति । मनोवैज्ञानिकस्तावन्न मनो-बुद्धिव्यतिरिक्तम् आत्मपदार्थमूरीकुर्वन्ति । ते मन्यन्ते मनो-बुद्धिव्यतिरिक्तं अवचेतनं तत्त्वम् । इदं चावचेतनं स्वयमज्ञायमानमपि अज्ञातज्ञापनं कुरुते, धारयति च नाना स्मृतीः संस्कारांश्च । भारतीयदर्शने इदमेव चित्तमिति प्रोच्यते। अतश्च मनोबुद्ध्यहङ्कारचित्तानि चत्वार्यपि चेतनायाः विशेषरूपाणि स्वीक्रियन्ते । पूर्वजन्मार्जिताः संस्काराः विस्मृतानां प्रसङ्गानामवधारणाश्च चित्ते ध्रियन्ते । तस्माच्चेतसा एव च मनसि स्मृतपथे आपाद्यन्ते । यथोक्तं कालिदासेन-

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुकीभवति यत् सुखतोऽपि जन्तुः ।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि ।

इत्थं च मनोबुद्ध्यहङ्कारचित्तविशिष्टं शरीरमेव व्यक्तिः । तस्य स्वरूपं

व्यक्तित्वमिति वक्तुं शक्यते । अस्मिंश्च व्यक्तित्वे मनसि उद्रिक्ते सङ्कल्पविकल्पानां प्राधान्यं, बुद्धौ उद्रिक्तायां निश्चयस्य,अहंङ्कारे जाग्रति अहम्भावस्य चित्तस्य च प्राधान्यात् विविधचित्तवृत्तीनां प्रवाहाः प्रवहन्ति, आवर्तबुद्बुदतरङ्गततिसङ्कुलायां प्रवहमाणायां नद्यामिव । व्यासभाष्यकारेण इदमेव व्यक्तित्वं चेतनानदीति व्यपदिष्टम् । अस्यां च चेतनानद्यां क्षिप्तमूढविक्षिप्तैकाग्रनिरुद्धाः पञ्चभूमय भवन्ति । क्षिप्तायां रजोगुणस्य, मूढायां तमोगुणस्य, एकाग्र-निरुद्धयोश्च सत्त्वगुणस्य प्राधान्यम् । प्रख्या-प्रवृत्ति-स्थितिभिस्त्रिविधैः शीलैरियं चेतना ऊर्ध्वगामिनी अधोगामिनी वा भवति । इत्थं च पञ्चभूमिभिः पञ्चशीलैश्च नराणां व्यक्तित्वं वैविध्यं भजते । स्पैंगलराख्यो मनोवैज्ञानिकः व्यक्तित्वं षड्विधं मनुते - सिद्धान्तवादि, अर्थवादि, सौन्दर्यवादि, समाजप्रवणम्, राजनीतिप्रवणं, धार्मिकं चेति भेदैः । एतेषु षड्भेदेषु प्रथमान्तिम-प्रकारयोः सत्त्वगुणप्राधान्यम् निरुद्धा च चितभूमिः । इतरेषु तु रजोगुणस्य प्राधान्यम् । एवमेव मनौवैज्ञानिकमूर्धन्यो जुङ्गः बहिर्मुखम् अन्तर्मुखं चेति द्विविधं व्यक्तित्वविभागमूरीकरोति । तयोश्च बहिर्मुखव्यक्तित्वसम्पन्ना जनास्तावद् रजोगुणप्रधानान्तःकरणाः, अन्तर्मुखास्तु सत्त्वगुणप्रधानाः ।

अस्यां च चेतनायां वृत्तीनां प्रवाहा अन्यथात्वमनिशं विदधति । तथाहि प्रमाणविपर्यविकल्पाश्चित्तत्वृतय योगसूत्रकारैः प्रतिपादिताः । ताभिः क्वचित् निश्चयात्मकं संशयात्मकं विकल्पात्मकं वा भवति अन्तःकरणम् । एवमेव बाह्यजगति प्रकृतिनटी विरचयति विविधानि चित्राणि सृष्टेश्चित्रफलके, यानि दर्शं दर्शमपि विविधाभिः वृत्तिभिरन्यथात्वं भवति चेतसः । यदुक्तं कालिदासेन -

मेघालोके भाति सुखिनोऽप्यन्यथावृत्ति चेतः ।
कण्ठाश्लेषप्रणायिनि जने किं पुनर्दूरसंस्थे ।

तथापीदमन्यथात्वं व्यक्तित्वस्य विवर्तान् जनयति, न परिणामान् । यथा सागरो वेलां नोल्लङ्घययति, तिष्ठति च सदैव तथा, परन्तु प्रादुर्भवन्ति तस्मिन् आवर्त-बुद्बुदरतरङ्गमयाः विकारा विलीयन्ते च तस्मिन्नेव, तथैव नरस्य व्यक्तित्वे प्रादुर्भवन्ति अनन्ता वृत्तयो विलीयन्ते च तत्रैव । क्वचित्तु अदृष्टोऽप्यर्थस्तत्र क्षोभं जनयति । तताहि -

हरस्तु किञ्चित् परिवृत्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः ।

अत्र सहकारारतरौ लीने शरसन्धानं कुर्वति कामे हरेणादृष्टेऽपि तत्संरम्भः मनाक् क्षोभं रचयति । ननु सर्वमिदं विवेचनं चैतन्यमेव प्रधानतया विषयीकरोति, व्यक्तित्वे तावत् यथा अन्तःकरणस्य चित्तवृत्तीनां वा समावेशस्तथैव पाञ्चभौतिकशरीरस्यापीति निरर्थकमेव आधुनिकव्यक्तित्वविवेचनस्य प्रत्नभारतीयचिन्तनदिशा त्वदीयं व्याख्यानमिति चेन्न । शरीरमाद्यं खलु धर्मसाधनमिति कथयता महाकविना यथा शरीरस्य महत्त्वमूरीकृतं तथैव पतञ्जलिप्रभृतिभिरपि शरीरस्य । योगसूत्रे (३.४६) कायसम्पद्विवेचनमनया दिशा द्वारं किमपि समुद्घाटयति । पतञ्जलिना तत्र रूप-लावण्य-बल-वज्रसंहननत्वविशिष्टा कायसम्पद्विवेचिता ।

उन्मीलितं नवीनं निगमागमसम्मतं व्यक्तितत्त्वम् ।<br>
राधावल्लभकविना तोषाय भवेद् बुधानां तद् ॥

सन्दर्भाः

१. सूक्ष्मशरीराणि सप्तदशावयवानि लिङ्गशरीरणि । अवयवास्तु ज्ञानेन्द्रियपञ्चकं, बुद्धिमनसी, कर्मेन्द्रियपञ्चकं वायुपञ्चकं चेति । वेदान्तसारे, मत्सम्पादिते, इलाहाबादात्, १९७७, पृ. २२

२. संसरति निरूपभोगं भावैरधिवासितं लिङ्गम् । सांख्यकारिकायाम् ४७

३. व्यक्तिभेदः कर्मविशेषात् । सांख्यसूत्रे ३.१०

# कालिदाससाहित्ये चैतन्यदर्शनम्

डॉ जनार्दन प्रसादपाण्डेय "मणि"

चैतन्यं नाम प्रतिभासमानं किमपि महनीयं तत्त्वं निश्चप्रचमेतस्य निखिलस्य ब्रह्माण्ड[1] भाण्डस्य । लोकेषु यत्रकुत्रापि दरीदृश्यते स्पन्दनं तत्सर्वमपि स्पन्दनं वस्तुतश्चैतन्योद्भवं चैतन्यान्वयं चैतन्यस्वभावं चैतन्यकृपाकटाक्षपर्यन्तमेव धृतजीवितं चैतन्यगर्भ एव प्राप्त पर्यवसानमनुभूयते बुधैः । वैय्याकारणानां दृष्ट्या तु चिद् धोतोर्ल्युट् प्रत्यये कृते निष्पन्नाच्चेतनशब्दात् ष्यञ् प्रत्यये विहिते भाववाचि चैतन्यमिति पदं प्रथमायां विभक्त्यामेकवचने नपुंसकलिङ्गे स्वस्वरूपं लभते । तत्त्वान्वेषिण्याः भारतीयमनीषाया दार्शनिके मञ्चे विशेषतो वेदान्तसंसारे कृचिद् ब्रह्मरूपे कृचिद् जीवरूपे, क्वचित् परमात्मरूपे क्वचिदात्मरूपे क्वचिच्चेश्वरादिरुपेषु समष्टिव्यष्टिमयुपहितममुपहितमिदं चैतन्यतत्त्वं विभ्राजते।[2] स्थिति वैशिष्ट्यान्निमित्त कारणमुपादान कारणञ्च चैतन्यमेव जगताम् ।[3] तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति गायन्ती भगवती श्रुतिश्चैतन्य पुरूषस्य परात्परपरमेश्वरस्य सर्वमयत्वं समग्र प्रपञ्चाधिपत्वञ्च सुष्ठु प्रमाण्यति सत्स्वप्युपाधिभेदेषु संज्ञकानां चैतन्यरूपतायां न कोऽपि भेदः । चैतन्यकुक्षावेव सदा श्वसिति चैतन्यावृतमनन्तं ब्रह्माण्ड मपरिमितं लोकसङ्धातजातम् । चैतन्यमेव ज्योतिर्महज्योतिः स्वयंज्योतिर्ज्योतिरेवात्माऽयमात्मैव पुरुषः सहस्राक्षः[4] ।अनया दर्शनरीत्या न कुत्रचित् कश्चिदपि सन्देहावकाशाश्चि-रन्तपद्धतौ चैतन्यचिन्तनस्य किं वा तद्दर्शनस्यसत्यम् । अत्र वेदादारभ्या-धुनिककालं यावद्योऽयं सारस्वतयागः प्रचलति, यं वाणी यजते स्वयं प्रयत्नतः सर्वेऽप्ययं वस्तुतच्चैतन्यस्यैव दर्शनम् । तद्रहस्य पयः पारावारेऽहर्निशं मज्जन्ति मुनयो योगिनो ऽ नुभवन्ति परमानन्दं साक्षात्कुर्वन्ति भगवतो विग्रहम् । चैतन्यविषयिणीयं शाश्वती धारणा शोधविषयस्यैस्य तां भावशमिं पुष्णति, तां पृष्ठभूमिमनुयाति, यत्प्रसादतः कविकुलगुरुकालिदाससाहित्ये प्रवेशो भवितुं शक्यते ।

यतो हि कालिदास एव संस्कृतसाहित्यस्य स प्रथमः कविर्यदभिधाने तद्भक्तिनिष्ठाव्यञ्जको दास शष्दो विभाति चरमोत्कर्षतः प्राप्तोत्तर-पदत्वसौभाग्यलाभ; पूर्वपदत्वे तु तस्य चैतन्यस्यैव चकास्ति संज्ञा । विश्वस्मिन् निखिलेऽपि संस्कृते जगति तथा चान्येषु भाषासाहित्येषु कालिदासकवित्वकीर्ति कौमुदी सोल्लासं नृत्यति, नन्दयन्ती भाव लोकं तनोति सहृदयसाम्राज्यं सर्वदा रसात्मकं शुद्धबुद्धचैतन्यं रसब्रह्म प्रति । रस एवासीत् साक्षात्कारं विषयस्तज्जीवनस्य, सकलप्रयोजनमौलिभूतं तत्त्वञ्च तस्य महाकवेः साधनासंसारस्य । रसैकधर्मी कविरयं स्वकीये काव्यालोके काव्यात्मभूतस्य रसस्य वात्सल्यं सर्वत्रानुभवति । काव्यात्मभूतरसव्याजेन कालिदासो निसर्ग चैतन्यस्य तस्य रसब्रह्मणो वात्सल्यामृतं सुष्ठु पिबति । रसो वैसः इति निगदन्ती भगवती श्रुतिश्चैतन्य पुरुषस्य रसरुपत्वं सर्वतोभावेन विज्ञापयति ।

वस्तुतः कविस्तु गोरूपाया भगवत्या वाग्देवताया निसर्गोच्चालितमौधस्यं धृतगोवत्सविग्रहो निरन्तरं पिबत्येव रसाभिधानतः । तस्य स रसास्वादो योगिनां प्रयत्नसापेक्षाद्रसपानाद् विलक्षणतरएवभवति । वाग्धेनुरत्यन्तं स्निह्यतिस्म कालिदासे कवावत एव कालिदासस्य तद्दुग्धपयः पानत्वं किमप्यधिकतरमेवानुमीयते तत्पूर्वकालिकै विद्वद्भिरालोचकैश्च लोके । भरतरससूत्रव्याख्या-कारस्याचार्यभट्टनायकस्य कदाचिदेवंविधै-वावधारणा आसीत् ।[5] भरतमुनिस्तु प्रवर्तमानं काव्यार्थं रसरूपमेव मन्यते स्म[6] । काव्यशास्त्र पितामहत्वात्तदुक्तीनां मौलिकत्वं काव्यशास्त्रिभिः सम्यक् समीक्षितम् । "वागेव विश्वा भुवनानीति" ख्यातां श्रुतिभणितिं मन्यमानोऽयं मुनिः स्वीये नाट्यशास्त्रे वाचमेव वाक्तत्त्वमेव सर्वेषां कारणत्वरूपे स्वीकरोति[7] । अत्रवाक्तत्त्वं चैतन्यब्रह्मणः स्वरूप मादत्ते । अक्षरशब्दार्थ-विद्भिर्महावैय्याकरणैर्भर्तृहरिभिरियमुद्भावना स्वकी यैर्गभीरैस्तर्कैर्विधिवदभि-प्रमाणिता[8] । साक्षात्कृतिरप्यक्षरब्रह्मणः सर्वा-त्मनासम्पादिता ।

अत्रेदं तथ्यं विशेषेण ध्यातव्यं वर्तते यदिदं समग्रमपि दर्शनजातं श्रुतिसम्मतं यत्रकुत्रचिद्वेदान्तप्रतिष्ठितं च वरीवर्ति । काव्यशास्त्रीयं चिन्तनमपिदर्शनसरणौ श्रुति प्रातिनिध्यमेवाङ्गीकरोति ।

महाकविः कालिदास सानन्त्यं भजमानायां स्वकवितायात्रायां वेदवेदाङ्ग-रहस्यरत्नैः साकं कदाचिद् बालभावेन, कुत्रचित्तरूणभावेन क्वचिच्च प्रौढभावेन क्रीडन् सर्वेषांसमन्विर्तिं. सङ्कलयन्स्वरचनोत्सङ्गे रसाध्वनि प्राचलत् ! रसात्मकं वाक्तत्वात्मकं तुरीयमनुपहित चैतन्यमद्वैतं शिवं तथा च तच्छक्तिं कविरयं स्वकीयस्य महाकाव्यस्य प्रथमश्लोके प्रणनाम[९]। वागर्थप्रतिपत्तिरत्र ज्ञानस्वरूपस्य रसब्रह्मणः साक्षात्कृतिः, उपहित - चैतन्यस्यानुपहित चैतन्यावाप्तिः, व्यष्ट्ययुपहित चैतन्यस्य तुरीयचैतन्यस्तुतिः । भवन्तु नामोपाधिभेदाः स्थलेस्थले, किन्तु सर्वत्राद्वैतवेदान्तिनस्तस्य कवेश्चैतन्यर्शनं तु समुल्लसत्येव तन्निसर्गजे साहित्यद्रुमे । रघुवंशमहाकाव्यस्यादौ रघुवंशेश्वरस्यभिवन्दनं रसजीवित-भूतमौचित्यं नितरां व्यञ्चयति [१०] । एतत्पूर्व विरचिते विक्रमोर्वशीयमित्यादये नाटके कविर्वेदान्त प्रतिष्ठितमेकपुरूषं शिवं समेषां निःश्रेयसे स्मृत[११]वान् ।

वस्तुतो नाट्याभिनेतृणां नाट्यदर्शनोत्सुकानाञ्च कल्याणाय मङ्गलाय महाकविरत्र स्वकीयमिष्टं पृथिवीमन्तरिक्षं सर्वतो भावेन व्याप्य विराजमान-मुपनिषत्सु ब्रह्मरुपमेकपुरुषपदं प्राप्य पूजमानमीशं शिवं प्रार्थयते । तस्यैकपुरुषस्य चैतन्यस्य शिवस्याज्ञानसमष्ट्या माययोपहितं रुपमेव ईश्वरः, अतएवासौ वर्तते ऽनन्यविषयः । यथार्थाक्षरः शब्दः । भक्तियोगैकसुलभस्यस्यान्तस्तत्त्वं मोक्षार्थिभिः नियमितप्राणायामादिक्रियाभिरन्विष्यते । इतोऽपि पुर्वं महाकविः स्वीये मालविकाग्निमित्रमिति प्रथमे नाटके स्थाणोरेतस्य विरुद्धधर्मत्वमादौ प्रस्तुतवान्[१२]। स्वकीय चैतन्यं प्रति विस्मयमुत्पादयन् कविरत्र तस्यावाङ्मनसगोचरत्वमखिलाधारत्वं व्यञ्जितवान् । समर्थस्याप्यसामर्थ्यमै-श्वर्यवतोऽप्यैश्वर्यगोपनं मायामयत्वं केवलम्। चैतन्यस्यास्य विरुद्धधर्माश्रयत्वं तद्साधारणत्वमपरिमेयत्वमेव । एकैश्वर्यस्थितः प्रणतबहुफलः सन्नपि यः स्वयं चर्माम्बंर विभर्ति, कान्तासम्मिश्र-देहोऽर्धनारीश्वरविग्रहोऽपिविषय विरहितचेतानां योगिनामग्रेसरः, अष्टाभिस्तनुभिः कृत्स्नं जगद्बिभृदपियो निरभिमान चित्तः सएवसन्मार्ग प्रकाशनाय सर्वेषां जनानां तामसीवृत्तिं दूरीकर्तुं कविना प्रार्थितः । उपाधि भिन्नत्वे धर्मभिन्नत्वमस्य चैतन्यस्य

क्रान्तदर्शी कविः सम्यक्तया जानाति स्म । स्वकीये कुमारसम्भवमहाकाव्येऽपितदिदं वैलक्षण्यं विभूतिषु प्राकाम्यं प्रति महाकविना शोभनमुदीरितम्[१३] । चैतन्यस्य प्रायःप्रत्येकं पक्षाः कविना दृष्टाः, स्वकृतिषुचोद्धाटिताः ।

पराकाष्ठामुपगते स्वीये कवित्वे कालिदासो नाटकरत्नमौलिभूत मधुक्षालितं यदभिज्ञानशाकुन्तलं नाम नाटकं विरचितवान्, तदादिमङ्गले नान्दीश्लोके, मालविकाग्निमित्र नाटकस्य नान्दीपाठे प्राप्तविषय प्रवर्तनस्याष्टमूर्तिस्वरूपस्या-भिधानपरिगणनपुरस्सरं गभीरां सूत्रात्मिकां व्याख्यां कृतवान् । महाकालाश्रये चैतन्य वरप्रसाददधिगत वाक्सिद्धिरयं कवयिता शिवमयं ब्रह्माण्डं, ब्रह्माण्डमयं शिवमत्र स्मरति । तं सर्वजनरक्षायै निवेदयति[१४] ।

चैतन्यं रक्ष्यः, चैतन्यंरक्षकः, चैतन्यंरक्षा, किं वा चैतन्यं दाता, चैतन्यं ग्रहीता, चैतन्यं दानमिदं सर्वमपि चैतन्यनीराजनं, चैतन्य चङ्क्रमणमिति कालिदासः सर्वत्र सिद्धी करोति। तत्काव्यचैतन्यं वरतन्तु चैतन्याद्ज्ञान चैतन्यं तथैव गृहीतवान् यथा लोकचैतन्यमिदं सूर्यचैतन्याज्ज्योतिश्चैतन्यं गृह्णाति[१५] ।

अभिज्ञानशाकुन्तलनान्द्यामष्टमूर्तेरीशस्य प्रथमां जलरूपां मूर्तिं विधातु; प्रथमां कृतिं स्वीकरोति । मन्त्रमाध्यमेनाहुतं हविर्मन्त्राहूतानिष्टान्देवान् या प्रापयति, सा तनुरष्टमूर्तेर्द्वितीया मूर्तिरग्निरूपा विद्योतते । तृतीया यजमानरुपामूर्तिर्यत्कराभ्यां कश्चिद् यागः सम्पद्यते । चतुर्थी सूर्यरूपा मूर्तिः, पञ्चमी चन्द्ररूपा मूर्तिरिमे द्वे मूर्ती अहर्निशमृतु मासादिकं कालं जनयतः । षष्ठी मूर्तिराकाशरूपा या शब्दगुणा विश्वं व्याप्य स्थिता । सप्तमी मूर्तिः पृथिवीरूपा तनुः या तु सर्वेषां धान्यादीनां बीजानां प्रकृतिभूता कारणभूता विद्यते । अष्टमी शक्ति वायुरूपा तनुर्यया सर्वेऽपि प्राणिनः श्वसन्ति, सर्वाणि भूतानि जीवन्ति इमा अष्टमूर्तयः शिवस्य, ताभिरन्वितोऽयमष्टमूर्तिः । अष्टमूर्तयोऽज्ञानोपहित चैतन्यस्यैव सृष्ट्यपि चैतन्यरूपं ययुरिदमेव चैतन्यदर्शनमयमेव वाच्यार्थो मूलतः सर्वं खल्विदं ब्रह्म[१६] इत्यस्य श्रुतिवाक्यस्य ।

भारतवर्षस्यार्षसंस्कृत्यास्तपोमय्या निष्ठाया अमरोद्गायकोऽयं जटाजूटभक्तः कविर्वेदान्तेन सह मीमांसासांख्ययोगादीनां दर्शनानां क्रोडेष्वपि स्वचैतन्याभिवन्दनं

कुर्वन् यत्र तत्र तत्तद्दर्शनालोक कणान् वाग्व्यवहारे संयोजयन् सृष्ट्यां सर्वत्र जीवनमनुभवन् पायं पायं श्रीमद्भगवद्गीतामृतं ध्यायं ध्यायश्च तदुद्घोषकं गोपवेषं योगेश्वरं सारस्वते पथि प्रवर्तितो बभूव । कुमारसंभवमहाकाव्ये यदा कालिदासस्य दृष्टिर्हिमालयं प्रति याति तु स तस्मिन् कमपि देवतात्मानं पश्यति । तद्दृष्ट्या सर्वशैलापृथिवीरूपां गां भास्वन्ति रत्नानि महौषधीश्च दोग्धुं विद्यमाने दोहदक्षे मेरौ हिमालयं पृथिव्या वत्समकार्षुः । सम्यक्तया सर्वाणि स्वाभीप्सितानि रत्नानि दुदुहुः ।[१७] अन्न सर्वेषु शैलेषु कश्चन चेतनः कविनावलोकितो नैसर्गिको वर्णनानन्दश्च चेतसा गृहीतः । रघुवंश महाकाव्ये मर्यादापुरुषोत्तमेन राज्ञा रामचन्द्रेण निर्वासिता कालिदासस्य सीता विलपति यदा तु तत्क्रन्दनमवलोक्य निखिलमप्येकान्तं वनप्राङ्गणं रोदिति । समदुःखभावं भजन्तो मयूरा नृत्यं त्यजान्ति, वृक्षाः कुसुमानि विजहन्ति, सर्वा हरिण्यः स्वमुखेभ्यः पूर्वं चर्वितान् ग्रासान् दर्भानुपात्तान् दुःखातिरेकादुद्गिरन्ति[१८] । अत्र प्रतीयते यत्खगमृगवृक्षेषु सर्वेषु कश्चन संवेदनशील आत्मा प्रतिष्ठितो वर्तते । किंवा महाकवेः प्रतिभया सर्वत्र चैतन्यमेव मृग्यते प्राप्यतेऽनुभूयते च । मेघदूतकाव्ये विरहकातरः कालिदासस्य यक्षो रामगिर्याश्रमे निवसन् स्वप्रियतमायाः कृते सन्देशं प्रेषयितुं मेघमेव दूती करोति । प्रत्यग्रैःकुटजकुसुमैस्तत्कृतेऽर्घं प्रयच्छति । प्रसन्नः सन् तस्य स्वागतं व्याहरति ।[१९] धूमज्योति; सलिलमरुतां सन्निपाते मेघे चैतन्यतत्त्वं विद्यमानमवलोक्य यक्षस्तं स्वसन्देशं कथयति । यद्यपि मेघस्य चैतनीकरणे यक्षस्य कामार्त्ततामुद्भावयति कविरत्रसिद्धान्त पक्षतः काम वैकल्यमन्त्रस्यागभीरां परिणतिं प्रतिपादयितुं कथञ्चित्[२०] किन्तु यक्षमुखान्त्प्रथमतस्तमुज्जयिनीं प्रेषयति तत्र महाकालमासाद्य संध्याकालीनायां तद्वन्दनार्चनायां पटहतां कर्तु निवेदयति । निवेदनमिदंन कामार्तस्य यक्षस्य निवेदनमिदं तु महाकालभक्तस्य कालिदासस्य वस्तुतः । अतोमेघसन्दर्भे तच्चैतन्ये न कश्चिदपि सन्देहः कार्यः, यतोहि तस्मिन् स्मयमानं चैतन्यमवेक्ष्यैव महाकवेर्भक्तिभावना स्वकीयेष्टपूजनविधौ योगदानार्थं तं निवेदितवती । अग्रेऽपि यक्षमुखान्महाकविः कैलासक्रोडे शम्भुना दत्तहस्ताया भगवत्याः पार्वत्या मणितटारोहणे सोपानत्व साहाय्यहेतवे मेघं[२१] प्रार्थयते । नैकानि सन्त्येवंविधानि चैतन्यनिरीक्षणानि मेघस्वरुपे मेघदूते सत्यम् ।

वनस्पतिषु सर्वदा स्वचैतन्यालोकं पश्यतोऽस्य कवेर्यक्षिणी यत्र बालमन्दारवृक्षं कृतकतनयवत्यालपति पालयति[२२] तत्रैव पञ्जरस्थां सारिकां काच्चिद्भर्त्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति, मधुरं प्रश्नं पृच्छति[२३]। अभिज्ञानशाकुन्तले नाटके कालिदासस्य चरित्र नायिका शकुन्तला यत्राश्रम वक्षकेषु सुतरां स्निह्यति, तेषु सहोदरत्वं ज्येष्ठत्वं पुत्रत्वं च पश्यति तत्रैवाश्रममृगं विरहितस्वमातृत्वात् तस्य पुत्रवत्स्वीकृत्य परिपोषयति[२४]। वृक्षास्तत्प्रसाधनाया-भरणकान्यपि दत्तवन्तः[२५]। क्तता तत्र तस्याः भगिनी, चूतसङ्गतां तामवलोक्य सा मोमुदीति, पतिगृहगमनकाले तामालिङ्गति। विलक्षणेयं सङ्कलना बन्धुतायाः। एतस्या बन्धुताया मूले यः संवादः परिस्फुरति योऽन्तर्योगः समुल्लसति, स सर्वश्चैतन्यप्रकाशः केवलम् ।

किं नाम जडत्वमिदं त्ववलोक्यत एव न कालिदास कविताङ्चले । नवमालिकाया आम्राश्रयं शकुन्तलाया दुष्यन्तसौहृदं द्वयमपि समं पश्यति महर्षिः काश्यपोऽभिज्ञानशाकुन्तल नाटकस्य चुतुर्थाङ्के[२६]। शकुन्तलायाः पतिगृहगमन-काले तद्गमनानुज्ञाकृते लतावृक्षपादपान्निवेदयते । यतो हि तपोवनबन्धुभूतानां तेषां जलनदि सन्तुष्टिं विना सा जलं न पिबतिस्म, प्रियमण्डनासत्यपिस्नेह - वशात्पल्लवान्नादत्ते स्म तेषां पुण्योद्भवकाले सा प्रथममुत्सवमनुभवति स्म[२७] । वैलक्षण्यमिदं यत्तरवः परभृतमुरवादनुमति मपि तस्मिन्काले दत्तवन्तः[२८] । भवतु नाम काचिदप्येतेषां भाषा, किन्तु तद्भाषाभावग्राहितैव चैतन्योपस्थितिः सर्वत्रतस्यैव पुरस्कृतिः। श्रीमन्मुकुन्दलीलाललितकलेवरे महर्षिकृष्णद्वैपायन प्रतिभाप्रश्न-ग्रथितेऽस्मदार्षग्रथे श्रीमद्भागवते व्यासशुकदेव प्रसङ्गेतत्तन्मयी भावस्य याभिव्यञ्जना समुद्घाटिता, चैतन्यसर्वमयताया यास्थितिः समुत्पादिता साकालिदासकृतिषु तत्तत्प्रसङ्गेषु प्रकृतिमानवयोः स्वच्छन्दं नरीनर्ति चैतन्यपदनूपरध्वनिरेव कालिदास कवित्वध्वनिः। नास्त्यत्र कश्चिदपि सन्देहलेशः ।

मरणं प्रकृतिः शरीरिणां विकृतिर्जीवितमुच्यते बुधैरिति नैकैः पंक्ति भावैर्वशिष्ठमुखादिन्दुमतीच्चिरविरह कातरजीवितमजमवबोधयता कविना जगतो मिथ्यात्वसिद्धान्ते जीवितं विकृतिरमानि मरणञ्च प्रकृतिरिति। अनेन

प्रतिपादनेनाशानसमष्टिव्यष्ट्युपहितचैतन्यप्रपञ्चे चैतन्यमभिवन्दतोऽप्यस्य कवेः प्रपञ्च प्रियतरत्वं नैवाङ्गीकरणीयमिति सूक्ष्मतया व्यज्यते । जननाभिलाषोऽप्यस्य सार्वभौमपक्षतो न सङ्केतमुपयाति । किन्त्वधिगते जन्मनिशक्तिशिवयोः स्त्रीपुरुषयोर्मध्ये विप्रयागो माभवत्वि[२९]तिरघुवंशमेघ[३०]दूतयोः काव्य-योर्नायिकानायकमुखात्प्रसङ्गापेक्ष्याभिव्यक्तवान्। नित्यसंयोगैकपक्षपाती सन्नपि यत्रकुत्रचिद्विशिष्ट वियोगवर्णनैः कृतंचित्तोद्रेकोऽयं मङ्गलमयपर्यवसानप्रियः सुखान्तकाव्यप्रणयनव्रतो महाकविर्जीवने स्त्रीपुरुषयोः सहस्थितिं सार्व-कालिकीमन्विति महर्निशमन्तसाभिलषति स्म । न विना विप्रयोगं सयोगः पुष्टिमश्नुते इति काव्यशास्त्रीयसिद्धान्तानां प्रायोगिकी मूर्छना कालिदाससहित्ये सततं रममाणा सहृदयहृदयसाम्राज्यं सुतरामावर्जयति । कविरयमासीत् श्रङ्गारी यस्माद्रसमयं सञ्जातमस्य काव्यजगदत एव कालिदासस्य प्रपञ्चप्रियत्वं नाङ्गीकरणीयमिति मम पूर्वोक्त्या न कदाप्ययमर्थः कथञ्चिद् ग्राह्यो यत्तस्मिन् कुतश्चिदपि निर्वेदकणिकाः प्रतीयमाना आसन् । वियोगविलोलचित्तस्य राज्ञोऽजस्य समक्षं महर्षिवशिष्ठस्य जीवनानित्यत्वसम्बन्धिती भणितिरजकृते सर्वथोपयोगिनी श्रेयस्करी चासीदिति मत्वैव महाकविप्रतिभया तानिरहस्यर-ञ्जितानि वचांसि प्रादुर्भूतानीति प्रतीयते । किन्तु स्वकाव्ययात्रयाः समापनकालेऽ-भिज्ञानशाकुन्तल नाटकस्य तदन्तिमे भरतवाक्य भूते श्लोके स्वपुनर्जन्म-विनाशनाय यथा नीललोहितः शिवो महाकविना प्रार्थितस्तेन तस्य धर्मार्थकाम-पुरुषार्थ सिद्धिद्वाराधिगत-जीवनसन्तुष्टिस्तदुद्भूतपुनर्जन्मनिर-भिलाषिताभिव्यक्ता शाश्वते ब्रह्मणि स्थितिं प्रदातुं क्षमस्य मोक्षलक्षणपुरुषार्थस्यावाप्तयेऽथवा सर्वथानित्यस्य दुःखैकसारस्य जीवनस्य पुनरप्राप्तये इति न ज्ञाने, केवलमिदमेव जाने यत् कवि

रयम् - प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः सुखावगाहः क्षतवारिसञ्चयः ।[३१]
दिनान्तरम्योऽभ्युपशान्तमन्मथो निदाधकालः समुपागतः प्रिये !!

इत्यष्टमूर्तिष्वनन्यतमयोरज्ञानोपहित चैतन्ययोस्सूर्यचन्द्रयोर्नामस्मरण मुखादृतुसंहारात्कृतकाव्ययात्रारम्भः -

प्रवर्ततां प्रकृतिहितायपार्थिवः सरस्वती श्रुतिमहती महीयताम् !
ममापि च क्षपयतु नीललोहितः पुनर्भवं परिगतशक्तिरात्मभूः ॥

इत्यत्र तस्यैवस्वेष्टचैतन्यस्य ब्राह्मीमाहेश्वरी कौमारी वैष्णवीवाराही माहेन्द्री चामुण्डा - चण्डिकारुपाः शक्तयोऽथवा ज्ञानेच्छाप्रयत्न रूपाः शक्तयो यस्य परितो व्याप्तास्तदात्म भुवो नीललोहितस्य शिवस्य स्मरणेनाभिज्ञानशाकुन्तलस्य नाटकस्य भरतवाक्येन सह विराममेति। तत्रैव चानभिहितपूर्व स्वाभिलाषं विना कयाचिद्भूमिकयैव सहजतयाभिव्यक्तवान् । पुनर्जन्म विनाशनार्थं कृतनिवेदनोऽयं महाकवि; प्रकारान्तरेण सर्वप्रियं सर्वश्रेयस्करं स्वाभीष्टं परात्परे शिव एव स्वलयत्वमभीत्प्सितवान् । स्वीकृतमपि बभूव तदभीप्सितं भगवतः शरणे निश्चितं यतो हि कालिदाससदृशप्रतिभायाः कश्चिदपि-कविः पुनः धराधाम्नि जनिं नैवालभत ।

सत्यतः कालिदाससाहित्यस्य सर्वविधचिन्तनानन्तरं कथयितुमिम मेव शक्यते यत् -

ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणाहुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्म कर्मसमाधिना !!

इति श्रीमद्भगवद्गीता श्लोक एव कथाञ्चिद् महाकवेश्चैतन्यदर्शने व्याख्यामुखेन सर्वतोऽभि भासत इति शम् !!

---

१. एत एव स्वावरणभूतलोकालोक पर्वततद्बाह्यपृथिवीतद्बाह्यसमुद्रैः सहिता बह्माण्डमुच्यते ।
- स्वामी - रामतीर्थः स्वटीकायाम्

२. यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्य-भिसंविशन्ति तद्विजिज्ञासस्व तद् ब्रह्मेति !! - तैतिरीयोपनिषद् ३-१-१
- आभ्यां महाप्रपञ्चतदुपहित चैतन्याभ्यां तप्तायः पिण्डवदविविक्तं सदनुपहितं चैतन्यं सर्वं खल्विदं ब्रह्म इति वाक्यस्य वाच्यं भवति विविक्तं

सल्लक्ष्यमपि भवति !!

- अज्ञानोपहितं चैतन्यमात्मेति वदन्ति !!
- विषयो जीव ब्रह्मैक्यं शुद्धचैतन्यं प्रमेयं तत्रैव वेदान्तानां पर्यायात् !
- समष्ट्युपहितं सर्वज्ञत्व सर्वेश्वरत्व सर्वनियन्तृत्वादिगुणकमव्यक्तमन्तर्यामी जगत्कारणमीश्वर इति च व्यपदिश्यते सकलाज्ञानावभासकत्वात् यः सर्वज्ञः सर्ववित् इति श्रुतेः, चैतन्यम् !!

व्यष्ट्युपहितं चैतन्यमल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञ इत्युच्यते एक ज्ञानावभासकत्वात् - वेदान्तसारः

३. शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्व प्रधानतया निमित्तं स्वोपाधि प्रधानतयोपादानं च भवति । - वेदान्तसारः

४. अत्रायं पुरुषः स्वयंज्योतिः । बृहदारण्यकोपनिषद् ४-३-९

५. वाग्धेनुर्दुग्ध सतं हि रस यद्बालतृष्णया !
तेन नास्य समः स स्याद् दुह्यते योगिभिर्हि सः ॥ - भट्टनायकः

६. नहि रसादृते कश्चिदर्थः प्रवर्तते !! - आचार्योभरतमुनिः, नाट्यशास्त्रे, षण्ठाध्याये

७. वाङ्मयानीहशास्त्राणि वाङ्निष्ठानि तथैव च
तस्माद्वाचः परं नास्ति वाग् हि सर्वस्यकारणम् !! -भरतमुनिः, नाट्यशास्त्रे, १५-३

८. अनादिनिधनंब्रह्म शब्दतत्त्वं यदक्षरम् !
विवर्ततेऽ र्थ भावेन प्रक्रिया जगतो यतः ॥ - महावय्याकरणो भर्तृहरिः वाक्यपदीये १-१

९. वनवृक्ष तदवच्छिन्नाकाशयोर्जलाशय तद्गत प्रतिबिम्बाकाश-वदनयोरज्ञानादुपहितचैतन्यतयोराधारभूतं यदनुपहितं चैतन्यं तत्तुरीयमित्युच्यते शिवमद्वैतं चतुर्थं मन्यन्त इत्यादि श्रुतेः!! वेदान्तसारः

१०. वागर्थाविव सम्पृक्तौ वागर्थ प्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ !! रघुवंशमहाकाव्यम् १-१

११. वेदान्तेषु यमाहुरेकपुरूषं व्याप्य स्थितं रोदसी, यस्मिन्नीश्वर इत्यनन्यवषियः शब्दो यथार्थाक्षरः । अन्तर्यस्य मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते, स स्थाणुः स्थिर भक्तियोग सुलभोनिः श्रेयसायास्तु वः !!

१२. एकैश्वर्यस्थितोऽपि प्रणतबहुतलो यः स्वयं कृत्तिवासः
कान्ता सम्मिश्रदेहोऽप्यविषय मनसां यः पुरस्ताद्यतीनाम् ।
अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिबिभ्रतो नाभिमानः

सन्मार्गालोकनाय व्यपनयतु स वस्तामसीं वृत्तिमीशः ॥ - मालविकाग्निमित्रम् १-१

१३. द्रवः संधातकठिनः स्थूलः सूक्ष्मो लधुर्गुरूः!
व्यक्तो व्यक्तेतरश्चासि प्राकाम्यं ते विभूतिषु !! - कुमारसम्भवम् २-११

१४. या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा यास्थिता व्याप्य विश्वम् ।
यामाहुः सर्ववीजप्रकृतिरिति याया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्तभिरष्टाभिरीशः ॥ - अभि.शा. १-१

१५. अप्यग्रणीर्मन्त्रकृतामृषीणां कुशाग्रबुद्धे कुशलीगुरुस्ते ।
यतस्त्वया ज्ञानमशेषमाप्तं लाकेन चैतन्यमिवोष्णरश्मेः ॥ - रघु. महाकाव्यम् ५-४

१६. छान्दोग्योपनिषद् - ३-१४-१

१७. यं सर्वशैला परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे!
भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम् !! कुमारसंभवम् १-२

१८. नृत्यं मयूराःकुसुमानि वृक्षा दर्भानुपात्तान् विजहुर्हरिण्यः।
तस्याः प्रयत्ने समदुःखभावमत्यन्तमासीद् रुदितं वनेऽपि !! - रघुवंशम् १४ - ६९

१९. स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै
प्रीतः प्रीतिः प्रमुखवचनं स्वागतं व्याजहार !! मेधदूतम् - पूर्वभागः - ४

२०. मेघदूतम् पूर्वभागः - ५

२१. कुर्वन्सन्ध्याबलीपटहतांशूलिनः श्लाघनीया -
मामन्द्राणां कलमविकलं लप्स्यसे गर्जितानाम् ॥ पूर्वभेध - ३४

२२. द्र. मेघदूत - पूर्वभाग - ६०

२३. द्र. तस्योपान्ते कृतक तनयः कान्तया वर्धितो मे हस्त प्राप्यस्तवकनमि तो बालमन्दारवृक्षः ॥

२४. पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थां, कच्चिद् भर्तुः स्मरसि रति के त्वं हि तस्य प्रियेति ।।

२५. अभिज्ञानशाकुन्तलम् ४-१४

२६. " " ४-५

२७. " " ४-१३

२८. पातुं न प्रथमं व्यवस्यति जलं युष्माषस्वपीतेषु या, नादत्ते प्रियमण्डनापि

भवतांस्नेहेन या पल्लवम्!
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः, सेयं याति शकुन्तलापतिगृहं सर्वैरनुज्ञायताम् !! - अभिशा. ९

२९. अनुमतगमना शकुन्तला, तरुभिरियं वनवासवन्धुमिः !
परभृत विरुतं कलं यथा प्रतिवचनीकृतमेभिरीदृशम् ॥ ....शा. ४ - १०
यं प्रव्रजन्तमनुपेतमपेतमयं द्वैपायनो विरहकातर आजुहाव !
पुत्रैति तन्मयतया तरवोऽभिनेदुः तंसर्वभूतहृदयमुनिमानतोऽस्मि !! - श्रीमद्भागवतम् १-२-२

३०. भूया पथा मे जननान्तरेऽपि त्वमेव भर्ता न च विप्रयोगः ॥ रघुवंश.. - १४-६-६

३१. इष्टान् देशान् विचरजलद प्रावृषा सम्भृत श्रीमाभूदेवं क्षणमपि यते विधुता विप्रयोगः ॥ उ. मेघ. ५२

# कृत्रिममनीषायां "चैतन्य"तत्त्वम्

प्रो. के. एस्. कण्णन्

*पिण्डितार्थः (Abstract)*

यो वै प्राणः सा प्रज्ञा, या वा प्रज्ञा स प्राणः

**- कौषीतक्युपनिषत्** ३.३

सङ्गणकनाम्न्याधुनिके यन्त्रे चेतनालक्षणान्यपि दरीदृश्यन्त इति प्राचुर्येण श्रूयमाणे वादे भूतार्थता वर्तते वा न वेति विषये विचक्षणा विद्वांसोऽपि विमह्युरेव! तथात्वे चेतनाधिष्ठापनचणो मर्त्योऽपि प्रजापतित्वमात्मसाद्विदध्यादेव ! कानि तर्हि धीलक्ष्माणि यन्त्रेऽस्मिन्नावाहितानि विनिवेशितानि वा, कथङ्कारमासादिता चापादिता चेयं धिषणा मनीषिणा मानवेन प्रगल्भेन ? - इतीदृक्षान् प्रश्नान् विचक्षणैकपरिशील्यान् संक्षिप्य प्रस्तोतुं प्रतिष्ठतेऽयं प्रयत्नः । प्रसङ्गतश्च प्रज्ञाप्रतिभे अधिकृत्य भारतीयां भासमप्यारादाविर्भावयति।

सोपानसप्तकवत्या निश्श्रेणिकयाऽऽरोपणं विहितं विषयस्यास्य समस्तस्य। तत्र **प्रथमे** यन्त्रसाधितकस्य वैहायसिकमालोकितं, **द्वितीये** चैतन्य-शब्दार्थविमर्शः, **तृतीये** यन्त्राभिमानिकी परम्परा च विषयत्वेनोपस्थापिताः। मध्यभागमलंकुर्वाणे सोपाने **चतुर्थे** पुनस्स्तरसप्तकम् - यत्र जीवलक्षण-भूतान्याहारस्वीकार-स्वसन्तनन-विकसनादीनि यन्त्रान्वयितयाऽन्विष्टानि । **पंचमे** यान्त्रिककत्थितकदम्बकस्य, **षष्ठे** मनीषाविजृम्भितस्य, **सप्तमे** चान्त्ये प्रतीक्ष्यवस्तुनश्च परामर्शा इति संग्रहः॥

आंग्लग्रन्थानप्याकलय्य प्रायेण ग्रन्थशतकं गवेषितममुष्मिन् परिशीलने । (असर्वावगाहिन्यन्तोट्टङ्किितात्रोल्लिखितसंस्कृतग्रन्थपट्टिका ।)

"प्रज्ञा प्रतिष्ठा"

**-ऐतरेयोपनिषत्** ५.३

"विज्ञातारमरे केन विजानीयात् ?"

- **बृहदारण्यकोपनिषत्**

२.४.१४, ४.५.१५

## कृत्रिममनीषायां "चैतन्य"तत्त्वम्

न हि प्रज्ञापेता वाङ्नाम किञ्चन प्रज्ञापयेत् ...

न हि प्रज्ञापेतं चक्षू रूपं किञ्चन प्रज्ञापयेत् ...

- **कौषीतक्युपनिषत्** ३.७

बुद्धिर्मनोऽहङ्कारा इति चेतनवत्येषा

- **मैत्रायण्युपनिषत्** ६.५

भूतानामस्मि चेतना

- **भगवद्गीता** १०.२२

चैतन्यं सर्वभूतानां शब्दब्रह्मेति मे मतिः

- **शारदातिलकम्** १.१३

चेतनश्चेतनानाम्

- **कठोपनिषत्** ५.१३

बहुभिर्विप्रलापैः किं त्रैलोक्ये सचराचरे ।
यत्किञ्चिद्वस्तु तत्सर्वं गणितेन विना नहि ॥

- महावीरकृतः **गणितसारसङ्ग्रहः** १.१६

## 1

अनारतं व्यतियति जगत्यमुष्मिन्नूत्ननूत्ना विस्मया विविधास्तदा तदा लोचनगोचरीभवन्तीति न परोक्षं विचक्षणानाम् । तथापि गते वर्षशतके हैतुकानां वैज्ञानिकानां या परिष्काराणामाविष्काराणाञ्च प्रसृता परम्परा निरन्तरा, बुद्धिमतामपि सा बुद्धिं विमोहयतीति विषये न विशेरते विचारशीलाः ।

तथा हि । दूरदर्शनदूरश्रवणादीनि निर्निमेषमात्रनिषेवणीयानि योगिवरेण्यैकसमासादनीयानि वेति पुराकाले प्रथितानि साधारणानां पुनः कविकल्पना-कल्पानि, पृथग्जनैरप्याप्यान्याप्यायकानि च सुनिपुणानामप्यधुना । यानि नाम सचेतनानां चिह्नानि सचक्षुषां सपाणिपादानां नूनमनूनानि तैरधुनातनानाममूनि यन्त्राणि । तद्यथा - उद्योगागारेषु (Industry) अत्यौष्ण्यैकसाध्यलोहसंघटनानि (welding) साध्नुवन्ति यन्त्राणि संलक्ष्यन्ते यानि बलशालिनोऽपि नाकलयितुं संनह्यन्ति मनुजाः। एवमेव बृहतामपि द्रव्याणां वर्णसंयोजनं (painting) यन्त्रैरेव विधीयते ! नगोया (Nagoya) नाम्नि जापाने नगरे (Japan) विशाले, प्रतिमासं परःशतयन्त्रजातनिर्माणपरे कार्यागारे (Industry) षण्णामेव मनुष्याणामावश्यकताऽऽपतिता, शिष्टं सर्वं विशिष्टं यन्त्रैरेव जुष्टं दृष्टम् ! फुजिट्सु फनुक् (Fujitsu Fanuc) इत्यभिधे पुनः, यन्त्रनिर्माणचणानि यन्त्राणि समुपकल्पितानीति प्रथितं पुरैव ! आधुनिक्यो घटिकाः (electronic watches) आरभ्य गणकाङ्गोपाङ्गनिचयमपि विनापि मनुजकरक्षेपं साधितममीभिर्यन्त्रतल्लजैर्जीवल्लक्ष्मपल्लवितैः । न चेमानि यन्त्राणि द्विपदानि चतुष्पदानि वा, किन्तर्हि षट्पदानि शरभपादान्यप्यापादितानि यथा पत्रिकासु पठितानि। सूक्ष्मातिसूक्ष्माण्यपि वस्तूनि मनुष्यैर्यानि पुनस्सोपकरणैरपि हृषीकैर्विषयीकर्तुमप्यनर्हाणि यथास्थलं यथाकालं च लीलयैव तेषां शीलनेषु कीलनेष्वपि कुशलानि किल पेशलान्य-मून्युपकरणानि।

प्रतिभाजुषां पुरुषाणामपि परिपाटी संपुटीकृता समीचीनेषु साधनेष्वमीषु । तद्यथा - गद्यपद्यसंग्रथने, गीतवाद्यरेभणे, आकृत्यालेख्यचित्रणे चापि परं प्रावीण्यं प्रापितानि तानि; प्रकृष्टैरपि खेलकैस्साकमष्टापदक्रीडायां परिनिष्ठामधिष्ठापितानि, दृष्टान्येव यांश्चापि पराजिगीषूणि - तदा तदा पराजितवन्त्यपि ! इत्थं परःशतानि साधितानि साधनैरमी-भिरसाधारणैः प्रत्येतुमेवाशक्यानि महान्ति कार्याणि साध्नुवन्ति समवलोकितानि मनीषिभि- रभिनिवेशवशमना-पन्नैस्सत्तर्कसम्पन्नैरनेकैः ।

**2**

किञ्चात इति पृष्टे प्रश्नोऽयं स्वयं पुर एवोदेति - किममूनि यन्त्राणि सधिषणान्युताहो समनीषमनीषावहानि भ्रान्तिभावकानि परीक्ष्यप्रत्याख्येयानीति। का तर्हि धिषणा ? का वा चेतना ? अत एवेदमपि परीक्षणीयमापतति - "Life". "Intelligence", "Consciousness" इत्यादि- पदवाच्यानि कानि ? जीव - चैतन्य - सत्त्व-सप्राणादिपदालप्यान्यपि कानि याथार्थ्येनेति । स्थूलतयैवायमत्र विषय उपन्यस्यते संस्कृतशब्दानेव परामृशन् परिहरंश्च वैवक्षिकैकक्षान्तःपातिनः प्रयोगान् - नदी वहति, रथो गच्छति, स्रुघ्नं गच्छत्येष पन्थाः, स्थाली पचत्येधाः पचन्तीत्यादिकानचेतनेष्वप्यारोपितस्वातन्त्र्यच्छायान्।

जीवजीवनशब्दौ 'जीव प्राणधारणे' (**धातुपाठः**) इति धातोर्निष्पन्नौ ॥ अननं प्राणनमित्यनर्थान्तरौ शब्दौ । (अन प्राणने जीवने वा > '*an*imal') 'प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः' इत्यमरः ।

'चिती संज्ञाने' इत्यस्माद्धातोः 'चित्तं', 'चेतः', 'चेतनः', 'चेतना' - इतीमे शब्दा निष्पन्नाः । चित्तस्य त्रैगुण्यमेवमभ्यधायि **योगसूत्रभाष्ये** (१.२) 'चित्तं हि प्रख्याप्रवृत्तिस्थितिशीलत्वात्त्रिगुणम्'। अथ चित्तवृत्तीनां पञ्चतयीत्वमेवमुक्तं **योगसूत्रे** (१.५) - वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः । चित्तविक्षेपकादीनां निरूपणं **योगसूत्रे** १.३० इत्यादिषु द्रष्टव्यम् । चेतनश्चेतना चैवं परस्परं भिद्येते - 'चेतनः स्यात् सहृदयप्राणिनोः, चेतना तु धीः' । **अमरकोषे** पुनश्चेतन-चेतनाशब्दौ चित्तशब्देन सहैव निवेशितौ। चित्तपर्यायाणि नाम 'चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः', इति कालवर्गपठितानि । यत्समनंतरमेव धीवर्गः पठितः, यत्र धियः पर्यायाणि परिशीलितान्यादौ 'बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः। प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः'॥ इति । तत्र धीपर्यायाणि सर्वाणि पदानि स्त्रीलिङ्गानि, यथेह **पञ्चदश्याम्** १.७ संविदेका स्वयंप्रभा - इति, यथा वा 'संविदेव हि भगवती विषयसत्त्वोपगमे शरणम्।' इत्यत्र (**प्रकरणपञ्चिकायाम्**)। (धीविशेषो मेधाभिधो 'धीर्धारणावती मेधा' **इत्यमरकोशे** लक्षितः ।) 'बुद्धिरुपलब्धिर्ज्ञान-

मित्यनर्थान्तरम्' इति तु **न्यायसूत्रे** १.१.१५ । मनःपर्यायाणि पुनर्नपुंसकानि । 'मनः', 'मानसं', 'मनीषा', 'मतिः' - इतीमे शब्दाः सर्वे 'मन ज्ञाने' इति धातोः निष्पद्यन्ते । 'केनेषितं पतति प्रेषितं मनः ? केन प्राणः ?' इत्यप्राक्षीत्**केनोपनिषत्** १.१ । एवं तर्हि प्राण - जीव - चेतनाः नितरां सम्बद्धाः । चेतनैव चैतन्यमिति स्वार्थे भावे वा ष्यञित्याहुः । यश्चापि लौकायतिको राद्धान्तः 'चतुर्भ्यः खलु भूतेभ्यश्चैतन्यमुपजायते । किण्वादिभ्यस्समेतेभ्यो द्रव्येभ्यो मदशक्तिवत् ॥' (**सर्वदर्शनसंग्रहो**ल्लिखितः) इति, न नामायमिदानीन्तनैरपि सहठैर्हेतुवादिभिर्विज्ञानिभि-रंशलेशतोऽपि प्रयोगालयेषु प्रतिष्ठापितः रासायनिकद्रव्यजातसंमिश्रणेन । अथ ' चैतन्य- मात्मा । ' - इति प्रथितं प्रथमं **शिवसूत्रं** शोभमानम् (तत्रैव सर्वदर्शनसंग्रहे) ।

जडानां पदार्थानां चैतन्यं निराकुर्वन्नेष श्लोकः **शब्दार्थचिन्तामणौ** लभ्यः - चैतन्यं परमाणूनां प्रधानस्यापि नेष्यते । ज्ञानक्रिये जगत्कर्त्र्यौ दृश्येते चेतनाश्रये ॥ इति । कथं तर्ह्यच्छन्दानि जडानि यन्त्राणि चैतन्यवन्ति स्युरिति हि प्रश्नः?। मनुष्येष्वपि जडानित्थं लक्षयन्ति - 'इष्टं वानिष्टं वा सुखदुःखं वा न वेत्ति यो मोहात् । परवशगस्स भवेदिह नित्यं जडसंज्ञकः पुरुषः ॥ (इति **रामाश्रम्यां** भानुजिः)। तमःप्रभवो 'मोहः पापीयान्' इति **न्यायसूत्रे** (४.१६)। अविवेकिनो जडा उच्यन्तेऽचेतसश्चेति । यथा **गीतासु** ३.३२ विद्धि नष्टानचेतसः । (प्रसन्नचित्तस्तु सचेता इति, यथा तत्रैव ११.५१ सचेताः प्रकृतिं गतः- इति। सहृदया अपि सचेतसः - यथा 'सचेतसामनुभवः प्रमाणं तत्र केवलम्' - इति प्रयोगे।)

उत्कटश्च मोहो मूर्च्छा, यत्र संज्ञाऽभावः (- संज्ञा नाम प्रज्ञैव)। मूर्च्छामित्थं विशदी-करोति **सुश्रुतसंहिता** २.४६.६. संज्ञावहासु नाडीषु पिहितास्वनिलादिभिः। तमोऽभ्युपैति सहसा सुखदुःखव्यपोहकृत् ॥ सुखदुःखव्यपोहाच्च नरः पतति काष्ठवत् । मोहो मूर्च्छेति तां प्राहुः ॥ इति । यथा नामाद्यतनवैद्याः "neurophysiological basis" इति प्रथयन्ति, तथैव प्रज्ञामूर्च्छाद्यवस्थानां नाडीनिबन्धनता विस्पष्टमाविर्भाविता सुश्रुतादिभिश्चिरन्तनै-र्विद्योतितवैद्यविद्यैः । मूर्च्छामापन्नस्येन्द्रियस्तम्भं दुःखस्याप्यवेदनं च कालिदासः काव्येष्वाह यथा

**कुमारसम्भवे** ३.७३ मोहेन संस्तम्भयतेन्द्रियाणाम्, **रघुवंशे** १४.५८ मोहादभूत् कष्टतरः प्रबोधः - इत्यादिषु स्थलेषु ।

जडा ह्यचेतनाः । अथ सस्यानि तावन्न जडाः पदार्थाः- इति विप्रतिपत्तिविदूरं विज्ञानिसमाजे सम्यक् स्थापितं जगदीशचन्द्रबोसमहाशयेन (Jagadish Chandra Bose)। तथ्यमत्रत्यं पुनः प्रागेव जगाद **मनुः** (१.४९) तमसा बहुरुपेण वेष्टिताः कर्महेतुना । अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः ॥ इति। जडानां स्वातन्त्र्यं स्वतःप्रवृत्तिं च निराकुर्वन्नयमपि श्लोकः **शब्दार्थचिन्तामणौ** लभ्यः - रथादौ नियता चेष्टा चेतनेनानधिष्ठिते । न दृष्टा, चेतनस्तेन प्राणादीनां प्रवर्तकः ॥ इति। आह **मैत्रायण्युपनिषद्** २.३ शकटमिवाचेतनमिदं शरीरम् - इति । आह **भाषापरिच्छेद**कारः (४९) शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः - इति ।

चेतनाचेतनयोर्विषये भ्रान्तिः कृपणानाम् - अर्थात् न पुनर्निपुणानाम्। यथाह कविवरः कालिदासः - कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु । (**मेघदूते** १.५)। काव्येषु पुनः 'भावानचेतनानपि चेतनवच्चेतनानचेतनवत् । व्यवहारयति यथेष्टं सुकविः काव्ये स्वतन्त्रतया ॥' (**ध्वन्यालोकः** ३.३३+) यतो हि 'निरङ्कुशाः कवयः' । 'चेतना संविदि स्त्रियाम् । वाच्यवत्प्राणयुक्ते' इत्यपि कोशः ।

प्रजापतिः प्राणः प्रजाश्चेन्द्रियाणि । 'एष उ एव प्राणः । एष हीमाः सर्वाः प्रजाः प्रणयति।' (**शतपथब्राह्मणम्** १०.५.२.१४) । मनोबुद्ध्यहं-काराणामन्तःकरणमिति व्यपदेशः, यथा **सांख्यकारिकासु** (३३) 'अन्तःकरणं त्रिविधम्' इति । तानि हि लिंगं क्षेत्रज्ञस्य यथा- **मैत्रायण्युपनिषदि** (२.५) 'क्षेत्रज्ञः संकल्पाध्यवसायाभिमानलिंगः' इति। संबन्धाश्चामीषामित्थं प्रस्तुताः **पञ्चदश्याम्** (१०.१४) अहङ्कारः प्रभुस्सभ्या विषया नर्तकी मतिः । तालादिधारीण्यक्षाणि दीपस्साक्ष्यवभासकः ॥ इति ॥ इन्द्रियमनोबुद्धीनाम् अश्वाभीषुसूतरूपेण प्रकारान्तरेण रूपणमपि पारस्परिकसम्बन्ध-प्रतिपादकमुप-पादितमुपनिषदि **कठश्रुतौ** ३.३. "(आत्मानं रथिनं विद्धि शरीरं रथमेव तु ।) बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥ ४ इन्द्रियाणि हयानाहुः ॥" इति । चित्तमप्याकलय्यान्तः करणचतुष्ट्वमपि ब्रुवते।

लक्षणान्यमीषां **विवेकचूडामणौ** (९५-९६) निरूपितानि यथा - "निगद्यतेऽन्तःकरणं मनो धीरहंकृतिश्चित्तमिति स्ववृत्तिभिः। मनस्तु संकल्पविकल्पनादिभिः, बुद्धिः पदार्थाध्य-वसायधर्मतः । अत्राभिमाना-दहमित्यहंकृतिः स्वार्थानुसन्धानगुणेन चित्तम्"॥ एषु मध्ये मनसः सामर्थ्यमित्थं प्रतिपादयति **तर्कभाषा** - 'मनः सर्वेन्द्रियप्रवर्तकमान्तरेन्द्रियम्, स्वसंयोगेन बाह्येन्द्रियानुग्राहकम् - अत एव सर्वोपलब्धिकारणम् - इति ।

जीवसमाह्वयः "आत्मा"पि ('क्षेत्रज्ञ आत्मा पुरुषः') 'अत सातत्यगमने' इति धातोरागतस्सञ्जाग्रदादिसर्वावस्थास्वनुवृत्तिं तस्याह । 'आत्मा कलेवरे यत्ने स्वभावे परमात्मनि । चित्ते धृते च बुद्धौ च परव्यावर्तनेऽपि च ॥' इति **धरणीकोशः** । क्षेत्रज्ञः पुरुषो ह्यात्मा संसारी चेतनो मतः - **इत्यभिधानरत्नमाला** । आत्मशब्दं पुनर्धातुत्रितयादागतमाहुः - यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह । यश्चास्य सन्ततो भावस्तस्मादात्मेति गीयते॥(**लिङ्गपुराणम्** ७०.९६) इति । (न चात्र वैचित्र्यं शङ्क्यमग्निशब्दस्यापि तथात्वमुद्दध्रे हि **निरुक्तकारः** ७.१४ अग्निस्त्रिभ्य आख्यातेभ्यो जायत इति शाकपूणिः- इति ।) अर्थात् आप्तिरादानमदनं सन्ततभावश्चेत्यात्मनो लक्षणान्याह चत्वारि । यन्त्रेष्वपि चातुर्थ्यमीदृक्षं किं लक्ष्यत इति लक्षणीयं ननु, यत्पुनःपरामृशामः परस्तात् ।

**तर्कसंग्रहे** हि 'ज्ञानाधिकरणमात्मा' - इति लक्षितम् । आत्मलिंगनिकुरुम्बमाह **वैशेषिकसूत्रे** ३.२.४ प्राणापान - निमेषोन्मेष - जीवन - मनोगतीन्द्रियान्तरविकाराः सुखदुःखेच्छाद्वेषप्रयत्नाश्चात्मनो लिङ्गानि - इति। सारवती **चरकसंहितो**क्तिः १.४८ सेन्द्रियं चेतनं निरिन्द्रयमचेतनम् - इति । मनःप्राणेन्द्रियसम्बन्धमाह **हठयोगप्रदीपिका** ४.२९ - इन्द्रियाणां मनो नाथः, मनोनाथस्तु मारुतः । इति । 'प्राणबन्धनं हि मनः' इति **छान्दोग्योपनिषत्** ६.८.२ । का निरुक्तिरिन्द्रियशब्दस्येत्याहा**ष्टाध्यायी** ५.२.९३ इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा - इति । व्याख्याती यत्सूत्रमाह **काशिका** - इन्द्र आत्मा, स चक्षुरादिना करणेनानुमीयते, नाकर्तृकं करणमस्ति । 'इन्द्रेण दृष्टम् = आत्मना दृष्टम् ... इत्यादि । **न्यास**कारश्च 'इन्द्रेण नीयन्ते' -

इत्यादिकमपि । 'ज्ञानं क्रिया च भूतानां जीवतां जीवनं मतम्' इति मतमुत्पलदेव-पादानामुद्धरत्यभिनवगुप्त- स्स्वीय**तत्त्वविवेका**ख्यायां **परात्रिंशिका**व्याख्यायाम् ।

अथ नैघण्टुकैर्दशाधिकानि पर्यायाणि प्रज्ञाया उल्लिखितानि यथा, **निरुक्तम्** ३.९ "केतः, केतुः, चेतः, चित्तम्, क्रतुः, असुः, धीः, शचीः, माया, वयुनम्, अभिख्या - इत्येकादश प्रज्ञानामनि ।" आत्मनश्च सर्वेषु व्यापारेषु प्रज्ञायाः पारम्यं व्याहरन्त्युपनिषदाह - प्रज्ञया वाचं समारुह्य वाचा सर्वाणि नामान्याप्नोति..., प्रज्ञया चक्षुः समारुह्य चक्षुषा सर्वाणि रूपाण्याप्नोति ... प्रज्ञया हस्तौ समारुह्य सर्वाणि कर्माण्याप्नोति ... ॥ (**कौषीतक्युपनिषत्** ३.६)। केषुचित्स्थलेषु मनःशब्दमहच्छब्दौ पर्यायत्वेन व्याख्यातौ। तद्यथा (**मनुस्मृतौ** १.७४, १.७५ श्लोकयोर्व्याख्यानं कुर्वन्) **कुल्लूकः**, मनो महान् सृष्टिं करोतीति। एवमेव कदाचिन्मनस्तात्पर्यकस्य बुद्धिशब्दस्य प्रयोगः, यथा **न्यायसूत्रे** १.१.१७ 'प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः' । शरीरस्य पाषाणसदृशस्यान्तर्वायुरूपेण प्रवेशादनन्तरमेव ज्ञानोदयः, यथा **मैत्रायण्युपनिषदि** २.६ अश्मेवाप्रबुद्धाः, प्रतिबोधनाय ... वायुः .... प्राविशत् । वाय्ववस्थानावधिकञ्जीवनमाहुर्यथा **हठयोगप्रदीपिकायाम्** २.३ 'यावद्वायुस्स्थितो देहे तावज्जीवनमुच्यते ।' इति । धीसामर्थ्यप्रतिपादनं च योगशास्त्रेष्वित्थम् - यथा **योगसूत्रे** ३.३६ ततः प्रातिभश्रावणवेदनाऽऽस्वादवार्ता जायन्ते। **मणिप्रभा**ख्या व्याख्या च (योगसूत्रं ३.३८ अधिकृत्य) 'सर्वत्र व्याप्तिशीलस्य चित्तस्य स्वशरीरमात्रे सङ्कोचेन स्थितिर्बन्धः, तस्य कारणं धर्माधर्मौ, तयोस्संयमेन शैथिल्यं भवति, प्रचरति चित्तं (सर्वत्र)।' इति । मनोवाक्प्राणानामृद्धिमीहमानं सूक्तमिदं मननविशेषमर्हति यस्यायमादिमो मन्त्रः (**अथर्ववेदः** ६.४१.१.) "मनसे चेतसे धिय आकूतय उत चित्तये । मत्यै श्रुताय चक्षसे विधेम हविषा वयम् ॥" मूलाधारादिचक्रेषु षट्त्सु, नानाधारणाफलाञ्छेमुषी-प्रकारान्निरूपयन्तस्तान्त्रिकास्तत्र क्रमेणैताः- स्थिता आहुः-'मतिः, स्मृतिः, बुद्धिः, प्रज्ञा, मेधा, प्रतिभा' चेति, सप्तमे सहस्रारे तु 'संविद्' - इति, यथाह लक्ष्मीधरो **लक्ष्मीधरायां सौन्दर्यलहरी**व्याख्यायाम् नवनवतितमश्लोकव्याख्यानावसरे।

**3**

यन्त्राणां स्वयंप्रवृत्तानामुल्लेखाश्च तत्र तत्र भवन्ति । ग्रीकाणां (Greeks) देवता हेफेस्टस् (Hephaestus) स्वर्णमयीः कार्यकारिण्यः सृष्टवतीति श्रूयते। चतुर्थे शतमाने क्रिस्ताब्दे, 'ताओ ऋषीणां' कृत्रिमाणामाभीक्ष्ण्येन भगवन्तं बुद्धं प्रणमतां सृष्टिः निरुपिता अस्ति ।

अस्मदीये देशेऽपि **प्रतिज्ञायौगन्धरायणे** चलतः कृत्रिमगजस्योल्लेखो लक्ष्यते। एवमेव **कथासरित्सागरे**ऽपि प्राणधरवृत्तान्त(७.९) उल्लेखार्ह एव । **वेतालपंचविंशतौ** विष्णुस्वामिकथायां मृतस्य मृगेन्द्रस्यास्थ्यादीनि संकलय्य तस्मिन् प्राणारोपणविधानं निरूपितम् ।

एवमेव अल्बर्टस् म्याग्नस् (Alberts Magnus), रोजर् बेकन् (Roger Bacon), लियोनार्दो दा विंचि (Leonardo da Vinci), रेनि डेकार्टि (Rene Descares)- प्रभृतयोऽपि कृत्रिमयन्त्रनिर्माणे प्रयेतिरे । किंचिदकिंचिद्वा साफल्यमप्यलभन्त । अन्ततश्च जीवावेशनं हि समेषाममीषामभीप्सितमासीत् यच्च न केऽपि शेकुः । फ्रान्केन्स्टेन् (Frankenstein) इति तावत् प्रसिद्धैव कविकल्पना।

जीवानां भ्रमणं चक्रयन्त्रे यथेति **मनुस्मृतिः** १२.१२४ 'एष सर्वाणि भूतानि पंचभिर्व्याप्य मूर्तिभिः । जन्मवृद्धिक्षयैर्नित्यं संभ्रामयति चक्रवत् ॥' अथ **गीता**स्वपि (१८.६१) 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया॥' इति यन्त्रोल्लेखः परिस्फुटः। **रामायणमहाभारता**दिषु पुनर्मत्स्ययन्त्र-अश्मयन्त्र - इषूपलयन्त्रादीनि लक्ष्यणि । 'काष्ठयन्त्रमयं सर्वं चेष्टमानं सजीववत्' - इति **कथासरित्सागरो**दीरितम् । गीतोक्त्याकूतिं व्याख्याती **पंचदश्ये**वमाह ६.१७३ 'देहादिपञ्जरं यन्त्रं तदारोहोऽभिमानिता । विहितप्रतिषिद्धेषु प्रवृत्तिर्भ्रमणं भवेत् ॥ ६.१७५ अन्तर्यमयतीत्युक्त्याऽयमेवार्थः श्रुतौ श्रुतः। पृथिव्यादिषु सर्वत्र न्यायोऽयं योज्यतां धिया॥' इति । अत्रोल्लिखिता श्रुतिश्च **बृहदारण्यकोपनिषत्** ३.७.३. यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति - इत्यन्तर्यामिब्राह्मणाभिधाना । एवमेव योऽसु योऽग्नौ योऽन्तरिक्षे यो वायौ

यो दिवि य आदित्ये यो दिक्षु यश्चन्द्रतारके य आकाशे यस्तमसि यस्तेजसि - इत्यादिरूपेणाधिदैविकनिरूपणपरा च सा । अनुवर्तते च सकलमाधिभौतिकाध्यात्मिकयोरपि । यमनं खलु यन्त्रकार्यम् । 'नियन्ता नियमो यमः' विष्णुरिति **विष्णुसहस्रनाम्नि** ।

मायिनं महेश्वरं स्तुवतस्**समराङ्गणसूत्रधार**कारस्यायमपि पेशलश्श्लोको विबुधैःपरिभावनीयः (३१.१) भ्राम्यद्दिनेशशशिमण्डलचक्रश-स्तमेतज्जगत्त्रितययन्त्रमलक्ष्यमध्यम् । भूतानि बीजमखिलान्यपि संकलय्य यस्सन्ततं भ्रमयति स्मरजित्स वोऽव्यात् ॥

'अलक्ष्यमध्य'रूप-असुलभविभावनीयाऽऽन्तरङ्गिक तर्क वत्तामनियत्तानिग्राह्यचेष्टा-कदम्बकजुष्टताश्चानुलक्ष्य हि भर्तृहरिर्भर्त्सयामास 'कपटशतमयं', 'सर्वमायाकरण्डं' 'स्त्रीयन्त्रम्'! (**सुभाषितत्रिशती** २.७६) । अथ केदारेष्वपि कलमसाफल्यसमृद्धिं यन्त्रघटितां प्राचुर्यवतीमेव मनसिकृत्यौपम्यकृत्यार्थमाकलय्यास्तोष्ट यतिश्रेष्ठश्शंकर**शिवानन्दलहर्यां** (श्लो ४०) विश्वेशं शिवम् - 'धीयन्त्रेण वचोघटेन कविताकुल्योपकुल्याक्रमैरानीतैश्च सदाशिवस्य चरिताम्भोराशिदिव्यामृतैः । हृत्केदारयुताश्च भक्तिकलमास्साफल्यमातन्वते दुर्भिक्षान्मम सेवकस्य भगवन् विश्वेश भीतिः कुतः?' ॥ इति । (एषैव परिपाटी सुभाषितेष्वपि - 'किं कनिष्ठाः किमु ज्येष्ठाः घटीयन्त्रस्य दुर्जनाः !', 'एतान् प्रपश्यसि घटान् जलयन्त्रचक्रे रिक्ता भवन्ति भरिता, भरिताश्च रिक्ताः ।' - इत्यादिषु)।

यन्त्राणां यमनं सूत्रेण साध्नुवन्ति स्म साधारण्येन - पुत्तलिकानां यथा नाटनेषु (Puppet Show) । नाट्यांगभूतं समस्तं सूत्रशब्दवाच्यं, यद्धि धारयमाणस्सूत्रधारः ('रणरंगनटस्यास्य सूत्रधार इवाभवत् ।' - इति **यादवाभ्युदये** २२.१४० यथा) । नानौपयिकं यन्त्रमिव नानायुक्तिकं जगत्तंत्रं, सूत्रं च यस्य संदृभ्नन् सूत्रधारस्साक्षाद् भगवानेव, यथाह भासः **दूतघटोत्कचे**, १, 'नारायणस्त्रिभुवनैकपरायणो वः पायादुपायशतयुक्तिकरः सुराणाम् । लोकत्रयाविरतनाटकतन्त्रवस्तुप्रस्तावनप्रतिसमापनसूत्रधारः ॥' जगत्तननं तु तन्तुना

सूक्ष्मेण वायुरूपेण । 'वायुना.. सूत्रेण .. सर्वाणि.. सन्दृब्धानि ।' **बृहदारण्यकोपनिषत्** ३.७.२. । लोकेऽपि 'वाचा तन्त्या नामभिर्दामभिः सर्वं सितम्' इत्यै**तरेयारण्यकम्** (२.१.६)

## 4 (a)

कानि तर्हि जीवलक्षणानि ? - इति किंचिदत्र परामर्ष्टव्यम् । तनुवृद्धिराहारस्वीकार स्स्वतन्त्रचलनं, स्वसन्तननम् - इतीमानि लक्ष्माणि प्रथितानि । एवमेव शरीरस्यापि निर्दिष्ट आकारः, संरचनं च परिवर्तमानेऽपि परिसर आत्मधारणसामर्थ्यं, वार्धक्यं मरणं चापि कैश्चिद् देहिनां लक्षणानीप्युपस्थापितानि । परन्त्वेषु कानिचन मुख्यानि चिह्नानि । उदाहरणार्थं साधारण्येन सस्यानां स्वतन्त्रचलनं न संभविष्यति । 'कार्यकर्तारो मधुकराः' (Working Bees) संभोगानर्हाः !

वैरस् (Virus) नामकानि तावत् जीवाजीवकल्पानि । 'क्षेत्र'स्थानि प्ररोहन्ति सन्तन्यन्ते च, अन्यत्र तु निद्रावस्थामापन्नानीव निश्चेष्टानि न च मृतान्यपि भविष्यन्ति - इत्यतो हि म्लिष्टस्वायत्ततापरवत्ताहेतोर्जीवलक्षणपरिच्छेदे क्लेशः। आहारस्वीकारपचनादिकमपि न तेषां समेषां संभवेत् (प्रलयावस्थापि जीवानां नातिभिन्नां दशां निष्पादयतीति श्रूयते ! आह हि **मनुः** (१.५३) तस्मिन् [= भगवति] स्वपति सुस्थे तु कर्मात्मानः शरीरिणः । स्वकर्मभ्यो निवर्तन्ते मनश्च ग्लानिमृच्छति ॥ (१.५५) तमोऽयं [= जीवः] तु समाश्रित्य चिरं तिष्ठति सेन्द्रियः । न च स्वं कुरुते कर्म तदोत्क्रामति मूर्तितः ॥ ) ।

## (b)

एवं च संरचनात्मिकतया (structure) (युक्ताहारसेवनद्वारा) शक्तिसंपादन-विनियोजनवत्तया (energy processing), करणीयविषये क्रमिकपरिशीलनवत्तया (information processing), संन्तनन-स्वभाववत्तया (reproduction) च सस्यानि मृगाश्च, प्राणित्वेन परिगृह्यन्ते । यन्त्रेष्वपि प्रचुराणीमानीत्याहुराधुनिकाः । स्वेदमूत्रपुरीषोत्सर्ग इव प्राणिनां, यन्त्रेष्वपि (विद्युच्छक्ति (electrical energy) रूपाहारस्वीकरणं, कार्यानन्तरं कार्यसमकाले

वा ), दाहशक्ति (heat energy) रूपोत्सर्गव्यवस्था समस्त्येवेति समर्थयन्ते ते । यत्तु जीवजातं समस्तमाम्लजनक इंगालसमुत्थ (hydrocarbons) रासायनिकद्रव्य-परिणामविशेषभूत-भौतिकशरीरवदिति तादृग्लक्षणं प्रतीक्षन्ते यन्त्रेष्वपि, सा पुनः प्रतीक्षा सिलिकान् (silicon) आख्यधातुविशेष भूयस्त्ववत्तयैव कृतार्थितेति नात्र वैमत्यं युक्त्यनुगमाहुः ।

या नाम जन्मिनां संहननविशेषसंरचना नानाङ्गनानोपाङ्गादिरूपा क्रियादृष्ट्या नाति-व्यतिरिक्ता व्यवस्था गणकयन्त्रेषु रोबोट्यन्त्रेष्वपि संलक्ष्यत एव । VLSI - Circuits इत्यादि व्यवस्थासूभयमपि दृश्यते - असुलभसंवेद्योऽङ्गाङ्गिभावः (complexity of structure) अल्पिष्ठेऽवकाशेऽनल्पो वस्तुविन्यासः (10000 transistors in 0.125x0.125 sq.cm), त्रुटिकालेऽप्यगण्यक्रमशालिक्रियाजालवत्ता च (complexity of sequential functions), मनुष्यमस्तिष्केऽपि येन प्रकारेण नरमण्डले विद्युत्तत्त्वसूक्ष्मांशसंचरणविशेषः (synapses), तथा यन्त्रेष्वपि, यद्यप्ययमपि भेदो वरीवर्ति यत् यत्कर्म कर्तुमल्पीयसीमेव विद्युच्छक्तिमपेक्षते मस्तिष्कं, ततोऽप्यतिबहुतरया नाम शक्त्या साध्नुवन्ति कार्याणि यन्त्राणि । अत्रैव हि क्रमोपक्रमिकया यत्क्रियाजातं प्रचलति (information-processing - इत्यभिधानयुतं) तदुभयोः सामान्यमेव ।

## (c)

कृत्रिमकार्यकारियन्त्राणि (robots) स्वसदृशान्यन्यानि यन्त्राणि निर्मातुं प्रभवन्तीति कृत्वा सन्तानधर्मा (reproduction) ऽपि तेषां लम्भितप्राय एव ! यद्यपि मनुष्येषु सर्वे पुरुषाः पुंस्त्वयुक्ता न भविष्यन्ति, सन्तानशक्तिराहित्येऽपि न पुनर्मनुष्यत्वात्प्रच्यवेरञ्जातेः । नतरां शिशवो बालका बालिका वाऽतिक्रान्तार्तवा नार्यो, वृद्धा वा । प्रजातन्तुव्यवच्छेदनतो न विरज्येरन् ये केचन येषामपि प्राणित्वमविहन्यमानं तावत्तावतैव । यदि पुनर्मनुष्यप्रेरणयैव यन्त्राणां 'सन्ततिवर्धनं' संभवीत्याक्षिप्यते, तादृश्येवावस्था दृश्यते प्राणिष्वपि केषुचित् (पण्डा Panda प्रभृतिषु) मृगालयसंवर्धितेषु - यतो हि भग्नप्रवृत्तिकास्तादृक्षा मृगास्सन्दृष्टाः । न हि नाम

सस्यान्यपि संभोगार्थं बीजप्रसारणं स्वत एव प्रभवन्ति विधातुम् - तद्यथा कानिचित् सस्यानि स्वसन्तानविवृद्ध्यर्थं मधुकरेभ्यः साहाय्यमादातुं मधुकरीसदृक्षमेव पुष्पजातमात्मनि परिकल्प्य संभोगेच्छया तैरागतैः स्वार्थं सम्पादयन्ति संलक्ष्यन्ते ! इत्थं स्वाधीनसंभोगक्षमता निरस्या परिशीलितसस्योदाहरणैः । संभोगप्रकाराश्चापि नैकरूपा हि कृमि-वनस्पति-प्राणि- मनुष्यवर्गेषु । अतो यन्त्राणि स्वाभिन्नान्यन्यानि यन्त्राणि समुत्पादयन्ति सन्ति स्वसन्तान-विवृद्धिपराणि मन्तव्यानीत्यप्याहुः ।

न केवलं स्वतोऽभिन्नान्यपि तु स्वतो भिन्नानि यन्त्राण्यप्युत्पादयन्तीमानि रोबोट् -यन्त्राणि, अन्ततो गत्वा स्वनिर्मातृकार्यागार (factory) समुपकल्पनेऽपि समर्थानि सन्दृष्टानि यानि पुनर्न कोऽपि प्राणिवर्गः साध्नुवन् जातुचित् संलक्ष्यो जनकः स्वजनकयोरेव !! न च स्वसदृशवस्त्वन्तरनिर्माण एवान्यविलक्षणं जीववल्लक्षणम् । स्फटिकानां सदृशातिसिक्तद्रवान्तर्वर्तिनां (Saturated Solution) शरीरवृद्धिः लोकसन्दृष्टा। न च तावता जीववत्त्वारोपणं तत्र विधीयते। तत्रापि केषांचित् पुनः स्फाटिकबीज (crystal seeds) प्रभावादेव तथा वृद्धिः सेत्स्यति ।

(d)

गणकानामपि 'विकासः' यथा जीवानाम् अस्ति किम् ? - इत्यस्यापि प्रश्नस्य एवमुत्तरम् - तत्रापि सन्तानसोपानषट्कं (six generations) सञ्जातं कतिपयेष्वेव दशमानेषु (decades) । तद्यथा प्रथमसन्ताने घर्मनालिकाः(thermionic valves in the 1st generation) द्वितीये अन्यत् (transistors) तृतीयेऽपरं (simple integrated circuits), चतुर्थेऽन्यत् (VLSI circuits), पंचमेऽन्यत् (Intelligent Systems), अधुना प्रचलच्छष्ठम् ।

एवमेव रोबोट्यन्त्रेष्वपि। प्रथमसन्ताने गृहाणनिधेहिकर्मकराणि (Generation 1 : Pick-and-Place); अग्रिमे ऐन्द्रियिकशक्त्यधिकानि (Generation 1.5 : Sensory controlled); अग्रतश्च हस्तनेत्रसांगत्यवन्ति (Generation 2 : Hand-Eye Coordination); तत्पश्चात् ज्ञानेन्द्रियकर्मेन्द्रियक्रियाः(Generation 2.5 : Perceptual Motor

Function), एचं च धीपाटवबलात् युक्तायुक्तक्रियाक्रमाः (Generation 3 : Intelligent Choice between Strategies)। रोबोट्विषयकमिदं तावन्नेदानीं यावत्समस्तं साक्षात्साधितम्, अपि तु साधनीयतया सोपपत्त्युत्प्रेक्षितो विषयः ।

(e)

एवमेव विद्वत्पद्धतिव्यवस्थया (Expert Systems) बह्वेव साधितमस्ति। कार् (Car) आदिवाहनेषु मनुष्येषु च संभवतां "रोगाणां" मीमांसापि (Fault Diagnosis) साधितममीभिर्यन्त्रैः । संबद्धांशव्यवस्थितपट्टिकाः (Databases) सुष्ठु स्थापिता एषु । रोगलक्षणानां पट्टिका, लक्षणेषु पारस्परिकसंबंधानां पट्टिका, निदाननिर्णयपट्टिका, औषधविनिश्चयपट्टिकाश्च व्यवस्थापिताः (Catalogue of Symptoms, Symptom Relationships, Diagnosis, Medication) इत्यादयोंऽशाः तत्र सम्भवन्ति । MYCIN इति यन्त्रप्रक्रमे चतुःशतनियमानामारोग्यसंबद्धानां कार्यकारणनैयत्यरूपेण विनिवेशनं विहितं (विंशतिवर्षेभ्यः प्रागेवेतः) ! INTERNIST नाम्नि प्रक्रमे तु एकलक्षनिर्णयानां रोगलक्षणनिदानसंम्बद्धानां व्यवस्थितो विन्यासः साधितः । एवमेव HEARSAY - II, HEARSAY - III इत्यादिषु भाषणार्थाधिगमनं प्रयतितम् ॥

कथातात्पर्याधिगतिरपि साधिता SAM (Script Applier Mechanism) इति प्रक्रमे। संगीताभिज्ञानमपि EXPLAIN, OBSERVER, PALETTE प्रभृतिषु राद्धं प्रक्रमेषु । गानमेव निरूपितं ILLIAC नाम्नि प्रक्रमे चत्वारिंशद्वर्षेभ्यः प्राक्! Mark V प्रक्रमे चतुरंग- क्रीडा (Chess) सामर्थ्यमपि विनिहितम् । अस्यां क्रीडायां "स्वतः परिष्कारो"ऽपि साधितः ID3 प्रक्रमेण !

एवमेव मनुष्याणां ध्वनेः प्रत्यभिज्ञानं, मुखस्य प्रत्यभिज्ञानम् - इत्यादिकमपि साधितम्। एवमेव रासनघ्राणनस्पार्शनान्यपि किंचित्किंचित्साधितानि । अत्र सर्वत्र बह्वस्ति साधनीयम् इत्यपि स्पष्टमभ्युपगतमेव विज्ञानिभिः । मनुष्यमस्तिष्के यादृश्यः क्रियाः प्रचलन्ति, तादृश्योऽपि यन्त्रे समारोपिताः ।

(f)

साधारण्येन सस्येषु वा पशुषु वा मननरूपं कर्म प्रवर्तत इति नांगीक्रियते - स्फुटतया तस्याविभावनात् । परन्तु तेषामपि क्लिष्टप्रसंगेषु मस्तिष्के वैद्युतक्रियाः प्रचलन्त्यो दृष्टा इति तैरपि मनुष्यैर्यथा मननं विधीयत एव । मननसामर्थ्यं यन्त्रेष्वाविर्भावयितुं यतमानैर्विज्ञानिभिरधिगतैर्विषयैर्मनुष्यमस्तिष्करहस्यान्यपि कानिचन समासादितानीति महानुपकार एव विहितः मस्तिष्कक्रियाकलापस्याधिगमने ! चित्ते या याः स्थितयस्संभवन्ति तासां समासां नरादिमण्डले प्रातिस्विकानि लक्ष्माणि लक्ष्यन्त एवेति विज्ञानिभिः प्रतिपादितम् विंशतिवर्षेभ्यः प्रागपि । समस्तस्यापि शरीरस्य प्रतिनिधीभूताः अंशाः मस्तिष्के स्वस्वस्थानेषु व्यवस्थिता एव । तेष्वपि तारतम्यव्यवस्था वर्वर्ति । मस्तिष्कमित्युक्ते सैन्यनायकसदृक्षम्! एते सर्वे प्रकाराः गणकविज्ञानिभिः परिशीलिता एव, उपयोजिताः यन्त्रप्रक्रमनिर्माणे, मस्तिष्कतन्त्राधिगमने च ।

दत्तांशपरिशीलनं (Data Processing), आकृतिप्रत्यभिज्ञानं (Pattern Recognition) स्मरणप्रक्रमः (Memory Mechanism) इत्यादिषु विषयेषु यन्त्रमस्तिष्कयोः प्रभूतं साम्यमस्ति । भाषावगतिविषये महत् साधनीयमस्ति, प्रयोगाश्च तस्यां दिशि प्रभूताः प्रचलन्ति । एवमेव विषयाधिगमः (Learning), समस्यापरिहृतिः (Problem Solving) इत्यादीनां परिशीलनार्थं SHRDLU, GPS - इत्यादयः प्रक्रमाः समुपकल्पिताः । मनोऽवस्थानां निरूपणार्थमपि प्रचलान्ति यत्नाः ।

(g)

बुद्धिशक्तिविषये किंचिदिव विमृश्य भागममुं समापयामः । पाश्चात्याः 'Intelligence' शब्देन ग्राह्यानेतानंशानुल्लिखन्ति तद्विदः - acquiring information and skills; storing them as also retrieving; combining, comparing & using them in new contexts (अर्थात् - उपयोगवद्विषयाणां संग्रहः, तेषां विषये सोपयोगानि कौशल्यानि, एवमेवैषां

स्मरणं, योजनं, तोलनं, नूत्नसन्दर्भेषूपयोगश्चेति) । एतेषां मानार्थं च Webster Adult Intelligence Scale इति परिक्षाक्रमोऽपि कश्चिदायोजितः । एतत्सर्वं मनुष्यमनीषामानार्थम् । नेदमत्र विस्तरिष्यामः । सारांशतया पंचाशदुत्तरशतविषयेषु मापनं शक्यमावश्यकश्चेति विदुषां मतम् ।

गणितशास्त्रीयसिद्धान्तानां स्थापनमपि साधितं यन्त्रज्ञैः । उदाहरणार्थं रसेल् - वैट्हैड् (Bertrand Russell, Alfred Whitehead) इत्याभ्यां यत् साधितं, तत् परिशीलनीयम् । ताभ्यां सवकीये ग्रन्थे (Principia Mathematica नाम्नि) निरूपितानाम् अनेकेषां (द्विपंचाशत् 'प्रमेया'णां मध्ये आद्यानि अष्टचत्वारिंशत् प्रमेयाणि (theorems) न्यूवेल् - षा - सैमन् (Newell, Shaw, Simon) इत्येभिः कल्पिते प्रक्रमे साधितम् ! LAS, AMBER, AM, BACON, DENDRAL-प्रभृतिषु प्रक्रमेषु भाषाधिगम-गणितरसायनशास्त्राधिगमाः निरूपिताः सन्ति । इत्यलं पल्लवितेन । काभिः काभिर्भङ्गीभिर्न नुन्नानि मनुजैरिमान्यनेडमूकानि यन्त्राणि !!

## 5

यद्यप्येवं समधिकमेव साधितं गणकविज्ञैः 'किमेतद्यक्ष !' मिति न भेतव्यं विस्मेतव्यं वा सुधीभिस्सांशयिकैः । भूयिष्ठमेवानाकलितं वर्तते चैतन्यरूपणविषये । नहि मनुष्यस्य मनीषा विभज्य विभज्यैव प्रतिपादयितुं (Reductionism) शक्या । मस्तिष्कमित्युक्ते $10^{10}$ - तोऽप्यधिकानां नरीयाणां सुसन्दानितानां सुभगस्समवायः (more than one hundred billion neurons) ! प्रतिक्षण (every second) तेषु दशसहस्राधिकसंधिकार्याणि (synapses) भवन्तीति कृत्वा अन्ततः अखण्डेन मस्तिष्केण $10^{18}$ गणितीयक्रमाः (arithmetical operations) प्रतिक्षणं (every second) सम्भवन्तीति तद्विद्भिरूह्यते ! नैतादृक्षं सामर्थ्यं यन्त्रैरमीभिस्सुदीर्घसूत्रैस्सुलभसंपादनीयतया संलक्ष्यते । आसतां नाम बुद्धिशक्तेः कार्याणि, इन्द्रियाणामपि कार्याणां शब्दस्पर्शरूपरसगन्धानां ग्रहणे याः याः समस्याः सम्भवन्ति तासामपि परिहाराः नैव सुलभसाध्याः खर्वाणामेतेषां यन्त्राणाम् ।

भाषाधिगमविषये एव षान्क् (Schank), मिन्स्की (Minsky) प्रभृतिभिः प्रतिपादिताः क्रमाः विशिष्टक्षेत्रमात्रान्वयिन एवेति (Specific Domains) तैरपि सुविदितमेव । तेषां व्याप्तौ यदीषदपि विस्तारः स्यात् तर्हि समस्यावृद्धिः तावती भवेद्यत्ततद्गतानंशानाकलयितुं न प्रभवति यन्त्रम् ! परन्तु यद्यत् साधितं तत्संभवैर्भ्रमैः जना मुह्युः यत् सर्वमपि कियता कालेन यन्त्रसाध्यमेवेति!! भाषाधिगमादिविषयेषु तावत्, मूर्खशिशूनामपि यत् सुलभसाध्यं, तदेव प्रकृष्टगणकैः (Supercomputer) अपि न साध्यम्-इति षान्क्-प्रभृतिभिरेव तदा तदा आविष्कृतमेव । उदाहरणार्थं शय्याप्रस्तरस्य गुणीकरणं (folding a bedsheet) नैव रोबोट्यन्त्रेण सुलभसाध्यं यद् बालकोऽपि विदध्यादनायासेन! परन्तु भ्रान्तैर्जनैः भ्रामकैर्जनैर्वा सामाजिको दुरुपयोगोऽप्येषां सविशयानां विषयाणां शक्यः । ईदृक्षान् वास्तविकान् विस्तरितुं नायं चतुरस्त्रोऽवसर इति कृत्वा विरम्यते ।

समस्यापरिहारेषु जयेऽल्पतयापि वा लम्भिते, तस्याप्युपचये किञ्चिद्दृष्टे, 'पश्चात्काले सर्वमप्येवमेव संसाध्यमेव' इति संभावना सहजतया संभवत्येव साकल्यमनाकलितवताम् । अतो हि सैमन् (Simon) मिन्स्की (Minsky) प्रभृतयोऽहंयवो गणकैर्यन्त्रैर्विशेषां कार्याणां प्रभाविष्णुभिरसाध्यमपि किं वा भवितुमर्हतीत्यौचित्यमतितमामतिक्रान्तेन मिथ्याविश्वा-सेनाग्र उदघोषन्त । यथाह मिन्स्की, इतः त्रिशंद्वर्षेभ्यः प्रागेव - "अष्टस्वेव वर्षेषु तदुपकण्ठे वा मनुष्यधीसंमितानि गणकयन्त्राणि साधिष्यन्ते ! तच्च यन्त्रमेव षेक्स्पियर (Shakespeare) कृतीः पठिष्यति ! हास्यकथाः कथयिष्यति ! राजकीयादिकुटिलतन्त्रेष्वपि प्रभविष्यति !!" - इत्यादिकं, यस्य सर्वस्यांशलेशोऽपि कार्यरूपेण नायातः । एवमेव थ्रिंग् (Prof. Thring) प्रभृतयोऽपि "गृहरोबोटयन्त्राणि गृहे गृहे भविष्यन्ति, गृहकृत्यानि सर्वाणि स्वयं विधास्यन्ति - गृहमार्जन - पात्रशुद्धि - वस्त्रधावन - शय्यालंकरण - प्रभृतीनि। येन गृहिणीनामितःपरं कालयापनमेव समस्या स्याद् !!" - इति मिथ्याऽऽश्रवमुत्प्रेक्षोम्भितमुद्घोषितवन्तस्त्वाष्ट्र्या दृष्ट्या । सर्वमिदं न सुलभसम्पाद्यमिति सुधीभिर्विभाव्यते न पुनरन्यैः प्राकृतैर्जनैरनधिगतस्थालीपुलाकन्या-

यानन्वयैः । "ब्रह्मावलोकधिषणं" मानुष्यमौदग्र्यं कोऽलं साकल्येन कलयितुम् ? दभ्रं ताद्रूप्यमात्रं संसाध्य ताद्धर्म्यमेव संराद्धमिति विब्रुवाणान् कः किल प्रतीयात्प्रतिभानवान् ?

## 6

मनुष्यविकासे नियोकार्टेक्स् (Neo-Cortex) इत्यंगमेव प्रकृष्टतममिति सुविदितमेव। तदूध्युत्तमाङ्गं शास्ति समस्तं शरीरम् । न ततोऽपि व्यवस्थितं (organised) वस्तु जगत्यखण्डे क्वचिल्लभ्यम् यदभ्यज्ञासिषुर्विपश्चिदपश्चिमा इहत्या ऋषयो यज्जुघुषुः- 'मूर्धा राजा' (**बृहदारण्यकोपनिषत्** १.१.२)इति । **अथर्व**श्रुतिरपि (९.७.२) 'राजा मस्तिष्कः' इति। प्रज्ञा च प्रतिभा चेति प्रभाद्वयं सूर्यचन्द्रयोरिव प्रकाशमानं प्रभवत्यमुष्मादेव शीर्षण्यस्थानात्। वाग्देव्याः प्रक्रमाविमौ प्रतिपादयत् पद्यमिदं प्रसिद्धमेव - "द्वे वर्त्मनी गिरो देव्याः शास्त्रं च कविकर्म च । प्रज्ञोपज्ञं तयोराद्यं प्रतिभोद्भवमन्तिमम् ॥" इति । अथ भावयित्र्यपरा प्रतिभा हृदयालुलक्ष्मीः साहित्यमीमांसकैर्विशदीकृतैव । समस्तस्याप्यस्य गणकीकरणमिति वक्तुं सुकरमुच्यते । प्रज्ञानस्य समग्रता किंरूपेतीत्थं न्यरूप्युपनिष**द्यैतरेया**याम् ३.१.२, 'यदेतद् हृदयं मनश्चैतत् संज्ञानमाज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिस्स्मृतिस्संकल्पः क्रतुरसुः कामो वश इति सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति' - इति । एवमेव 'कामः संकल्पो विचिकित्सा.... सर्वं मन एव' **बृहदारण्यकोषनिषत्** - १.५.३ = **मैत्रायण्युपनिषत्** - ६.३०)। ज्ञानेच्छाक्रियावस्थास्तत्प्रकारा वैवाहोरात्राणां संज्ञात्वेन विहिता वेदेषु लक्ष्यन्ते "संज्ञानं विज्ञानं प्रज्ञानं" इत्यादिमन्त्रेषु (**तैत्तिरीयब्राह्मणम्** ३.१०.९) ! सर्वमिदमृषिदृष्टम्। मेधया जुष्ट एव ऋषिर्भवति यतो हि मेधैव विश्वाची भद्रा सुमनस्यमाना च (**तैत्तिरीयारण्यकम्** ४.१०.४२)

चेतना - मनो - बुद्धीनां सारतमत्वं **गीता**स्वपि प्रत्यपादि यथा, १०.२२ 'भूतानामस्मि चेतना', 'इन्द्रियाणां मनश्चास्मि'; ७.१० 'बुद्धिर्बुद्धिमतामस्मि' - इति । प्रज्ञानस्यैव माहात्म्यं ब्रुवती श्रुतिः 'आत्मा कृत्स्नः प्रज्ञानघन एव' (**बृहदारण्यकोपनिषत्** ४.५.१३) इत्याह, यतो हि 'प्रज्ञानैनमाप्नुयात्' (**कठोपनिषत्**

२.२४) इति च । बुद्धेरियत्सामर्थ्यं यद् यदतिगतमिन्द्रियाणि तदपि ग्रहीतुमलं सा । विहितचित्तोपरतेः साध्यभूतां स्थितिं बुद्धिर्गृह्णातीति **गीतो**क्तिः ६.२१ 'सुखमात्यन्तिकं यत्तद् बुद्धिग्राह्यमतीन्द्रियम् ।' इति । सूक्ष्मा चाग्र्या च बुद्धिस्साऽऽत्मग्रहणे समर्था, यथोक्तं **कठोपनिषदि** ३.१२ दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः - इति । बुद्धिरेव गुहा यद्गर्भे ब्रह्मेति **योगसूत्रभाष्यो**क्तिः (४.२२ सूत्रस्य) 'गुहा यस्यां निहितं ब्रह्म शाश्वतं बुद्धिवृत्तिमविशिष्टां कवयो वेदयन्ते' (- कव्यृषी समार्थकौ । दर्शनादृषिः, दर्शनं च तत्त्वज्ञानं, यदाह **काव्यानुशासनम्** - 'नानृषिः कविरित्युक्तमृषिश्च किल दर्शनात् । विचित्रभावधर्मांशतत्त्वप्रख्या च दर्शनम् ॥' एवं च 'कविर्मनीषी' **ईशावास्योपनिषत्**८; संशितव्रता 'ऋषयो मन्त्रकृतो मनीषिणः' **तैत्तिरीयब्राह्मणम्** ११.८.८.), यतस्तैर्ह्यन्तरात्मा 'हृदा मनीषा मनसाऽभिक्लृप्तः (**श्वेताश्वतरोपनिषत्** ३.१३) । जगावथर्वर्षिर्वरुणं 'न त्वदन्यः कवितरो न मेधया धीरतरः' (**अथर्ववेदः** ५.११.४)। 'स्वरूपप्रतिष्ठा चितिशक्तिः' (**योगसूत्रम्** ४.३४) हि योगशास्त्रस्यापि परमलक्ष्यम् । यत्तु 'अचेता यश्च चेतनः! स तं मणिमविन्दत् !' - इति **तैत्तिरीयारण्यके** (११.१) बाढं निगूढमुदितं तथ्यं रुचिरं नेह तत्परिचायन उत्सहामहे (न चाप्यृतम्भराभिधायाः प्रज्ञायाः योगानुशासनचरमलक्ष्येष्वेकतमायाः, नतरां चामुष्य य 'श्चेतनश्चेतनानां' सन्न 'प्यप्राणो ह्यमनाश्शुभ्रः' (**मुण्डकोपनिषत्** २.१.२) इति संगिरन्त ऋषय आपाततोऽनुपपत्तिमत्योक्त्या ।

## 7

इत्थंभूते व्यतिकरे यन्त्रे चाचेतने चैतन्यशक्तिमापादयितुं प्रयतमानानामांशिकी सिद्धिरेव संभाव्या । नहि गुणवदुपकमोऽपि यान्त्रिकः प्रक्रमो निष्क्रमायते । आस्तां नाम आध्यात्मिकस्य प्रज्ञाप्रतिभे अतिशयानस्य आनन्दवर्धनप्रतिपादितस्य स्पर्शः (रसान् रसयित्र्यैका, वैपश्चिती दृष्टिरपरा - **ध्वन्यालोकः** ३.४४ इत्यस्य वृत्तिः); सर्वजनसाधारण्या भाषाया अपि प्रभुत्वं न सुलभसाध्यं यन्त्रैर्वैधेयैः - अर्थाद् विना विधीन् "कण्ठोक्तान्" प्रवर्तितुमशक्नुवद्भिः ! सम्यग्दर्शिभिर्नामास्मामिभर्भाव्यम् । औचित्यमेव हि लोके शास्त्रे काव्ये वोपनिषद्भूतम् । न खलु

कार्यकारणपट्टिकाभिर्भूयसीभिरपि सामस्त्येनौचित्यं जातुचिद्विवेचयितुं सुशकम् । अतश्च कृत्वा बृहतो निघण्टून् विस्तृतान् विश्वकोशान् वापि समेधितमेधे गणके समायोज्यापि, तत्रत्येषु नानांशेषु विश्वत्र व्याप्रियमाणेषु कदा कदा कस्य कस्यांशस्यान्येनांशेन केन केन कीदृशः कीदृशः संबन्धः कथं कथं कुतः कुतश्च प्रादुर्भवति प्रविलीयते वेति हेतुहेतुमद्भावभङ्ग्या विशङ्कं व्यवच्छिन्दन्नियत्तया विवरीतुमुपक्रममाणो विरिंचिरपि विहतफलो वितथमनोरथश्च सञ्जायेतैवेति विषये के नाम सविज्ञाना विशयीरन्? गणितानतिवर्ति त्रैलोक्यमखिल-मित्यभिजनाभिमतस्यौपपत्तिकस्य याथातथ्येऽविवदमानैरपि 'तेषामानन्त्यमन्योन्य-सम्बन्धपरिकल्पने' (**ध्वन्यालोकः** २.१३) इति न्यायस्य प्रसरोऽप्यप्रतिहत एवेहापीत्युररीकरणीय एव यद्दिक्सूचनमेवैवमभिदधे पटुधिया कैयटेन विद्वद्दीपे महाभाष्यप्रदीपे भर्तृहर्यप्रतीपे को हि नाम धातुप्रत्ययप्रातिपदिकानामर्थं विवेक्तुमलमिति पृच्छता (- अर्थादपास्य हि प्रतीयमानमर्थमिदमुदीरितं यो हि 'तत्तत्प्रकरण-वक्तृप्रतिपत्त्रादिविशेषसहायतया नानात्वं भजते ।' (**काव्यप्रकाशः** ५.४७); अविपञ्च्य च विकल्पप्रपञ्चं विवक्षायत्तं यदाह **हेलाराजः** 'वक्त्रभिप्रायारूढस्यैव शब्दार्थत्वम्' इति वाक्यपदीया(३.९६)व्याख्यायां, यदाकूतिश्च कुतूहलिभिस्तत एवावसेया)। अवधारणस्यावधीरणं सावधानं सावधारणं चोट्टकते स्फुटवाक्कैयटः 'अनन्तत्वात् प्रयोगविषयस्यावधारणस्य कर्तुमशक्यत्वाद्' इति । अत एव ड्रेफुस (Dreyfus)-वैजेनबाम् (Weizenbaum) प्रभृतय-स्संगणकविद्यावैशारद्यप्राग्र्या अपुरोभागिन स्स्वयमकुण्ठशेमुषीविभवा-स्सन्तस्सन्तो हेत्वाभासगर्भैर्वाग्विलासैर्जनमनतिविदुर-मतिसन्दधतोऽत्रत्यान्दग्ध-विदग्धान्प्रतारकान्प्रत्यादिशन्तो जागरयन्त्यस्मान् यद्विषयेऽपि भूयिष्ठं देष्टव्यं नोपन्यस्तमपास्त-मिह विस्तरभिया।

एवं स्थितेऽपि सहजो व्यवसायोऽयं कृत्रिमे न हातव्यः । दविष्ठमपि वस्तु निस्तंद्रं गवेषमाणा ह्युत्सर्पिणी कर्मठानामेकतानानां प्रार्थना किमपि प्रेष्ठं फलं सूत एव । न चाननुभूय क्लेशमेतावन्तं कारणिकैरपि विज्ञानिभिरूहितुमपि शक्यमभविष्यद्गाभीर्यं

वाक्तत्त्वस्य यन्नामास्मद्देशीयैः पुनः प्रत्नैः प्राज्ञरत्नैर्नमस्यितैया-स्कव्याडिपाणिनिपतञ्जलि-प्रभृतिभिरमितमतिभि-स्स्फुटतयाधिगतमुपपादितं चाभवत्सहस्रद्वयवर्षेभ्यः प्राक् ! अतो हि कार्मैर्गणकिभिरधुनातनैर्भाषार्थिक-प्रक्रमेषु कारकसिद्धान्तसदृक्षराद्धान्तैरेव भाषापरिशीलनं शक्यं 'नान्यःपन्था विद्यतेऽयनाये'त्यनुभूतमिति कारकव्यवस्थाया सर्वभाषान्वयित्वमेभिर-वाभिज्ञैस्तथात्वेन प्रत्यभिज्ञातमाश्चर्यं हि पाश्चात्यैर्विपश्चिद्भिः प्रकटं प्रतिपन्नं प्रस्फुटं च प्रत्यपाद्यपि मात्सर्यच्छायाऽनाच्छुरितैः !! स्वभावोक्तिमात्रं तर्ह्येतद्यदनया संस्कारवत्या गिरा पूतश्च विभूषितश्चायं मनीषिणां मेधाविनाञ्च जनिभूर्भारतो देशः ।

अवितथमित्थं भणितं भगवता भर्तृहरिणा 'प्रज्ञा विवेकं लभते भिन्नैरागमदर्शनैः' इति (**वाक्यपदीयम्** २.४८६) । योगशास्त्रसिद्धान्तानामपि गत एव बत शतमाने हास्यैकविषयाणां पृथग्जननिकुरुम्बनिकृतिशत-पराकृतानामद्यतनैःपुनरारोग्यापादन-प्रवणैर्माहात्म्यं सार्वावस्थिकसार्वजनीनत्व-मत्रत्यानामप्यपेक्षया वैदेशिकैर्विशिष्टयाऽऽस्थया महता परिश्रमेण युक्तया व्यवस्थया च प्रतिपाद्यमानमुपयुज्यमानं च वरीवर्ति नर्तितसमस्तसधिषणजन-चित्तवृत्ति ।

अतो हि महदौचित्यमुक्तेर्हर्षमाणस्य एमेनो महाशयस्य (Emeneau) यद् भारतस्य विशिष्टा सिद्धिः भाषातत्त्वाध्ययने मनस्तत्त्वाध्ययने चेति, परं नात्र पुनश्चित्रीयते नश्चेतो यतो हि 'अत्रा धीरा मनसा वाचमक्रत ।' (**महाभाष्यम्**, पस्पशाह्निकम्) । ईदृशी च साधिष्ठा प्रार्थना वैदिक्यप्यासीदिति प्रायस्तेनैव न ज्ञातं स्यात् - "चित्पतिर्मा पुनातु वाक्पतिर्मा पुनातु।" (**यजुर्वेदः** ४.४.४) इति। यत्कृता हि समुचिता सफलतेयमुदग्रा सुभगा च "चोदयित्री सूनृतानां चेतन्ती सुमतीनां" (**ऋग्वेदः** १.३.१) पावका नः सरस्वती ।

"तन्मे मनः शिवसंकल्पमस्तु" ।

"मेधामनीषे मा विशताँ समीची ।"

"स नो बद्ध्या शुभया संयुनक्तु" ॥

॥ इति शम् ॥

# सोल्लेखाः संस्कृतग्रन्थाः


अथर्ववेदः

अभिधानरत्नमाला

अमरकोशः

अष्टाध्यायी

ऋग्वेदः

ईशावास्योपनिषत्

ऐतरेयारण्यकम्

ऐतरेयोपनिषत्

कठोपनिषत्

कथासरित्सागरः

काव्यानुशासनम्

काशिका

कुमारसंभवम्

कुल्लूकः (मन्वर्थमुक्तावली)

कौषीतक्युपनिषत्

गणितसारसंग्रहः

चरकसंहिता

तर्कसंग्रहः

तैत्तिरीयब्राह्मणम्

तैत्तिरीयारण्यकम्

दूतघटोत्कचम्

धरणीकोशः

धातुपाठः

ध्वन्यालोकः

निरुक्तम्

न्यायसूत्रम्

न्यासः

पञ्चदशी

प्रतिज्ञायौगन्धरायणम्

बृहदारण्यकोपनिषत्

भगवद्गीता

भाषापरिच्छेदः

मणिप्रभा

मनुस्मृतिः

महाभारतम्

महाभाष्यम्

मेघदूतम्

मैत्रायण्युपनिषत्

यादवाभ्युदयम्

योगसूत्रम्

योगसूत्रभाष्यम्

रघुवंशम्

रामायणम्
रामाश्रमी
लक्ष्मीधरा
लिङ्गपुराणम्
वाक्यपदीयम्
विवेकचूडामणिः
विष्णुसहस्रनाम
वेतालपञ्चविंशतिः
वैशेषिकसूत्रम्
शतपथब्राह्मणम्
शब्दार्थचिन्तामणिः
शारदातिलकम्
शिवानन्दलहरी
शुक्लयजुर्वेदः
श्वेताश्वतरोपनिषत्
समराङ्गणसूत्रधारः
सर्वदर्शनसङ्ग्रहः
सांख्यकारिकाः
सुभाषितत्रिशती
सुश्रुतसंहिता
सौन्दर्यलहरी
हठयोगप्रदीपिका

# CONTRIBUTORS

1. Dr. Virendra Kumar Mishra is Reader in Sanskrit at Himachal Pradesh University, Shimla. He has an M.A., Ph.D., and Sahityacharya from Lucknow University. He has specialised in Krishnayajurveda. He has a number of books and research articles to his credit. He has guided many research students for their Doctoral Degree. Sampoornanand Sanskrit University, Varanasi has honoured him during the Sanskrit year celebrations.

2. Professor Seshalachala Sarma, retired as Professor of Alankara Sastra from Sri Chamarajendra Sanskrit College, Bangalore. He has a Vidvan Degree in Alankara Sastra and Vyakarana with distinction. He passed M.A. with first rank from Sagar University (M.P.). Karnataka Govt. has honoured him with Rajyaprasasti. He was honoured by Rashtriya Sanskrit Samsthan New Delhi during Sanskrit year. His Kannada translation of Shankara Darshana and Mahabharata Adiparva have been furnished from University of Mysore.

3. Dr. Vindhyesvari Prasad Mishra, is Reader in Sanskrit at Vikram University, Ujjain. He has an M.A. and Ph.D. from Benares Hindu University, Varanasi. He has guided many research students for their Ph.D. Degrees. As a creative writer, he has brought out many collections of poetry and has edited many books. He has specialised in Bhagawatha and Puranas. Has attended many National and International seminars.

4. Dr. Radhey Shyam Chaturvedi is Reader in Sanskrit from Banaras Hindu University, Varanasi. He is an Acharya in Vyakarana and has been honoured by Uttar Pradesh Sanskrit Academy. He has

written books on Advaita Vedanta, Kashmir Shaivism, Ayurveda and Tantra. Has attended many National and International Seminars and has guided many research scholars for their Doctoral Degree.

5. Smt. B.G. Sreelakshmi is teaching Sanskrit in post graduate Sanskrit Dept. of Bangalore University since 1972. She has successfully guided many research students. She has edited a number of books like Sense Perception in Science and Sastras, God - Rebirth and the Vedas and so on. She has a book in Kannada on Advaita Acharyas. She is one of the editors of the Kannada Bhagavata Project of ISKCON which has already brought out 18 volumes.

6. Dr. Pushpa Dixit is Professor and Head Dept. of Sanskrit at Sasakiya P.G. Girls College, Bilaspur, Chattisgarh. She has specialised in the study of Vyakarana and has published 2 volumes on Astadhyayi in Hindi entitled "Astadhyayi Sahajadodh". The other volumes are in the press. As a creative writer in Sanskrit, she has broughtout 2 Gitikavyas Agnisikha and Shambhavi. She has attended many National and International seminars and has participated in poet's meet.

7. Mahamahopadhyaya N. Ranganatha Sharma, retired as Prof. of Vyakarana from Sri Chamarajendra Sanskrit College, Bangalore. He is the recipient of President's Certificate of Honour, Karnataka Rajyotsava award and was conferred Mahamahopadyaya title from Rashtriya Sanskrit Vidyapeetha Tirupati. Has translated Valmiki Ramayana, Vyasa Tatparya Nirnaya, Madhaviya Shankara Digvijaya into Kannada. As a creative writer in Sanskrit, he has written 2 plays - Ekachakram and Bahubalivijayam. He is on the advisory panel of a monthly journal of Sanskrit from Bangalore Sambhasana Sandesha. A felicitation volume entitled "Rangabhinandana" was presented to him by the scholarly circle.

8. Dr. Somanath Nene is Professor of Sanskrit in Vikram University,

Ujjains. He has an M.A. and Ph.D. from Benaras Hindu University, Varanasi. He has specialised in Mimamsa system of Philosophy. He has guided many scholars successfully for Ph.D. degrees. He has attended many National and International conferences and has number of publications to his credit. He has 20 years of post graduate teaching experience.

9. Dr. Radha Krishna Murthy has a Ph.D. in Hindi as well as in Sanskrit. She was Professor of Sanskrit in M.E.S. college, Bangalore. She has guided many research scholars in Hindi for their Doctoral Degrees. Her book "Dakshinbharat Sant Parampara" received a National Award from Human Resources Ministry. She received Sauharda Samman from Hindi Samsthan (U.P.) and was conferred the title Sahitya Vachaspati by Hindi Sahitya Sammelan Prayag. In english her work Shivatattvaratnakara a cultural study is noteworthy. She has completed a major research project of UGC on Mahakavyas in Sanskrit, Hindi and Kannada.

10. Mahamahopadhyaya S.V. Bheema Bhatta retired as Prof. of Nyaya from Sri Chamarajendra Sanskrit College, Bangalore. He has Vidvan Degree in Prachina Nyaya, Naveena Nyaya, Dvaita Vedanta and Alankara Sastra. He is Rashtrabhasha Visarada in Hindi. He is the recipient of President's Certificate of Honour. He was conferred the title Mahamahopadhyaya by Rastriya Sanskrit Vidyapeetha Tirupati. Many pontiffs have conferred innumerable titles on him like Madhwaratnakara, Sastra Ratnakara, Vaishnava Bhoosana, Vedasri, and so on.

11. Vidvan Areyar Srirama Sharma is Former Principal at Government Sanskrit College, Melukote. He has Vidvan Degrees in Pracheena Nyaya, Naveena Nyaya, Visistadvaita Vedanta and Alankara Sastra. He has an M.A. in Sanskrit, Pandit in Kannada and Rashtrabhasa Visarada in Hindi. He has the title "Panchabhasa Kavivallabha.". He can write poetry in Sanskrit, Prakrit, Kannada, Tamil and Hindi. Some of his published works in Sanskrit are

Srivijaya Dhvanih, Sahitya Matrka, Kavyakallolini and others.

12. Dr. Abhiraja Rajendra Mishra - Professor and Head Sanskrit Dept. Himachal Pradesh University Shimla has 100 books to his credit in Sanskrit, Hindi and Bhojpuri. Has successfully guided many candidates for Ph.D. Has won many awards like Central Sahitya Academy award, Vacaspati Puraskar of K.K. Birla Foundation, Delhi, U.P. Sanskrit Academy Award, recipient of President's Certificate of Honour and so on. He was visiting Professor in Bali Indonesia.

13. Dr. Radhavallbh Tripathi Ph.D., D. Litt, Professor and Head Sanskrit Dept. Dr. Harisingh Gaur University, Sagar (M.P.) has 74 books to his credit in Sanskrit, English and Hindi. Has successfully guided 32 candidates in Ph.D. Has more than 100 articles to his credit. Has won many important awards like Bhoj Puraskar of M.P., Sanskrit Academy, Kalidas Puraskar of U.P. Sanskrit academy, Central Sahitya Academy award, Rashtriya Hindi Ratna Samman of Calcutta Hindi Academy, Ramakrishna Puraskar of Canada and so on. He was visiting Professor in Germany. Now he is attached to Shilpakorn University, Thailand.

14. Dr. Janardan Prasad Pandey "Mani" is head of the Department. of Sanskrit in Govt. Degree College, Lansdoune, Powdi Garhwal, Uttarchanal. He has an M.A., D.Phil in Sanskrit from Allahabad University, M.A. Hindi from Kanpur University and a Ph.D. from Rastriya Sanskrit Sansthnam, New Delhi. He is a creative writer in Sanskrit and Hindi and has broughtout many collections of poetry. He has translated into Hindi Ayodhya Mahatmya which occurs in Skandapurana. He has a tradtional degree Sahityacharya from Sampoornanand Sanskrit University, Varanasi.

15. Professor K.S. Kannan is Professor and Head Department of Sanskrit National College in Jayanagar. He has a Vidvan Degree in Alankara Shastra from Sri Chamarajendra Sanskrit College,

Bangalore. He is the author of "Dhatu Roopa Kosha" and "Krudanta Roopa Kosha". He has edited with exhaustive notes "Virupaksha Vasanthostava Champu" and is published by Kannada University, Hampi. Has specialised in language processing by computers. Has attended many National & International Conferences.

16. Dr. S. Ranganath is Professor of Sanskrit at N.M.K.R.V. College, Bangalore. He has M.A., Ph.D. in Sanskrit from Bangalore University and a Vidvan in Advaita Vendanta from Sri Chamarajendra Sanskrit College, Bangalore. He has 20 books in Sanskrit, English, Kannada. He has studied Rigveda traditionally for 8 years. Sampoornanada Sanskrit University, Varanasi, Devavani Parishat, Delhi, Ogeti Achyutarama Shastri Trust, Hyderabad, have honoured him. His Kannada translation of Professor Satyavrat Shastri's epic Ramakirti Mahakavyam has been published in Bangkok, Thailand.